मा स्म व्यापीपदः सत्त्वनिधिं निरवधिं गुणैः ॥१२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

एकं वैदेशिकोऽन्यच्च निरागा रागवर्जितः ।
ततोऽसौ मार्यत इति सर्वथानुचितं ह्यदः ॥१३०॥

निवार्य स्वार्यमेवं ते तं कुमारं ततोऽभ्यधुः ।
मा चूकुपस्त्वं सचिवं वक्त्यसौ तद् विधीयताम् ॥१३१॥

स एवमुक्तः सचिवोक्तं तन्मत्वा महामनाः ।
व्यचीचरच्चेतसैवं विचारचतुरो हि सः ॥१३२॥

क्व **विशाला**पुरी ? क्वायमागमः ? क्वेदृशी स्थितिः ? ।
क्व वा वातेन पुंसः स्यान्नयनं खेन तूलवत् ? ॥१३३॥

क्व च साकाशिकी वाणी ? क्व चास्या श्रवणं मया ? ।
भवितव्यं तदनेनार्थेन स्वार्थस्तदुच्यताम् ॥१३४॥

विचार्यैवं स सचिवमूचे सचिव ! यद्यदः ।
कारयिष्यसि तत्किञ्चिन्ममापि कुरु वाञ्छितम् ॥१३५॥

मन्त्रिणा किं तदित्युक्ते सोऽप्यूचे यन्महीपतिः ।
मङ्गलेषु प्रदत्तेऽसौ तद्देयं मे महामते ! ॥१३६॥

तदशेषं **विशाला**या विनिवेश्यं च वर्त्मनि ।
बहु मेने मतिमतामात्येनाप्यथ तद्वचः ॥१३७॥

अथोद्वाहस्य सामग्री पक्षयोरुभयोरभूत् ।
विवाहलग्नमासन्नमासीद् गणयतोर्मिथः ॥१३८॥

शुभे तिथौ शुभे वारे सुभे लग्ने शुभेऽहनि ।
वर्णकोद्वर्णकविधौ विधिना विहिते सति ॥१३९॥

वारस्त्रीभिः कुलस्त्रीभिः विस्तीर्णधवलध्वनिः ।
वादित्रकोटिध्वनिभिर्बधिरीकृतदिङ्मुखः ॥१४०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बन्दिवृन्दारकोत्कीर्त्यमानकीर्त्तिकुलक्रमः ।
चतुर्दिशं चतुरङ्गानीकेन परिवारितः ॥१४१॥
गजारूढः कुमारः स मण्डपद्वारमीयिवान् ।
कृताचारस्थितिस्तत्र मातृगेहमथाश्रयत् ॥१४२॥ कलापकम् ॥
पुण्याहधवलनान्दीतूर्यध्वनिषु सत्सु सः ।
प्राप्ते लग्नोदये हस्तालेपं पूर्वं वणिक्सुतः ॥१४३॥
**त्रैलोक्यसुन्दरीं** पाणौ चक्रे तदनु कारितः ।
दैवज्ञेन समं वध्वा तारोमेलविधिर्मिथः ॥१४४॥ युग्मम् ॥
विलसद्-भ्रूतोरणया दृष्टिद्वारा तदा मिथः ।
छायाच्छलेन हृद्गेहे तौ प्रवेशमिवेषतुः ॥१४५॥
परितः पावकं वेद्यां जामातुर्भ्रमितस्ततः ।
राजा चतुर्मङ्गलेऽदाच्चतुरङ्गदलादिकम् ॥१४६॥
जामातरि वधूपाणिं तथाप्यपरिमोक्तरि ।
राजा तमूचेऽन्यदपि वाञ्छितं वत्स ! याच्यताम् ॥१४७॥
सोऽप्यजल्पीदिति नृपं यद्येवं देव ! देहि तत् ।
पञ्चवल्लभवाज्यन्तरुत्तमं वाजिपञ्चकम् ॥१४८॥
तथाकृते नृपतिना महेन महता ततः ।
समं **त्रैलोक्यसुन्दर्या** वर्यानेकपसंस्थितः ॥१४९॥
चलन्नभिमुखं मन्त्रिमन्दिराया **धना**ङ्गजः ।
पौराणां पथि शुश्राव कर्णामृतकिरं गिरम् ॥१५०॥ युग्मम् ॥
कृष्णः खर्वः पुराणौजाः श्रियः पतिरजायत ।
अस्यास्त्वसौ पुण्यवत्या गौरस्तुङ्गो नवोत्कटः ॥१५१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मृगाक्षीमानमाणिक्यापहारस्फारतस्करः ।
यदेष च यदेषा च मर्त्यलोकमनोहरा ॥१५२॥

अनयोरुभयोः कुर्वन् सङ्गमं नलिनासनः ।
नाऽसमञ्जसकारीति तदेष स्मर्यते बुधैः ॥१५३॥

इति पौरगिरं श्रृण्वन्**मङ्गलः** प्रापदालयम् ।
मङ्गलेन प्रविश्यात्र वासागारं जगाम सः ॥१५४॥

पल्यङ्कसङ्गिनः पत्युर्वधू**स्त्रैलोक्यसुन्दरी** ।
निषसाद सन्निधाने प्रसादविलसन्मुखी ॥१५५॥

अत्रान्तरे मन्त्रिनरैरन्तरङ्गै**र्धना**त्मजः ।
दृक्संज्ञया संज्ञितोऽसौ याहि पाहि निजं वचः ॥१५६॥

सोऽपि कृत्वा वपुश्चिन्तामिषं यावद्गृहात्ततः ।
निस्ससार वधूस्तावदात्ताम्बुरनुगाजनि ॥१५७॥

पतिं कृतवपुश्चिन्तं विचिन्तं वीक्ष्य साऽवदत् ।
किं क्षुधा किं तृषा वा त्वां बाधते ? कान्त ! कथ्यताम् ॥१५८॥

ओमित्युक्ते तेन तया दास्या मातृगृहात्ततः ।
आनायिता दयिताय मोदका हारि वारि च ॥१५९॥

द्वाभ्यामपि तदा भुक्ते सिंहकेसरमोदके ।
विदित्वा विजनं स्वस्य ज्ञप्तये **कलशो**ऽवदत् ॥१६०॥

मोदकानाममीषां स्यादृता मोदकता तदा ।
यदा भवे**दुज्जयनी**नगरीनीरयोगिता ॥१६१॥

राजाङ्गजा निशम्यैवं विहस्य ध्यातवत्यदः ।
सा दूरे नगरी तां न प्रियोऽसौ दृष्टवान् खलु ॥१६२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदेतदुक्तं घटति न कथञ्चन सर्वथा ।
घटते वाऽमुष्य भवेत् तत्र मातृकुलं यदि ॥१६३॥
प्रध्याय धात्रीधवभूस्तस्मै ताम्बुलमार्पयत् ।
मनोरागस्य जनकं बहीरागकृदप्यतः ॥१६४॥
भूयोऽपि संज्ञितस्तैः स निर्गमाय **धना**त्मजः ।
प्रियामूचेऽस्मि यास्यामि वर्चोगेहेऽसि तिष्ठ तद् ॥१६५॥
पयः क्षणान्तरे प्रेष्यमिति प्रोच्य **धना**ङ्गजः ।
वासगेहाद् विनिर्गत्य तानूचे क्व हयादि मे ? ॥१६६॥
नरै**रुज्जयनी**मार्गं नीत्वा तं दर्शितं ततः ।
तस्याखिलं तुरगादि सोऽपि तद्वीक्ष्य हृष्ट्यभूत् ॥१६७॥
कुमारोऽपि ततः सारं समादाय ततः स्वतः ।
निवेश्य स्यन्दने तत्र युङ्क्ते स्म चतुरो हयान् ॥१६८॥
संयोज्य पञ्चमं पृष्ठे वाजिनं **धनदत्त**भूः ।
पृच्छति स्म नृणां पार्श्वे मार्गग्रामादिनाम सः ॥१६९॥
शेषमेतदशेषं मे वस्तु मन्त्रिशिरोमणेः ।
समर्प्यमिति तानुक्त्वा सोऽचलत् स्वां पुरीं प्रति ॥१७०॥
वेगादेत्य पुरीं स्वीयां वाजिभिर्वायुवाजिभिः ।
प्रविशन्नात्मनो वेश्म पितृभ्यामुदितोऽथ सः ॥१७१॥
किमैषि ? परवेश्मान्तर्नास्त्यग्रे मार्गनिःसृतिः ।
तत् तिष्ठ राजपुत्र ! त्वं शिष्टानां नोचितं ह्यदः ॥१७२॥
मदीयं मन्दिरं माद्यदिन्दिरं पितराविदम् ।
तत्कथं प्रविशन्नत्र प्रतिषिध्योऽस्मि ? कथ्यताम् ॥१७३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदानीं सात्यभामेयः पुण्यामेय इति ब्रुवन् ।
उत्तीर्य स्यन्दनात् पित्रोः पादयोः प्रणनाम सः ॥१७४॥

ससम्भ्रमं समुत्थाय पितृकण्ठे विलग्य च ।
स रुरोद सप्रमोदः पुलकोद्भेदमेदुरः ॥१७५॥

विदित्वा नन्दनं स्फीतानन्दकन्दलिताननम् ।
बाढं रुरोदतुः कण्ठे विलग्य पितरावपि ॥१७६॥

तदानीं रुदतां तेषां सम्प्लवः सुखदुःखयोः ।
योऽभूत् त एवं तं जानन्त्यसौ यैरन्वभूयत ॥१७७॥

पितृप्रणयिपौराद्यैः परीते परितस्ततः ।
मूलादप्यात्मनो वृत्तं मातापित्रोः शशंस सः ॥१७८॥

कथ्यमानं तदाकर्ण्य तदा वृत्तं महात्मनः ।
भाग्यश्रीभाजनं मेने **सत्यभामा**ङ्गजं जनः ॥१७९॥

रथादथायमुत्तार्य तत् तद्वैभवमद्भुतम् ।
पञ्चाश्वीमपि वेगेन स गेहान्तरगोपयत् ॥१८०॥

तया कमलया स्वेनानीतया स्फीतयाथ सः ।
सप्राकारमतिस्फारमात्मागारमकारयत् ॥१८१॥

हेलाहतापदे धर्मजन्मने सम्पदे नमः ।
यद्विस्फूर्त्तेरदेवोऽपि स्याद्देवस्तद्भवे जनः ॥१८२॥

ये श्रीमन्तः पितृश्रीभिस्तेषां काहङ्कृतिः क्षितौ ।
सवितुस्तेजसा तेजस्विनोऽश्मानोऽपि केऽपि यत् ॥१८३॥

मृतानपि जीवयन्ती राजयन्ती रत्नानपि(?) ।
उत्कर्षयन्ती हीनानप्यहो ! श्रीरधिका विधेः ॥१८४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

बहिराडम्बरपरः स्यान्नरः सधनोत्करः ।
श्रीपतिः सायुधः शश्वन्न कदापि निरायुधः ॥१८५॥

अथान्येद्युरनुज्ञाप्य **मङ्गलः** पितरं निजम् ।
सौधासन्नाध्यापकस्याभ्यासेऽभ्यस्यति सत्कलाः ॥१८६॥

जनः पशुर्विना विद्यां विना विद्यां जनोऽन्धलः ।
श्रीमन्तस्तन्न कृत्यज्ञास्तन्न पश्यन्ति किञ्चन ॥१८७॥

भूयसा भक्तिभारेण विनयीभूय भूरिधीः ।
विद्या ग्रहीतुमारेभे स उपाध्यायपुङ्गवात् ॥१८८॥

विद्यावाप्तिर्विनयतो हिताय विहिता भवेत् ।
हन्यन्ते केकिनः किं न वैमुख्येन कलापिनः ? ॥१८९॥

इतश्चामात्यकेनापि तेनात्मतनयस्तदा ।
कृतमङ्गलनेपथ्यः प्रैषि वासौकसि क्षणात् ॥१९०॥

सोऽप्यत्रागत्य पल्यङ्के स्थित्वा तां नृपकन्यकाम् ।
प्रोच्य प्रिये ! प्रसीदेति पाणौ स्प्रष्टुं प्रचक्रमे ॥१९१॥

हन्ताऽन्यः कोऽपि कुष्ठ्येष मम पल्यङ्कमागतः ।
हहा ! क्व स प्रियतमश्चक्षुःकर्पूरसोदरः ? ॥१९२॥

इति ध्यात्वाा वधूर्मुक्त्वा वेगात्तल्पमनल्पधीः ।
द्वार्येत्य स्वसखीनां च स्वरूपं तदचीकथत् ॥१९३॥

ताभिरुक्तं सखि ! भ्रान्ता प्रियोऽन्तस्तेऽधुनाविशत् ।
सोचे भ्रान्ता यूयमेव स्थास्याम्यत्रैव वोऽन्तिके ॥१९४॥

सखीभिरपि तज्ज्ञात्वा तथ्यं सा स्वान्तिके धृता ।
निशान्ते मातुरादेशान्नीता मन्दिरमात्मनः ॥१९५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गत्वा प्रातरमात्योऽपि पूच्चक्रे भूभृतः पुरः ।
देव ! मुष्टोऽस्मि दैवेन दैवं हि बलवत्तरम् ॥१९६॥
मत्पुत्रस्तव जामात्रीभूतः शक्रिष्यति क्षितौ ।
इत्याशाशाखिशाखां मे दुर्दैवदहनोऽदहत् ॥१९७॥
देव ! देवप्रसादोऽसौ दुर्दैवेन वृथा कृतः ।
स्नुषास्पर्शेन तनयं कुष्ठिनं मम कुर्वता ॥१९८॥
धिग् दैवं नवमी निन्द्या बुधयोगे महीतले ।
पशूपहारयोगे तु सा महत्त्वेन मह्यते ॥१९९॥
भूपोऽप्याकर्ण्य तद्वाचं वाचं प्रोवाच मे दृशोः ।
न गोचरमपि प्राप्या सा पापा पतिपुंसिनी ॥२००॥
नृपाज्ञया जनन्यापि सा दृष्टावज्ञया सती ।
हा किमेतन्ममोदीर्णं विस्तीर्णं ? ध्यातवत्यदः ॥२०१॥
येन स्पृष्टा न तावन्मे पतिर्योऽभूत्पतिः पुनः ।
स ययौ क्वापि तेनास्मि कथं स्यां पतिपुंसिनी ? ॥२०२॥
अयं पुन र्मे यदभूत्कलङ्काङ्कुरसङ्क्रमः ।
स प्राग्जन्मार्जितः कोऽपि निष्कलङ्ककलङ्कनात् ॥२०३॥
दोषः प्रयुक्तो मिथ्यापि पापपोषकरोऽङ्गिनः ।
यत्प्रदोषेण कालुष्यं विश्वस्यापि विजृम्भते ॥२०४॥
चञ्चच्चिन्ताभराक्रान्ता भ्रान्ता **त्रैलोक्यसुन्दरी** ।
सा सस्मार झगित्येतत्तदुक्तं प्रतिभाऽद्भुता ॥२०५॥
मोदकानाममीषां स्यादेता मोदकता तदा ।
यदा भवे**दुज्जयनी**नगरीनीरयोगिता ॥२०६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ध्यात्वैवं जननीमूचे मातः ! पित्रा समं मम ।
दर्शनं कारय सकृन्न माता विकृता भवेत् ॥२०७॥
न किञ्चिदुत्तरं माता यदा दत्ते तदा ततः ।
सा खिन्ना **सिंह**नृपतिं राजमान्यमवोचत ॥२०८॥
त्वं मे पितृसमः किञ्च राजमान्योऽस्यतः पितः! ।
कृपां कृत्वा मयि नृपमेवं विज्ञपय प्रभो ! ॥२०९॥
या देव ! भवतश्चित्ते दुहिता दोषभूरभूत् ।
विज्ञप्तिं ते सैकपदां विधाय विरमिष्यति ॥२१०॥
ओमित्युक्त्वा **सिंह**भूभृद् भूभृतं प्राप्य तद्वचः ।
तथा कथञ्चिदस्याख्यद्यथाऽभूद् भूभृदुत्कृपः ॥२११॥
अभाणीच्च यथानीय तां विज्ञापय मां नृप ! ।
तस्याः करोमि विज्ञप्तिं सफलां सकलां तथा ॥२१२॥
तथाकृते तेन तातं कुमार्येवं व्यजिज्ञपत् ।
कुमारवेषं मे देहीत्युदित्वा विरराम सा ॥२१३॥
निशम्यैवं नरपतिर्मनसैवं परामृशत् ।
गुरुकार्येण केनापि मामेवं याचते सुता ॥२१४॥
अथ च क्ष्माभृतामास्ते नीतिरेवं सनातनी ।
सुता कुमारनेपथ्यं याचते चेत्तदर्प्यते ॥२१५॥
अन्यदाप्तनृणां पुत्री रक्षणाय समर्प्यते ।
तद्द्वारेण तथा गोत्रं गोत्राभर्त्तुर्न दुष्यते ॥२१६॥
विमृश्यैवं नरेशोऽपि कौमारं वेषमार्पयत् ।
चापासिशस्त्रीप्रमुखं सुताया विकसद्दृशः ॥२१७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आप्तं पराक्रमकलावाप्तं **सिंह**मथादिशद् ।
तथा त्वं पालयेरेनां यथाऽसौ स्यान्न लक्ष्मभूः ॥२१८॥

नित्यं नियन्त्रिता नारी निवासस्य श्रिये भवेत् ।
सदा दण्डवती चैत्ये पताका स्याद्विभूषणम् ॥२१९॥

भूयो विज्ञापय स्वच्छे ! यद्वत्से ! तव भासते ।
इति भूपोदिता सा तं व्यजिज्ञपदनाकुला ॥२२०॥

यदि स्यात्तव चेदाज्ञा तद् **विशालां** व्रजाम्यहम् ।
भूभृदूचे व्रज सुते ! परं शीलवती भवेः ॥२२१॥

धात्रीच्छत्रगिरीन्द्रदण्डकरणे शक्तिर्यदुज्जृम्भते ।
ज्ञानश्रीरपि यच्च विश्ववलये व्यावल्गिनी वल्गति ॥
यच्चानन्तचतुष्टयैकसदनं सा सिद्धिरप्यङ्गिना-
मुन्मीलत्यकलं तदेतदखिलं सद्ब्रह्मलीलायितम् ॥२२२॥ शार्दूलवि० ॥

**त्रैलोक्यसुन्दरी** भूपं नत्वा **सिंह**बलान्विता ।
कुमारवेषभृद्वेगादगा**दुज्जयनीं** पुरीम् ॥२२३॥

**चम्पा**धिपात्मजं ज्ञात्वायातं **त्रैलोक्यसुन्दरम्** ।
महाभूत्याभ्येत्य पूर्यां प्रावेशयदिलापतिः ॥२२४॥

महासन्मानपूर्वं च महावासं समार्पयत् ।
**चम्पा**भूपतिभूः सोऽपि तत्रास्थात् सपरिच्छदः ॥२२५॥

पूःपूर्वभागं सजलं सवृक्षपटलं कलम् ।
विदित्वात्मीयपुरुषैर्विश्वासश्रीनिकेतनैः ॥२२६॥

पृथ्वीपतिमनुज्ञाप्य प्रदेशे तत्र भूपभूः ।
सप्तभूमिकमुद्दामं स मन्दिरमकारयत् ॥२२७॥ युग्मम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**त्रैलोक्यसुन्दरः** कार्त्तान्तिकादिष्टे विशिष्टधीः ।
सुदिने सदने तत्र सञ्चचार विचारवित् ॥२२८॥
वातायनस्थितस्तत्र सोऽन्यदैक्षत भूपभूः ।
पाथसः पथि तानश्वान् पाथःपानाय गच्छतः ॥२२९॥
**त्रैलोक्यसुन्दरः** प्रेक्ष्य तार्क्ष्यांस्तानित्यचिन्तयत् ।
त एतेऽश्वाः प्रदत्ता ये, मत्पित्रा मत्पतेः पुरा ॥२३०॥
अथादिशन्नरानेष यात जानीत वेगतः ।
कस्यैतेऽश्वाः ? कुतस्त्या वा ? क्रेष्येऽमूनद्भुतद्युतीन् ॥२३१।
तदादेशाज्जवाद् गत्वा सर्वं ज्ञात्वा कुतोऽपि ते ।
समागत्य समाचख्युः स्वामिने नम्रमौलयः ॥२३२॥
**मङ्गलकलश**स्यैते वाजिनश्चित्तवाजिनः ।
**चम्पा**पूर्याः समानीता एतेनैव महात्मना ॥२३३॥
श्रुत्वैवं सोऽपि भूयोऽपि तान् प्रैषीन्मुदिताशयः ।
जानीताश्वपतिः किं स कुरुते ? कुत्र तिष्ठति ? ॥२३४॥
तेऽपि गत्वा तथा ज्ञात्वागत्य स्वस्वामिनोऽन्तिकम् ।
इत्याचख्युर्गृहासन्ने कलाभ्यासं करोति सः ॥२३५॥
अथ **चाम्पा**धिपश्चित्ते दध्याविति स एष सः ।
यो मे प्राणप्रियीभूय वासागारात्तदा ययौ ॥२३६॥
ध्यात्वैवं **सिंह**नृपतिं स प्रोचे तात ! वाजिनः ।
मया क्रेया अमी तावत्तत्त्वयैवं विधीयताम् ॥२३७॥
त्वया निमन्त्र्यतामत्र सच्छात्रः पाठकाग्रणीः ।
तथा तेन सहायाति **मङ्गलो**ऽप्यश्वनायकः ॥२३८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः समं पाठकेन मानयित्वा स **मङ्गलः** ।
लक्षयित्वा मनोभावं प्रार्थ्यते तार्क्ष्यपुङ्गवान् ॥२३९॥

**सिंहे**नापि ततः प्रातर्गत्वोपाध्यायपुङ्गवः ।
न्यमन्त्र्यत सहच्छात्र**श्चाम्पेशं** सोऽप्यमन्यत ॥२४०॥

अथोपाध्यायधूर्योऽपि सत्वरं तत्र जग्मिवान् ।
भूपभूरपि सन्मानं तस्यामानं च चकृवान् ॥२४१॥

**मङ्गलं** स्त्रीनरः प्रेक्ष्य त्रस्तः स्मरशरच्छिदः ।
मन्ये रोमाञ्चदम्भेन वर्म वर्ष्मणि पर्यधात् ॥२४२॥

विमुच्य **मङ्गलं** नारीनरश्छात्रानशेषतः ।
मान्योचितासनाशनवसनाद्यैरमानयत् ॥२४३॥

अतिमात्रं महाभक्त्या राजार्हैरासनादिभिः ।
मानयामास **मङ्गलकुम्भं चम्पा**धिपाङ्गभूः ॥२४४॥

तन्मानमद्भुतं दृष्ट्वा छात्रवर्गेऽतिदुःखिनि ।
अथाध्यापकधौरेयमूचे **त्रैलोक्यसुन्दरः** ॥२४५॥

छात्रेण केनचिद्विद्वन् ! कथां कथयतां भवान् ।
कलावानिव योऽमीषु कलयत्यखिलाः कलाः ॥२४६॥

छात्रैरथोचे सकलकलैः कश्मलिताशयैः ।
यस्येदृगादरः सैष कथां वः कथयिष्यति ॥२४७॥

विद्वदुक्तोऽवददथो **मङ्गलः** स्मेरिताननः ।
कल्पिताकल्पिततया कथा लब्धप्रथा द्विधा ॥२४८॥

किं कल्पिता कथा कथ्या ? कथ्यतां किमकल्पिता ? ।
**गुणसुन्दर**भूरूचे चेतसीति चमत्कृतः ॥२४९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मा मथ्यतां बहुतरं सा कथा कथ्यतां त्वया ।
स्वानुभूतेव या सत्या कल्पनाविकला च या ॥२५०॥
यया च श्रुतया मे स्यादिति चित्ते चमत्कृतिः ।
ते सत्यं मोदकाः स्युर्ये **विशाला**जलयोगजाः ॥२५१॥
श्रुत्वैवं **मङ्गलघट**श्चेतसीति व्यचिन्तयत् ।
अयं **चम्पा**धिपसुतः साकूतमिव जल्पति ॥२५२॥
तत्किमेष नृरूपेण सा कनी कमनीयरुक् ।
भाविनी ? या मया व्यूढा भाटकेन क्वचित्पुरे ॥२५३॥
ध्यात्वैवं वीक्ष्यते यावन्निभृतं तं वधूनरम् ।
सैवेति तावन्निश्चिक्ये **मङ्गलः** स विचारराट् ॥२५४॥
केनापि हेतुना मन्ये नृरूपीभूय भूपभूः ।
समाययौ तन्न जाने गहनं विधिवल्गितम् ॥२५५॥
किं विकल्पेन वा स्वेन स्फुटीभाव्यचिराददः ? ।
**धनाङ्ग**भूर्विचार्येति साकूतः स्वां कथां जगौ ॥२५६॥
दिव्यगीःश्रुतिमारभ्य मन्त्रिनिष्काशनावधेः ।
कथायां कथितायां स व्यरंसीद् **धनदत्त**भूः ॥२५७॥
आकर्ण्य भूपभूरेवमेवमूचे क्रुधेव सः ।
रे रे कोऽयमसम्बद्धभाषी धृष्टशिरोमणिः ? ॥२५८॥
धरतैनं किमस्माकममात्यं दूषयत्यसौ ? ।
किमेवं मम मन्त्री दुष्कुरुते विश्वगर्हितम् ? ॥२५९॥
धृते तत्र सहच्छात्रस्तस्यौकः प्राप्य पाठकः ।
साद्यन्तं पुत्रवृत्तान्तं तत् ताताय न्यवेदयत् ॥२६०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**धनदत्तो**ऽप्यथ श्रेष्ठी व्याकुलीभूतमानसः ।
उपादायाद्भुतं ढौकनकं राजकुलेऽचलत् ॥२६१॥

नीत्वा नारीनरेणाथ मालस्योपरि **मङ्गलः** ।
कण्ठीरवासने न्यस्य **सिंह**प्रत्यक्षमौच्यत ॥२६२॥

कान्त ! शान्तमनीभूय तदानायय वस्तु यत् ।
मदीयजनकस्तेऽदात् मङ्गलेषु विवर्त्तिषु ॥२६३॥

यथा तद्दर्शनात्**सिंहः** पितुर्मूर्त्त्यन्तरं मम ।
प्रत्येति तत्क्षणं किञ्च तल्लक्ष्माप्यपगच्छति ॥२६४॥

**मङ्गलो**ऽप्यूचिवानेवं यद्येवं **सिंह**भूपतिः ।
प्रेक्ष्यतां सदनेऽस्माकं यथा नयति वस्तु तत् ॥२६५॥

एवं कृते गतः **सिंह**स्तद्गृहं तत्पिताप्यथ ।
तस्यासनादिकां स्वेन प्रतिपत्तिमकल्पयत् ॥२६६॥

सोऽप्यूचे श्रेष्ठिनं यद् भो ! मा भैषीः शृणु सुश्रवम् ।
तवात्मजन्मा जामाताऽजन्येवं तत्सुखी भव ॥२६७॥

परं पुरा नराधीशाद्यत्त्वयावापि भूषणम् ।
भूपनामाङ्कितं किञ्च स्यन्दनाश्वादिकं च यत् ॥२६८॥

तद् विश्वं दर्श्यतां येन दर्शनेऽस्य महाशय ! ।
प्रत्येम्यहं भवत्पुत्रभूपपुत्र्योः करग्रहे ॥२६९॥

तथा कृते धनेनापि नृपनामाङ्कमद्भुतम् ।
निभालयन् भूषणादि प्रतीतः **सिंह**भूपतिः ॥२७०॥

संमान्य श्रेष्ठिना **सिंहः** प्रेषितः क्षितिभृद्भुवः ।
सर्वमाख्याय सद्भूतं तां स्त्रीवेषामकारयत् ॥२७१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**त्रैलोक्यसुन्दरी** स्वेन नेपथ्येन परिष्कृता ।
प्रपत्य पादयोः पत्युः प्राञ्जलिर्जल्पति स्म सा ॥२७२॥
तदा दम्भेन मां मुक्त्वागमस्त्वं जीवितेश्वरः ।
इदानीं तु कैतवेन केन यास्यसि ? जल्पताम् ॥२७३॥
**त्रैलोक्यसुन्दरी** रेजे तदा स्वेदाविलाकृतिः ।
वियोगतप्ता स्नातेव प्रियागमसरोवरे ॥२७४॥
कं कं रसं न साकम्पा **चाम्पा**पतिसुताऽभजत् ।
धृष्टतापत्रपाद्वैतविह्वलीकृतमानसा ॥२७५॥
अथ **मङ्गलकुम्भो**ऽपि बभाषे भास्वदाननः ।
तावदेवमभूद्दैवाद्दैवं कः खण्डयेद्वद ॥२७६॥
अतः परं प्रिये ! कार्यं सर्वमायतिसुन्दरम् ।
तद्विषादनिषादेन मात्मानं मलिनीकुरु ॥२७७॥
किञ्च ते ज्ञापनायास्मि तदानीमकिरं गिरम् ।
अमी स्युर्मोदकाः स्युश्चेद्**विशाला**नीरयोगजाः ॥२७८॥
स्थापयित्वा प्रियं तत्र तमनुज्ञाप्य च स्वयम् ।
कृत्वा नृवेषं नारेन्द्री सा नरेन्द्रान्तिकं ययौ ॥२७९॥
नत्वा यथोक्ते वृत्तान्ते तया प्रोक्ते नरेश्वरः ।
अहो कीदृगभूच्चित्रमिति चिन्तयति स्म सः ॥२८०॥
अहो मतिप्रपञ्चश्रीरस्याः शिशुमुखीपतेः ।
प्रापि व्यूढो यदनया पतिः पालितशीलया ॥२८१॥
अहो तस्य नृशंसत्वं मन्त्रिणः पापमन्त्रिणः ।
स्वामिस्त्रीद्रोहमध्यात्वा यदेनामकलङ्कयत् ॥२८२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सभाध्यक्षं नरेन्द्रस्तां सतीमुक्त्वादिदेश सः ।
स्वच्छे ! वत्से ! स्वभर्तारं भज त्यज भयं व्रज ॥२८३॥

इत्यादिश्य सुतीकृत्य भूषितीकृत्य भूषणैः ।
स्त्रीवेषीकृत्य नृपतिः प्रत्योकः प्रेषति स्म ताम् ॥२८४॥

**वैरिसिंह**क्षितिपतिर्**धन**मूचे वधूवरम् ।
स्वं मङ्गलाय नीत्वौकः प्रेषेस्तत्र पुनर्गृहे ॥२८५॥

यदिदं मन्दिरं माद्यदिन्दिरं ते तनुरुहः ।
मयार्पितं सपत्नीकस्तत्र भुङ्क्तामसौ चिरम् ॥२८६॥

भवत्वेवमिति प्रोच्य श्रेष्ठी नीत्वा वधूवरम् ।
स्वमन्दिरे विस्तरेण वर्धापनमकारयत् ॥२८७॥

दशाहादिमहापर्व कारयित्वा सविस्तरम् ।
श्रेष्ठी वधूवरं तत्र प्रेषयामास मन्दिरे ॥२८८॥

तत**स्त्रैलोक्यसुन्दर्या**देशतः **सिंह**भूपतिः ।
तत्तातसन्निधौ गत्वा वेषसैन्ये समार्पयत् ॥२८९॥

निःसुतस्त्वं किमित्यागा ? इति प्रोक्तः क्षमाभुजे ।
यथादृष्टं विस्तरतस्तं वृत्तान्तमचीकथत् ॥२९०॥

समाकर्ण्येति तनयामहिमानममानकम् ।
प्रमोदमेदुरमनाः क्ष्माभृदेवमचिन्तयत् ॥२९१॥

अहो ! चित्रमहो ! बुद्धिस्तस्या ब्रह्मण्यहो ! रतिः ।
अहो ! कलङ्कभीरुत्वमहो ! भक्तिः स्वभर्त्तरि ॥२९२॥

विचिन्त्यैवं नरेन्द्रस्तां **सिंहे**न वरसंयुताम् ।
**उज्जयिन्याः** समानाय्य स्वनगर्यामवीविशत् ॥२९३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पृथ्वीभृन्मिथुनं वीक्ष्य तत्कामरतिसन्निभम् ।
दध्यावुग्रमतिर्मन्त्री कथमेतद् व्ययोजयत् ? ॥२९४॥
धिक्तं निस्त्रिंशमूर्धन्यं निष्कलङ्ककलङ्किनम् ।
स्वस्वामिद्रोहिणं धिक्तं दुष्टमृष्टं हृदास्ययोः ॥२९५॥
अथो नृनाथो रोषान्धः **सिंह**भूपं समादिशत् ।
मारयामुं समारुह्य मन्त्रिणं मा विलम्ब्यताम् ॥२९६॥
ससैन्यः स गलद्दैन्यस्तद्वधाय **मृगाधिपः** ।
यावच्चचाल **कलश**स्तावद् भूपं व्यजिज्ञपत् ॥२९७॥
देव ! मेऽसौ पितृसमः सचिवस्तत्प्रसद्य नः ।
मुञ्चैनं मा वधीः किञ्च यथास्थित्यास्तु सुस्थितः ॥२९८॥
भूपः सुतापतेस्तेन चरितेन चमत्कृतः ।
तथा चक्रेऽखिलं येन नान्यथा महतां मनः ॥२९९॥
ससामन्तः ससचिवः सान्तपुरपरिच्छदः ।
तदा सपौरः क्षितिभृद्वर्धापनमकारयत् ॥३००॥
अथो नृपानायिताभ्यां पितृभ्यां सह **मङ्गलः** ।
तत्रास्थात् पुरि सौख्येन सप्रियः सपरिच्छदः ॥३०१॥
कियत्यपि गते काले निष्पुत्रः पार्थिवोऽपि तम् ।
सामन्तामात्यमन्त्रेण **मङ्गलं** स्वे पदे न्यधात् ॥३०२॥
ततः श्रीशीलभद्रस्य **यशोभद्र**स्य सद्गुरोः ।
स्वयं धराधराधीशः सन्निधौ व्रतमग्रहीत् ॥३०३॥
प्रलीनपापधीः पुण्यलीनधीर्गुरुणा समम् ।
प्रभञ्जन इवाशासु विश्वासु विजहार सः ॥३०४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वाराज्यमिव साम्राज्यं भूगतं भूरिभूतिभिः ।
भुञ्जानस्य ययौ कालः कियान्**मङ्गल**भूभुजः ॥३०५॥

विदित्वा वणिगित्येष तं प्रत्यन्तक्षितीश्वराः ।
तद्राज्यग्रहणायायुर्मिलित्वा भूरिभिर्बलैः ॥३०६॥

भूभृन्**मङ्गलकलश**स्तानवेत्य समायतः ।
अभ्येत्य तैः समं युद्धमारेभे भैरवाकृतिः ॥३०७॥

विजित्य तानरीनेष वशीकृत्य समन्ततः ।
विससर्ज स्वराज्येषु महान्तो नम्रवत्सलाः ॥३०८॥

एत्य **चम्पा**पते**श्चम्पापुरीं** पालयतः सतः ।
**जयशेखर**नामाभूदङ्गजः क्ष्मावनीगजः ॥३०९॥

**त्रैलोक्यसुन्दरी** सोमं सूनुमालोक्य मुद्वती ।
क्वचिन्न माति वेलेव क्षीरनीरनिधेः क्षितौ ॥३१०॥

सीत्कृतिजातः किलकिलकलरवरुचिरश्चिरं हसितः हंसः ।
सुतमुखकमले विलसन् कयापि यदि पुण्यया दृश्यः ॥३११॥ आर्या० ।

मातुरुल्लापनगिरां गुणनीकर्मकोविदः ।
निर्नामताम्बुधौ मज्जत्कुलनौनङ्गरः सुतः ॥३१२॥

अथोद्यानेऽन्यदायातं **जयसिंह**महामुनिम् ।
विदित्वा वनपालेभ्यः प्रणन्तुं भूपतिर्ययौ ॥३१३॥

निषसाद प्रणम्यैनं प्रसादविशदाननः ।
स श्रोतुं तद्घनध्वानमुत्कण्ठी नीलकण्ठवत् ॥३१४॥

महामुनिरपि प्रेक्ष्य तां सभां वासनावतीम् ।
विदधे विधिना ध्वान्तध्वंसनां धर्मदेशनाम् ॥३१५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समस्ताशिवमूर्द्धोर्ध्वं शम्पासम्पातसोदरः ।
सम्पत्तिराजीराजीववनीराजीविनीश्वरः ॥३१६॥
कुकर्मणां मर्मभेदी श्रीहर्म्यं सर्वशर्मणाम् ।
भुक्तिमुक्तिकलाकेलिवनं विजयतां वृषः ॥३१७॥ युग्मम् ॥
कलङ्कविघ्नविकलं फलत्येव फलं वृषः ।
स्वया श्रियार्ज्यते यदि निर्व्याजमनसाङ्गिना ॥३१८॥
वृषं वितनुते भृत्या यः श्रिया परकीयया ।
भवेत्तस्य भवेऽन्यस्मिन् सम्पल्लाञ्छनविघ्नयुक् ॥३१९॥
प्रस्तावे पृथ्वीशोऽथ प्रणम्यावोचत प्रभुम् ।
मुनेऽस्मि कर्मतः कस्मादभुवं सुखदुःखभूः ॥३२०॥
देवी च कर्मणा केन विभो ! विध्वस्तशर्मणा ।
पात्रमीदृक्कलङ्कस्याजनि पात्रमपि श्रियः ॥३२१॥
निशम्य तद्वचोऽवोचत्तरां प्रतिवचो मुनिः ।
आकर्ण्यतामात्मपृष्टमवधाय धराधव ! ॥३२२॥
अस्तीह **भरत**क्षेत्रे समग्रनगरोत्तरम् ।
**क्षितिप्रतिष्ठितं** नाम लक्ष्मीधाम महापुरम् ॥३२३॥
**श्रीदेवी**दयितस्तत्र **सोमचन्द्रा**ख्यया क्षितौ ।
विख्यातः कुलपुत्रोऽभूद् धर्मकर्मकलाद्भुतः ॥३२४॥
**श्रीदेवी** निजनाथस्य सदाचाराच्युतस्थितेः ।
भक्तिप्राग्भारतो नित्यं पादसन्निधिभागभूत् ॥३२५॥
तत्रैव नगरे किञ्च **जिनदेवो**ऽप्यभून्नरः ।
यः स त्यागदयायुक्तः सदा सच्चक्रनन्दकः ॥३२६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यथार्थनाम्ना तेनास्य **सोमचन्द्रस्य** धीमतः ।
बभूव मैत्री मैत्र्यादिगुणराजिविराजिना ॥३२७॥
याति काले तयोरेवं सख्यसङ्केतसद्मनोः ।
अन्यदा जिनदेवेन निशाशेषे व्यचिन्त्यत ॥३२८॥
सर्वार्थकारिणी सर्वानर्थसार्थनिवारिणी ।
लक्ष्मीर्लोके स्यात्तेनास्याः कार्यं यत्नादुपार्जनम् ॥३२९॥
श्रिया जगन्ति जीवन्ति न तु जीवन्ति जीवितात् ।
जीवन्त्यपि मृतायन्ते तया मुक्तानि तानि तत् ॥३३०॥
रमारसायनं यस्य प्रयोगे पूर्वपूरुषाः ।
मृता जीवन्ति जीवन्तः पुनः स्युः कीर्त्तिपीवराः ॥३३१॥
लक्ष्मीरसायनाभावे ये मृताः खलु ते मृताः ।
ये जीवन्ति पुनस्ते स्युर्जीवन्मृतसहोदराः ॥३३२॥
पूर्वेषामस्ति मे सम्पत्परं स्तोका ततस्ततः ।
क्रियमाणे व्यये दौस्थ्यं झगित्येव विजृम्भते ॥३३३॥
दौस्थ्ये च सति सीदन्ति पुमर्थाः स्वस्य सर्वतः ।
स्वजनाश्च वियुज्यन्ते हसन्ति च खलादयः ॥३३४॥
तस्माद्देशान्तरं गत्वा सत्त्वालम्बी श्रियोऽद्भुताः ।
उपार्ज्यागत्य सर्वेषां पूरयिष्ये मनोरथान् ॥३३५॥
दध्यौ भूयोऽपि मे देशान्तरं प्राप्तस्य चेन्मृतिः ।
जायते जायते तन्मे परलोकेऽधमा गतिः ॥३३६॥
तदस्मि दापयिस्यामि पश्चाद्दानं वयस्यतः ।
यथा मे जायते जन्म परलोकेऽतिनिर्मलम् ॥३३७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ध्यात्वैवं दशदीनारसहस्रीं सुहृदः करे ।
सोऽर्पयित्वाऽवददिमं द्वितीयं मम हृद् भवान् ॥३३८॥
दीनारास्तदमी देयास्त्वया धर्माय मे सखे ! ।
श्रियोऽर्जनाय यास्यामि देशान्तरमहं पुनः ॥३३९॥
किञ्चास्य दानपुण्यस्य षष्ठांशस्त इति ब्रुवन् ।
**जिनदेवो** ययौ देशान्तरमर्जयितुं श्रियः ॥३४०॥
तन्मित्रं **सोमचन्द्रो**ऽपि गतेऽमुष्मिन् महामनाः ।
सुपात्रेषु सुमित्रस्य शश्राण श्रेयसे श्रियम् ॥३४१॥
वासनावासितमनाः परकीयामपि श्रियम् ।
स ददानः सपत्नीकः समभूदतिपुण्यभूः ॥३४२॥
अप्यन्यसम्पदां दाता प्रपापालकवज्जनः ।
याच्यतेऽञ्जलिमायोज्य कटरे दानवल्गितम् ॥३४३॥
**सोमचन्द्र**कलत्रस्य **श्रीदेव्या** अपरेद्यवि ।
रहस्येवं समाचख्ये **भद्रा**ह्वयवयस्यया ॥३४४॥
यन्मे पतिर्विरक्तोऽभून्न जाने हेतुतः कुतः ।
साऽपि स्मित्वा ततः प्रोचे दूरं मे व्रज दृक्पथात् ॥३४५॥
यस्मादिह भवद्दोषः सुपोषः कोऽपि भाव्यते ।
श्रुत्वैवं न रतिः क्वापि **भद्र**यावापि दुःखतः ॥३४६॥
**श्रीदेव्या** दुःखिनी **भद्रा** स्मित्वा भूयोऽप्यभाष्यत ।
मा दुःखं कुरु हास्येन मयावादीदृशं वचः ॥३४७॥
कर्मजन्मा न कस्येह दोषपोषः प्रगल्भते ।
सुकृतं दुष्कृतं किञ्च स्वकृतं येन भुज्यते ॥३४८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परं स्मितकृतेनापि वचसालविकासिना ।
बद्धं कर्म तयात्यन्तदुःसहं धिगपि स्मितम् ॥३४९॥

इतश्चात्रैव नगरे पञ्च दुर्दान्तपूरुषाः ।
**मदना**वेश्यया साकमुद्यानमगुरन्यदा ॥३५०॥

अमीषां क्रीडतां तत्र वार्तावर्त्तेत्यजृम्भत ।
न **सोमचन्द्रश्रीदेव्यौ** शीलाच्चाल्यौ सुरैरपि ॥३५१॥

**कामाङ्कुर**स्तदावादीत् तन्मध्यादेकपूरुषः ।
**श्रीदेवीं** चालयिष्यामि शीलाल्लीलायितैर्निजैः ॥३५२॥

शीलः क्षितितले तावदलचञ्चलचक्षुषाम् ।
न मे लीलायितं यावद्दम्भोलिरिव खेलति ॥३५३॥

घनमालेव गर्जन्ती **मदना**पि तदावदत् ।
**सौमचन्द्रीं** शीलकान्तिं क्लान्तिं नेष्येऽस्म्यपि क्षणात् ॥३५४॥

अथ **कामाङ्कुरः सोमचन्द्रं** ज्ञात्वा क्वचिद् गतम् ।
गत्वा तदीयमावासं **श्रीदेवी**मित्यवोचत ॥३५५॥

**श्रीदेवि** ! देहि मे स्वान्ताभिप्रेतं प्रणतात्मनः ।
साऽप्यूचे किं तवाभीष्टं जल्पतां येन पूर्यते ॥३५६॥

**कामाङ्कुरो**ऽवददिदं स्वाङ्गसङ्गमवारिभिः ।
विध्याप्य स्मरतापं मां विधेहि प्रीतिपत्रलम् ॥३५७॥

पुरुषब्रुव ! मा ब्रूहि विरूपमिदमीदृशम् ।
व्रज त्यज मम दृशोः पथं सत्पथमुत्सृजन् ॥३५८॥

राजापि त्यज्यते स्त्रीभिः सुशीलाभिः सुदूरतः ।
किं वाच्यं मर्त्यमात्रस्य परीहारे महीतले ॥३५९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वारिबिम्बच्छलान्नन्तुरपि राज्ञः सुधामुचः ।
असंमुखीनविरहे कटरे नलिनीसती ॥३६०॥

भानौ भर्तरि भूषितान्यभुवने पङ्केजिनी तत्क्षणात्,
व्यामीलन्नलिनाननास्तविलसच्चक्रद्वयीकुण्डला ।
श्रीराजेऽपि नवोदयेऽनभिमुखी लुप्तालिकेशावलि-
वैंधव्यव्रतसूचिनीं शुचितरज्योत्स्नाङ्गिकां पर्यधात् ॥३६१ ॥ शार्दूलवि० ॥

अयाति तत्र दुर्जातिमुकुटे नष्टतोत्कटे ।
**श्रीदेवी** शीलरक्षाय सा पूत्कर्तुं प्रचक्रमे ॥३६२॥

अथ भूपभयाशङ्की स कलङ्की निकेतनात् ।
निर्गत्यागत्य मित्रेभ्यस्तमुदन्तमचीकथत् ॥३६३॥

इतश्च **मदना** कूटघटनापटिमाश्रयः ।
सन्ध्यायां **सोमचन्द्रं** सा स्वालयं यान्तमैक्षत ॥३६४॥

सा ततस्तान् नरानन्तर्वणं गुप्तमधारयत् ।
स्वयं च सत्वरं गोत्राङ्गनानेपथ्यमाधरत् ॥३६५॥

समीपमेत्य वेगेन **सोमचन्द्र**मभाषत ।
भवन्तं भद्र ! मद्भर्त्ताह्वयतेऽन्तर्वणं स्थितः ॥३६६॥

ततः सरलधीः सोमः काननं यावदीयिवान् ।
न ददर्श पतिं तावत् तस्याः शस्याकृतेः कृती ॥३६७॥

किमेतदिति तं **सोमं** ध्यायन्तं साभ्यधात् तदा ।
स्मरः शरैर्मां भेत्ताऽभूद् यदा ह्यसि मयेक्षितः ॥३६८॥

तत्तूणामिव कामेन म्रियमाणां शितैः शरैः ।
मां रक्ष रक्ष येन त्वमेतद्रक्षणदक्षिणः ॥३६९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शल्यायमाना याः सन्ति मद्देहे स्मरभल्लयः ।
कान्तायस्कान्तमणिवत् ताः समाकृष सङ्गमात् ॥३७०॥
अथोचे **सोमचन्द्र**स्तां किं कुवृत्त्या कलङ्क्यते ।
निष्कलङ्कं कुलं स्वीयं मदीयं च महाशये ! ॥३७१॥
**मदनो**चे मा स्म वादीरीदृक् सम्बोधनावचः ।
तवोपरि मृतैवास्मि यदीदृग् न करिष्यसि ॥३७२॥
अवादीदिति **सोमो**ऽपि यद्येवं तर्हि मां मृतम् ।
स्वस्याग्रतोऽपि जानीहीत्युक्त्वा सोऽसिं समाकृषत् ॥३७३॥
समारेभे सरभसं स यावन्मस्तकच्छिदम् ।
तावत् तया करे धृत्वा सैवमूचे महामतिः ॥३७४॥
**मदना**नामधीधामवेश्याहमिति विद्धि माम् ।
तवास्मि क्षोभणायागां न क्षुब्धोऽसि क्षमस्व मे ॥३७५॥
इत्युक्त्वा सा जगाम स्वकामिनामन्तिके जवात् ।
**सोमचन्द्रो**ऽपि धाम स्वं त्रपावनमदाननः ॥३७६॥
शीलश्रीसान्द्रयोरेवं **श्रीदेवीसोमचन्द्रयोः** ।
मिथः स्नेहेन सद्धर्मकर्मकर्मठयोस्तयोः ॥३७७॥
जिनोपदेशरतयोर्वासनावासिचित्तयोः ।
सम्यगाराधनापूर्वमवसानमजायत ॥३७८॥ युग्मम् ॥
विपद्य प्रथमं कल्पं तौ प्रपद्य सुरश्रियम् ।
मनःप्रियां पञ्चपल्लीं बुभुजाते सुखश्रियम् ॥३७९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सोमचन्द्र**स्ततश्च्युत्वा नृचन्द्र ! त्वमभून्नृपः ।
**श्रीदेवी** भवतश्चाभूद् देवी **त्रैलोक्यसुन्दरी** ॥३८०॥
भवतान्यभवे भाग्यभूतिः परविभूतिभिः ।
यदार्जि स्फूर्जितात् तस्य तवासौ भूतिपत्न्यभूत् ॥३८१॥
तदा तदालं यद्देव्या स्मितेनोक्तं सखीं प्रति ।
जवादुत्तारितं यत्तु तस्येदृक् कर्मणः फलम् ॥३८२॥
देव्या अपि कलङ्कस्य भवनाभवने तदा ।
यदभूतां महीनाथ ! प्रत्यक्षं तत् तवाप्यदः ॥३८३॥
परिपूर्णं पर्यपालि शीलं शालिगुणालि यत् ।
तत्फलं विद्धि धात्रीश ! पुनर्वां सङ्गमोऽद्भुतः ॥३८४॥
श्रुत्वैवं **मङ्गलघट**देव्यौ मूर्च्छान्निपेततुः ।
प्राग्भवं पाणिस्थमिव तेन सस्मरतुश्च तौ ॥३८५॥
चन्दनाद्यैरुपचारैराश्वस्योत्थाय दध्यतुः ।
कीदृक् फलमनल्पीयोऽभूदल्पस्यापि कर्मणः ॥३८६॥
यद्वा विषयलवस्यापि कर्म मारणमद्भुतम् ।
अपि वह्निस्फुलिङ्गस्य कर्म दाहकमद्भुतम् ॥३८७॥
गृहस्थतां पालयतोर्यदीदृग् नौ व्यजृम्भत ।
तन्न जानीवहे यन्नौ भावि राज्यं प्रशासतोः ॥३८८॥
तन्मोक्ष्यतेऽवनीराज्यं दीक्षाराज्यं ग्रहीष्यते ।
सप्ताङ्गं पूर्वमवरं द्वादशाङ्गं परं वरम् ॥३८९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ध्यात्वैवं तौ सुतं राज्ये न्यस्य शस्यतमाशयौ ।
दत्त्वा दानं गुरोस्तस्य पार्श्वे जगृहतुर्व्रतम् ॥३९०॥
अधीतपूर्वी सिद्धान्ते सकले **कलशः** सुधीः ।
सूरिणा स्वे पदे न्यस्तश्चिरं व्रतमपालयत् ॥३९१॥
मृत्त्वानशनपूर्वं च **ब्रह्मलोके** सुरोऽजनि ।
**त्रैलोक्यसुन्दरी** चापि मृत्वाऽत्रैव सुरोऽजनि ॥३९२॥
ततश्च्युतौ नरीभूय यास्यतस्तौ सुरालयम् ।
भूयोऽपि मानवीभूय यास्यतस्तौ शिवालयम् ॥३९३॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ३. श्रीविनयचन्द्रसूरिविरचितम्
# मङ्गलकलशकथानकम् ॥

अस्यैव जम्बूद्वीपस्य, मुख्यस्य मुखमण्डने ।
**अवन्ती** नाम नगरी, जयन्ती स्वःपुरीं श्रिया ॥१॥
**वैरिसिंहो** नृपस्तत्र, वैरिवारणदारुणः ।
देवी सोमानना तस्य, **सोमचन्द्रे**ति विश्रुता ॥२॥
**धनदत्ता**भिधस्तत्र, श्रेष्ठी श्रीद इव श्रिया ।
**सत्यभामा** प्रिया तस्य, सती शान्ता त्रपावती ॥३॥
अन्येद्युरपनिद्रोऽसौ, सुमना क्षणदाऽत्यये ।
इति ध्यातुं समारेभे, चिन्तासन्ताननाटकम् ॥४॥
गृहवित्तानुमानेन, मया त्यागः कृतोर्थिषु ।
राजप्रसादादभवं, समस्तजातिमण्डनम् ॥५॥
एतन्ममास्ति निःशेषं, सफलं पुण्ययोगतः ।
परं कुलसरोहंसो, नास्ति सूनुः प्रशस्तधीः ॥६॥
यथा वृष्टिं विना सस्यं, यथा मूलं विना तरुः ।
यथा गुरुं विना विद्या, यथा धर्मो दयां विना ॥७॥
यथा ज्ञानं विना तत्त्वं, यथा नीतिं विना धनम् ।
तथैधते विना पुत्रं, न कुलं चन्द्रनिर्मलम् ॥८॥ युग्मम् ॥
को नाम नायको भावी, सगुणो मे कुलश्रियः ।
यदाधारे स्फुरन्त्युच्चैः मुक्तास्त्रासविवर्जिताः ॥९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आशावल्लीलसद्वंशो, गोत्रस्त्रीपाणिदर्पणः ।
शरणं वार्द्धके प्राप्ते, नन्दनो गात्रचन्दनः ॥१०॥

इति चिन्तानिशाचर्या, ग्रस्यमानं विलोक्य तम् ।
अभाषिष्ट वचश्चारु, **सत्यभामा** मिताक्षरम् ॥११॥

निःश्वासधमनीयोगाच्चिन्तासन्तानकाञ्चनम् ।
ताप्यमानं मनो मूषासङ्गे विज्ञायते मया ॥१२॥

स्वामिन् ! मलिनिता केयं, तव वक्त्रे प्रसर्प्पति ? ।
हृदि काष्ठोद्भवस्योच्चैश्चिन्ताग्नेर्धूमपङ्क्तिवत् ॥१३॥

अपमानं कृतं केन ? किमु प्राणाधिदैवत ! ।
किमाऽऽज्ञाखण्डनं स्नेहान्मादृशैर्विहितं तव ? ॥१४॥

सोऽप्यूचे पृथिवीपालप्रसादादपमाननम् ।
मम कर्तुं सुरेन्द्रोऽपि, नालमन्येषु का कथा ? ॥१५॥

मित्रं मन्त्री, प्रियो बन्धुस्त्वमेव मम जीवितम् ।
त्वत्कृतं खण्डनं शङ्के, किमाज्ञायाः सुलोचने ! ॥१६॥

**सत्यभामा** पुनः स्माह, स्थितं सौख्येतरं हृदि ।
गोपायसे कथं नाथ ! वचनैरतिपेशलैः ? ॥१७॥

नाथ ! दुःखार्णवे मग्नमिव चित्तं तवेक्षते ।
वृत्तान्तकथनेनाशु, संविभागं प्रयच्छ मे ॥१८॥

अथ श्रेष्ठीत्यभाषिष्ट, यद्दुःखमधिकं मम ।
सत्यमेतत्कलत्रादौ, कथितं हि लघूभवेत् ॥१९॥

दृष्ट्वा स्तनंधयानङ्के, पित्रोरुल्लापतत्परान् ।
मच्चित्तं कौतुकाऽऽकृष्टं, दुःखमावहते भृशम् ॥२०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पतिव्रतेऽन्तरायोऽस्ति, किञ्चित्कर्म पुरातनम् ।
सुता येन न जायन्ते, मनोरथकथाऽधिपाः ॥२१॥
उवाच **सत्यभामे**श ! खिद्यसेऽत्र कथं मुधा ।
सुकरे कर्मणि प्रायः, खेदं भजति मूढधीः ॥२२॥
परिणीतासु चान्यासु, कन्यासु तनयास्तव ।
बहवोऽपि भविष्यन्ति, मौक्तिकानीव शुक्तिषु ॥२३॥
अवादी**त्सत्यभामां** स, चारु नो भाषितं त्वया ।
त्वां विना गृहिणी नान्या, भवेदत्र भवे मम ॥२४॥
त्वदङ्गसम्भवाः पुत्राः, प्रीणयन्ति मनो मम ।
तृष्णार्त्तं चातकमिव, घनस्यादिमबिन्दवः ॥२५॥
कथ्यतां मम पुत्रार्थमुपायः कोऽपि वल्लभे ! ।
यतेऽहं येन भावेनोपायादर्थः प्रसिद्ध्यति ॥२६॥
साऽप्यूचे देव ! यद्येवं, देवं पूजय तीर्थपम् ।
देहि दीनेषु सद्दानं, पात्राऽपात्रविचारणात् ॥२७॥
श्रुत्वेति श्रेष्ठिपुन्नाग, स चकार जिनार्चनाम् ।
चमत्कारि ददौ दानं, श्रद्धया दययाऽनिशम् ॥२८॥
अस्य प्रकृष्टया धर्मचेष्टया शासनेश्वरी ।
रञ्जिता वाञ्छितं तस्य, यथाकाममशिश्रिणत् ॥२९॥
साऽथ गर्भावतारस्य, निशायां सुखशायिनी ।
स्रग्भिः श्रीभिरिवाकीर्ण्णं, कामकुम्भं व्यलोकत ॥३०॥
स स्वप्नः प्रातरुत्थाय, कान्ताय कथितस्तया ।
स निशम्येदमाचख्यौ, प्रिये ! भावी सुतस्तव ॥३१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साऽसूत समये सूनुं, श्रेष्ठी स्वप्नानुसारतः ।
सुनोर्**मङ्गलकलश,** इत्याख्यामुत्सवे व्यधात् ॥३२॥
लाल्यमानः सधात्रीभिः, वर्द्धमानो दिने दिने ।
अष्टवत्सरदेशीयो, जज्ञे पितृमनोरथैः ॥३३॥
प्रातः श्रेष्ठी स्वयं याति, जिनानामर्चनाकृते ।
पुष्पादिकं समानेतुं, मलये तरुमालिनि ॥३४॥
पित्रा निषिद्ध्यमानोऽपि, परेद्युः श्रेष्ठिनन्दनः ।
पुष्पवाट्यां जगामासौ, बाल्ये चापल्यमद्भुतम् ॥३५॥
तं बालं **धनदत्तस्य,** ज्ञात्वा मलयकस्ततः ।
अप्रीणात् फलसन्दोहैः, पूज्या हि धनिनन्दनाः ॥३६॥
गृहमेधी ततो गेहमागत्य जगतां पतेः ।
अर्चां रचितवानेष, सोऽपि पुष्पाद्यमार्प्पयत् ॥३७॥
एतन्नित्यं वितन्वानोऽन्येद्युस्तातं व्यजिज्ञपत् ।
अहमेव समानेष्ये, पुष्पादि मलयान्ननु ॥३८॥
**धनदत्तो**ऽपि तं मेने, विनयं तनुजन्मनः ।
विनीतानां हि विज्ञप्तं को नाम नहि मन्यते ? ॥३९॥
अन्येद्यु**र्धनदत्तो**ऽथ, मालिकं प्रत्यभाषत ।
अस्य बालस्य सस्नेहं, सारा कार्या दिवानिशम् ॥४०॥
मया प्रहरके मुक्तस्त्वदीये त्वेष बालकः ।
अर्प्पणीयं मनोहारि, पुष्पादिकमतः परम् ॥४१॥
इत्युक्तं श्रेष्ठिनः श्रेष्ठं, मालिकस्तत् तथाऽकरोत् ।
सदाऽऽदिष्टप्रसादा हि, भवन्ति किल सेवकाः ॥४२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

किञ्चित् किञ्चत् कलाभ्यासं, **कलशस्य** वितन्वतः ।
आनन्दोद्रेकसम्पूर्णा, भूयांसो वासरा ययुः ॥४३॥
इत**श्चम्पापुरी** रम्या, कृताऽऽकम्पाऽलकाश्रियः ।
द्विधापि नामधामभ्यां, तत्र राड् **गुणसुन्दरः** ॥४४॥
**गुणावली** प्रिया तस्य, तयो**स्त्रैलोक्यसुन्दरी** ।
पुत्री कल्पलतास्वप्नसूचिताऽजनि सन्मनाः ॥४५॥
कुमारीं यौवनोद्यान-करिणीमवलोक्य ताम् ।
अन्वेष्टुं वरपुन्नागान्, मनश्चक्रे क्षमापतिः ॥४६॥
सामन्तो मन्त्रिपुत्रो वा, चक्रवर्तिसुतोऽथवा ।
खेचरः क्षितिचारी च, वा कोऽमुष्याः भविष्यति ? ॥४७॥
ध्यात्वेति भूपतिः स्माऽऽह, हंहो सभ्या ! महाधियः ।
पुत्रीयोग्यो वरः कोऽपि, श्रुतो दृष्टोऽथवोच्यताम् ॥४८॥
अथोचुस्ते महीपालमभयो नः प्रदीयताम् ।
अस्मन्मतितरी युष्मच्चिन्ताम्भोधौ तरत्वलम् ॥४९॥
आमेत्युक्ते नरेन्द्रेणाऽभ्यधुः सभ्या महाधियः ।
देवाऽस्ति भवतामेका, पुत्री पुत्र इव प्रिया ॥५०॥
तन्नो न स्वदते कर्तुं दूरे वैवाहिकीं क्रियाम् ।
एतत् तुल्यो वरः कोऽपि, श्रुतो दृष्टो न हि क्वचित् ॥५१॥
तदाऽऽत्ममन्त्रिपुत्राय, पवित्राय गुणोत्करैः ।
भवता दीयतां पुत्री, सुखेन स्थीयतां चिरम् ॥५२॥
आमेति प्रतिपद्योच्चैर्भूपतिः सदसि स्थितः ।
समक्षं सर्वलोकानाममात्यमिदमब्रवीत् ॥५३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

त्वत्पुत्राय मया पुत्री, दत्ता **त्रैलोक्यसुन्दरी** ।
उत्सुक्यो भव सद्बुद्धे ! विवाहक्षणकर्मणि ॥५४॥
विज्ञाय दूषितं रोगनिर्मोकेन स्वनन्दनम् ।
कापट्योत्तरमकरोदिदं सचिवपुङ्गवः ॥५५॥
क्व भवान् जगतीनाथ ! ? क्व चाहं तव कर्मकृत् ? ।
क्व पुत्री भवतो रम्भा-ऽनुकाराऽनुपमश्रिया ? ॥५६॥
क्व च मे नन्दनः सर्वैर्न्यूनः स्थैर्यादिभिर्गुणैः ।
स्वर्णपित्तलयोर्योगो, न कदापि हृदो मुदे ॥५७॥
अपरं तव पर्णेषु, चूर्णं दातुमपि क्षमः ।
नाऽस्म्यहं जगतीनाथ ! का वार्तोद्वाहमङ्गले ? ॥५८॥
नरेशस्तं करे धृत्वा, स्मितपूर्वमवोचत ।
कृतज्ञ ! सचिवावश्यमत्रार्थे मा वदः परम् ॥५९॥
आमेति सचिवः प्रोच्य, गत्वा निजनिकेतनम् ।
ऊरीकृत्य तपो गोत्रदेवीमाराधयत्तराम् ॥६०॥
स तथा विदधे भोगं, कर्पूराऽगुरुचन्दनैः ।
स तथा चक्रिवान् भूरि, तपः प्रकृतिदुस्तपम् ॥६१॥
स तथा वासनां शुद्धां, भूयो भूयो व्यवर्द्धत ।
गोत्रदेवी यथा स्माऽऽह, सन्तुष्टाऽस्मीति तत्पुरः ॥६२॥ युग्मम् ॥
मन्त्र्यूचे देवि ! तुष्टा चेत्, कुरूल्लाघं ममात्मजम् ।
साऽप्यूचे सूनुना जन्मभोग्य एव महाऽऽमयः ॥६३॥
तस्याऽपनयने भद्र !, समर्था नास्मि सर्वथा ।
बन्धो निकाचितो यस्मात्, वेद्यस्तीर्थङ्करैरपि ॥६४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सविषादोऽवदन्मन्त्री यद्येवं देवि ! तत्परम् ।
नरमानय यः कन्यां, भाटकेनोपयच्छते ॥६५॥
हस्ते कृत्य सुतां राज्ञः, समर्प्य मम नन्दने ।
यथा प्रयाति तद्ब्रूहि, वरं मम मनोहरम् ॥६६॥
भूयोऽप्युवाच सा देवी, प्रयुज्याऽवधिवैभवम् ।
यः कश्चन बहिः पुर्याः, शीतार्तोऽभ्येति बालकः ॥६७॥
स युष्मन्मन्दुरारक्षैर्दक्षैरग्नेष्टिकास्थितैः ।
तपद्भिः छन्नमानेय, इत्युक्त्वा देव्यगान्नभः ॥६८॥
आहूय मन्दुरारक्षानमात्य इदमब्रवीत् ।
तपतां भवतां वह्नौ, योऽभ्येति निशि बालकः ॥६९॥
स मेऽन्तिकं समानयेस्तृतीयेऽह्नि दिनादतः ।
इत्याऽऽदिश्य च तान् मन्त्री, विससर्ज दिवात्यये ॥७०॥
विज्ञायाऽवधिना पुत्रीयोग्यं **मङ्गल**मद्भुतम् ।
**अवन्त्या**मगमद् देवी, तमारामस्थमैक्षत ॥७१॥
मध्येव्योम ततः स्थित्वा, देव्यवादीदिति स्फुटम् ।
सुतः सैष कुमारीं यो, भाटकेनोपयंस्यते ॥७२॥
**मङ्गलो**ऽपि निशम्येदं, मानसे ध्यातवानिति ।
किमपूर्वमिदं व्योम्नि, श्रूयते देवतोदितम् ॥७३॥
भवताद्वप्तुराऽऽख्यास्ये, विचिन्त्येति गृहं गतः ।
तत्सर्वं व्यस्मरत् तस्य, नान्यथा भवितव्यता ॥७४॥
द्वितीयेऽपि दिने श्रुत्वा, तन्नाऽऽख्यदसको पितुः ।
उद्यानाद्यावदभ्येति, तावद् वायुर्ववौ दिवि ॥७५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वातेन तेन जातेनोत्पाट्य तृतीयके दिने ।
**चम्पाया** निकटाऽटव्यां, व्यमोचि श्रेष्ठिनन्दनः ॥७६॥

मुक्तमात्रः स तत्राथ, पालीतालीजलाविलम् ।
वेल्लत्कमलिनीखण्डं, स ददर्श महासरः ॥७७॥

सुधारसरसं हारि, वारि पाणिपुटात्पपौ ।
वटं पालीकिरीटाभमारुरोह, झटित्यसौ ॥७८॥

इतश्च सविताऽऽरूढः, प्रतीचिनाऽद्रिचूलिकाम् ।
तद्दुःखमक्षमो द्रष्टुं, मित्रे हि घटतेऽखिलम् ॥७९॥

**कलशो** वटमारूढो, दिशां जालं विलोकयन् ।
उदीच्यां दिश्यवैक्षिष्ट, प्रज्वलन्तं हविर्भुजम् ॥८०॥

किञ्चिद्विलीनशोकोऽसौ, निरीक्ष्योत्त्तीर्य च क्षणात् ।
मन्दुरारक्षकाऽभ्यर्णे, ययौ शीतार्तविग्रहः ॥८१॥

वीक्ष्य तैरश्वपालैः स, तापितः पावकार्चिषि ।
सहास्यं यामिनीं सर्वां स्फीतशीतामवाहयत् ॥८२॥

विभातायां विभावर्यां, ते सर्वे वाजिपालकाः ।
वायहन्तो हयानुच्चैर्दूराद्दूरतरं ययुः ॥८३॥

अथ तेषु प्रयातेषु, प्रगे मन्त्री कथञ्चन ।
संगोप्य बालकं गेहं, निन्ये लब्धनिधानवत् ॥८४॥

स स्वयं स्नानभोगादि, छन्नं छन्नमकारयत् ।
निर्गच्छन्तं बहिर्गेहाज्जवादेनं न्यवर्त्तयत् ॥८५॥

नगरी-ग्राम-देशादि, पृच्छतोऽस्य मुहुर्मुहुः ।
न किञ्चिद् वक्ति मन्त्रीश, एडमूक इवापरः ॥८६॥

मन्त्री चिन्ताञ्चितं चैनं, तमवग् वाक्यविद्वरः ।
कार्यं भद्र ! कुरुष्वैकं, त्वया निष्पद्यते यतः ॥८७॥
कार्यं किमार्य ! सत्कार्यमित्युक्ते तेन सोऽब्रवीत् ।
विवाह्य भूभुजः पुत्रीं मत्पुत्राय प्रयच्छ तत् ॥८८॥
**कलशो**ऽप्याह नेदृक्षं, युज्यते कर्तुमङ्गिनाम् ।
दारदानात्परं दानं, ग्रन्थेष्वपि निशम्यते ॥८९॥
अथ रुष्टोऽवदन्मन्त्री, यद्येवं न करोषि रे ! ।
तदा त्वां मारयिष्यामि, मारैर्नवनवैरहम् ॥९०॥
अथ प्रोवाच निर्भीकः **कलशः** कोमलस्वरः ।
विधेहि वाञ्छितं भद्र ! यत्ते सङ्गतिमङ्गति ॥९१॥
अथाऽऽकृष्य कृपाणं स, निष्कृपः प्राह मन्त्रवित् ।
स्मरेष्टां देवतां कुल्यां, भव त्वं सम्मुखः स्वयम् ॥९२॥
सोऽप्यूचे **कलशो** मेऽर्हच्चरणाः शरणं चिरम् ।
जिनोपदिष्टो धर्म्मश्च, पापतापनिपातकृत् ॥९३॥
अन्तरङ्गा नराः प्रोचुः, प्रणिपत्याऽथ मन्त्रिणम् ।
अयं दुग्धमुखो बालो, निरागा हन्यते कथम् ? ॥९४॥
मा वधीरवधिं स्थैर्य-धैर्याद्यैः सुगुणैरमुम् ।
स्वार्यमेवं निवार्योचुः कुमारं प्रति सादरम् ॥९५॥
यदसौ भाषते मन्त्री, तत्कुरुष्व गुणानघ ! ।
जीवन्नरो भद्रशतं, पश्येदिति वचः स्मर ॥९६॥
तैरेवं बोधितो दध्यौ, नितरां **मङ्गलः** सुधीः ।
क्व विशाला **विशाला**ख्या, नगरी श्रीगरीयसी ? ॥९७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्वायं समागमोऽप्यत्र ?, क्वेदृशी स्थितिरुत्थिता ? ।
तूलपूलकवत् क्वेदं ? वातेनाऽऽनयनं मम ? ॥९८॥
क्व सा तातस्य सद्वाणी, ? क्वेयं गरलसोदरी ? ।
कुल्या इव मम क्वैते ?, पुंसो निधनरक्षकाः ॥९९॥
विचार्यैवं चिरं चित्ते, प्रोचे सचिवमुच्चकैः ।
कारयिष्यामि, तेऽभीष्टं, ममाऽपि कुरु किञ्चन ॥१००॥
तेनोचे किं तदित्युक्ते, सोऽप्यूचे यन्महीश्वरः ।
मङ्गलेषु प्रदत्ते हि, तन्मे देयं गुणानघ ! ॥१०१॥
तदशेष**मुज्जयिन्यां**, प्रहेयं गुप्तपूरुषैः ।
स्नेहस्य लोभतो लोकैरुच्छिष्टमपि भुज्यते ॥१०२॥
आमेति मन्त्रिणा प्रोक्ते, शुभवारे शुभे दिने ।
वर्णकोद्वर्णकविधौ, वधूभिर्विहिते सति ॥१०३॥
स्तूयमानगुणग्रामो, बन्दिवृन्दारकेश्वरैः ।
वाराङ्गनाकुलस्त्रीभ्य, उच्चरद्धवलध्वनिः ॥१०४॥
वादित्राणां महाघोषैर्बधिरीकृतविष्टपः ।
गजारूढः कुमारोऽसौ, विवाहाऽऽवासमाऽऽसदत् ॥१०५॥ युग्मम् ॥
ध्वनत्सु वर्यतूर्येषु, हस्तालेपे कृते सति ।
शुभलग्नोदये जाते, सहर्षो **धनदत्त**भूः ॥१०६॥
**त्रैलोक्यसुन्दरी**कन्यामुपयेमे तदाज्ञया ।
चतुर्थे मङ्गले राजा, ददावस्मै हयादिकम् ॥१०७॥ युग्मम् ॥
तथापि सुन्दरीपाणिं, जामातरि न मुञ्चति ।
राजा सस्नेहमाचख्यौ, वत्स ! याचस्व वाञ्छितम् ॥१०८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोऽप्यवादीदिति क्ष्मापं, यदिदं देव ! सुन्दरम् ।
पञ्चवल्लभवाजिभ्यो, वाजिपञ्चकमर्पय ॥१०९॥
तथा कृते नरेन्द्रेण, महेन सुमहीयसा ।
चचाल श्रेष्ठिसूः साकं, तया राजीवनेत्रया ॥११०॥
गच्छन्नभिमुखं मन्त्रिमन्दिरं **धनदत्तसूः** ।
गिरं सुधाकिरं पौरीं शुश्राव श्रुतिहारिणीम् ॥१११॥
कृष्णः कृष्णः सुराधीशः, सर्वाङ्गीणविलोचनः ।
पुराणपुरुषो ब्रह्मा, शङ्करोऽमटवाहनः ॥११२॥
अयं चम्पकपुष्पाभो, विस्मेरनयनद्वयः ।
नवीनो गजमारूढः, किमेभिरुपमीयते ? ॥११३॥ युग्मम् ॥
इति शृण्वन्वचः प्रापदालयं **मङ्गलो** वरः ।
जायापती अभूतां च, क्रमात्पल्यङ्कसङ्गिनौ ॥११४॥
इतो मन्त्रिनरैरन्तरङ्गिरङ्गविचेष्टितैः ।
सञ्ज्ञितः स्वं वचः पाहि, याहि याहि निजाऽऽश्रयम् ॥११५॥
तनूचिन्तामिषं कृत्वा, यावद्यात्येष मन्दिरात् ।
तावदात्तपयःपात्राऽन्वयात् कुलवधूर्नवा ॥११६॥
कृताङ्गचिन्तं चिन्तार्त्तमालोक्य प्रियमभ्यधात् ।
क्षुधातृड्भ्यां किं कान्त ! त्वं, बाध्यसे स तथाऽवदत् ॥११७॥
दास्या मातृगृहानीतान्, मोदकान्वारि हारि च ।
भुञ्जानः प्रियया साकं **कलशः** च्छन्नमाख्यत ॥११८॥
मोदकानां यद्यमीषां, स्यादवन्त्यम्बुसङ्गमः ।
तदा मोदकता काचित्, परिस्फुरति नूतना ॥११९॥

एवं राजाङ्गजा श्रुत्वा, सहास्यं हृद्यचिन्तयत् ।
दूरे पुरी च सा कान्तः, कथं संस्मृतवानिह ? ॥१२०॥
यत्तन्मातृकुलं तत्र, तदा सम्भाव्यते ह्यदः ।
ध्वात्वेति भूपतेः पुत्री, ताम्बूलं प्रेयसे ददौ ॥१२१॥
पौनःपुन्येन **धनभूः** सञ्ज्ञितो नेत्रसञ्ज्ञया ।
मुहुर्विवलितग्रीवं, निर्ययौ वासवेश्मनः ॥१२२॥
नीत्वाऽ**वन्ती**पथं गूढं, तत्तथा दर्शितं नरैः ।
तुरङ्गादिकमुत्प्रेक्ष्य, स तुतोष सविस्मयः ॥१२३॥
श्रेष्ठिसूर्योजयामास, चतुरस्तुरगान् रथे ।
पञ्चमं पृष्ठिभागे चाऽपृच्छद् ग्रामादिनाम च ॥१२४॥
तान्सन्तुष्य धनैर्बाढं, गिरा सम्भाष्य धीरया ।
स चचाल स्वयं स्वीयां, नगरीं प्रति सप्रभः ॥१२५॥
एत्याऽ**वन्तीं** ततो वेगाद्, वाजिभिर्वायुवाजिभिः ।
स्वधाम प्रविशन्नेष, पितृभ्यामिति भाषितः ॥१२६॥
कथमैषि परागारे ? नास्ति मार्गस्य निसृतिः ।
अमुं वणिग्जनागारं, राजपुत्र ! न वेत्सि किम् ? ॥१२७॥
पित्रोरित्युक्तिमाकर्ण्य, मुदितो **धनदत्तसूः** ।
उत्तीर्य स्यन्दनात्पादौ, ववन्दे भक्तिमेदुरः ॥१२८॥
अथोत्थाय पितुः कण्ठमवलम्ब्याऽब्रवीदिति ।
न जानासि कथं तात !, स्वं पुत्रं **मङ्गला**भिधम् ? ॥१२९॥
तौ मत्वा सुतमानन्दकन्दं रुरुदतुस्ततः ।
ताभ्यां पृष्टः स्ववृत्तान्तं, मूलादारभ्य सोऽभ्यधात् ॥१३०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समाकर्ण्य वणिग् मेने सुतं सर्वश्रियां पदम् ।
अगोपयद् गृहस्यान्तः, पञ्चाश्वीमपि दूरतः ॥१३१॥

अगारं कारयाञ्चक्रे, सप्राकारं सतोरणम् ।
तया रथस्थया लक्ष्म्या, लब्ध्यया मन्त्रिभूभुजोः ॥१३२॥

एषोऽन्येद्युरनुज्ञाप्य, **मङ्गलो** मङ्गलाशयः ।
अपाठीत्सकला विद्या, विद्याहीनः पशुर्यतः ॥१३३॥

इतश्च मन्त्रिणाऽनेन, तनयोऽस्तनयेन सः ।
कृतमङ्गलनेपथ्यः, प्रेषितो वासवेश्मनि ॥१३४॥

तं पल्यङ्कसमारूढं, प्रेक्ष्य प्रोचे नृपाङ्गजा ।
हहा ! क्व मे प्रियश्चारुश्चलत्कर्पूरपादपः ? ॥१३५॥

क्वायं मृतकदुर्गन्धिरित्युक्त्वा तल्पमत्यजत् ।
तेनोच्चैर्धार्यमाणाऽपि, बलाद् भीता सहस्रधा ॥१३६॥

बहिर्गत्वा स्ववृत्तान्तं, तं सखीनां पुरोऽगदत् ।
ताः प्रोचुर्नाऽविशत्कोऽपि, किन्तु तेऽस्ति सखि ! भ्रमः ॥१३७॥

साख्यद् भ्रान्ता भवन्त्योऽपि, स्थाताऽस्म्यत्रैव सर्वथा ।
तदुक्तं तथ्यमज्ञायि, तं दृष्ट्वा ताभिरादरात् ॥१३८॥

अमात्योऽपि प्रगे गत्वा, पूच्चकार नृपाग्रतः ।
देव ! दैवेन मुष्टोऽस्मि, दुर्जयो हि विधेर्विधिः ॥१३९॥

पृथिवीशक्र ! मत्पुत्रः, तव जामातृतां गतः ।
तर्प्पिष्यतीति मे वाञ्छाद्रुमं दैवानलोऽदहत् ॥१४०॥

त्वत्सुताकरयोगेन, कुष्ठी मे नन्दनोऽजनि ।
पूर्णेन्दुसुन्दरं वासो, नीली मलिनयेन्न किम् ? ॥१४१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गुरुरप्यष्टमीयुक्तस्त्यज्यते शुभकर्मणि ।
मन्दोऽपि शस्यते तज्ज्ञैश्चतुर्दश्यामुपागतः ॥१४२॥
वरमिन्द्रियहीनत्वं, वरं दारिद्र्यसेवनम् ।
वरं बन्धो वरं मृत्युर्न पुनः कुष्ठसङ्गमः ॥१४३॥
भूमानाऽऽकर्ण्य तद्वाक्यं, कर्णयोर्विषभोजनम् ।
उवाच गोचरं नेया, न दृशोर्मम पापिनी ॥१४४॥
राजाऽऽदेशाज्जनन्याऽपि, साऽवज्ञाता व्यचिन्तयत् ।
उदियाय हहा ! दैवात्, क्व कलङ्कनवाङ्कुरः ? ॥१४५॥
प्रियो लब्धोऽप्यलब्धोऽभून्मम भाग्यविपर्ययात् ।
दरिद्रस्य करे चिन्तारत्नं तिष्ठेत् कियच्चिरम् ? ॥१४६॥
पूर्वजन्मनि कस्यापि, कलङ्कः कोऽपि निर्ममे ।
अधुना तत्फलं प्राप्तं, परिपाकेन सुन्दरम् ॥१४७॥
इति चिन्तामरुद्भ्रान्ता, जाता **त्रैलोक्यसुन्दरी** ।
मोदकाद्युक्तमस्मार्षीत्, पत्युरिष्टोपदेशवत् ॥१४८॥
ध्यात्वेति मातरं प्रोचे, मातः ! कारय दर्शनम् ।
पित्रा सह यथा वक्ष्ये, किञ्चिदीप्सितमात्मनः ॥१४९॥
अनाकर्ण्येति तद्वाक्यं, जाता मातापि मौनिनी ।
अर्जितानां दुरन्तानां, कर्मणामीदृशी गतिः ॥१५०॥
साऽऽख्यन्न दीनवदना, जनन्येत्यपमानिता ।
अपमानं हि सह्येत, किं पित्रोः प्रेमशालिनोः ॥१५१॥
आख्यया **सिंह**नामानं, राजमानं मनीषिणम् ।
नत्वाऽसावग्रतस्तस्थौ, योजिताञ्जलिकुड्मला ॥१५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सेत्यूचे **सिंह**नृपतिं, प्रीतिपात्रं पितुर्मम ।
मदर्थं पृथिवीनाथं, विज्ञ ! विज्ञपय द्रुतम् ॥१५३॥
यद्देव ! भवतां पुत्री, दैवतो दोषभूरभूत् ।
सैकां विज्ञप्तिकां नाथ ! करिष्यति विनिश्चितम् ॥१५४॥
आमेत्युक्तेऽथ तेनोच्चैर्विज्ञप्तः पृथिवीपतिः ।
तामाहूय नृपोऽवादीत्, पुत्रि ! ब्रूहि यथारुचि ॥१५५॥
वसुधानाथ ! मे देहि, नरवेषमिति स्फुटम् ।
निगद्य विररामोच्चैर्भाषिता नाधिकं वदेत् ॥१५६॥
श्रुत्वेति नृपतिर्दध्यौ, गुरुकार्येण केनचित् ।
भवितव्यं विचार्येति, तथेत्यूचे सुतां प्रति ॥१५७॥
तस्या रक्षाकृते **सिंहं** नृसिंहोऽथ समादिशत् ।
यथाऽसौ लक्ष्मभूर्न स्याद्दुरुच्छेद्या कलङ्किता ॥१५८॥
नारी नियमिता तावद् भवेन्नेत्रप्रियङ्करी ।
चैत्यस्य स्वकुलस्यैव, पताकेव विभूषणम् ॥१५९॥
भूयोऽपि न्यगदद्राजा, वत्से ! स्वच्छाशये ! तव ।
मानसे भासते यच्च, तद् ब्रूहि त्वमनाकुला ॥१६०॥
प्रस्तावज्ञा जगादैवं, सैषा रेखा महाधियाम् ।
अनुज्ञाता त्वया यामि, **विशालां** नगरीं वराम् ॥१६१॥
अथोवाच नृपो वत्से !, भव शीलवती परम् ।
शाश्वतं मण्डनं शीलं, कीर्तेर्मूलं निकेतनम् ॥१६२॥
अथ प्रणम्य भूपाल-पादां**स्त्रैलोक्सुन्दरी** ।
वेगादगा**दवन्तीं** च नरवेषमनोहरा ॥१६३॥

**त्रैलोक्यसुन्दरं** ज्ञात्वा, पुत्रं **चम्पाधिपोद्**भवम् ।
भूत्याऽभ्येत्य महापुर्यां, प्रावेशयदिलापतिः ॥१६४॥
चापाऽसिधेनुप्रमुखं, बिभ्राणं करपङ्कजे ।
**त्रैलोक्यसुन्दरं** दृष्ट्वा, राजा मेनेऽमरं भुवि ॥१६५॥
सन्मानपूर्वकं सौधं, समर्प्पयदिलापतिः ।
तत्राऽस्थात्सोऽपि जालस्थो, वीक्षमाणः पुरश्रियम् ॥१६६॥
अन्येद्युर्भूपभूः पाथःपानार्थं पथि गच्छतः ।
हयांस्ताक्ष्यानिव प्रेक्ष्योपालक्षयदसौ सुधीः ॥१६७॥
अथाऽऽदिक्षन्नरान्नैकान्, कस्यैते वरवाजिनः ? ।
इति ज्ञात्वा समायातास्ते गत्वा पुनरूचिरे ॥१६८॥
स्वामिन् ! **मङ्गलकुम्भ**स्य, वाजिनो दिव्यरूपिणः ।
अमुना सममायाता**श्चम्पापुर्या** महात्मना ॥१६९॥
श्रुत्वेदं स पुनः प्रैषीत्, शुद्धये तान्स्मरोद्धुरः ।
तदादेशात् तदा गत्वा, समाचख्युः सविस्तरम् ॥१७०॥
**धनदत्तसुतः** स्वामिन् !, **मङ्गलो** मङ्गलालयः ।
कलाभ्यासं दधानोऽस्ति, मध्यगश्च्छात्रपर्षदि ॥१७१॥
श्रुत्वेति **सिंह**मूचे सा, तात ! क्रेया महाहयाः ।
त्वया निमन्त्र्यतामत्र, स गुरुः पाठकाग्रणीः ॥१७२॥
ततो ज्ञात्वा मनोभावं, याच्यन्ते वाजिनो मया ।
मनोभावाऽपरिज्ञाने, प्रार्थना हि त्रपावती ॥१७३॥
**सिंहे**नापि प्रगे गत्वोपाध्यायः सन्निमन्त्रितः ।
सोऽप्याजगमिवांस्तत्र, छात्रवर्गसमन्वितः ॥१७४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नृपभूर्**मङ्गलं** वीक्ष्य, सशरीरमिव स्मरम् ।
सुधाभुगिव सञ्जज्ञे, निर्निमेषविलोचनः ॥१७५॥

नररूपधरश्छात्रान्, भक्तिपूर्वममानयत् ।
मुक्त्वैकं **मङ्गलं** नेत्रमङ्गलानां निकेतनम् ॥१७६॥

राजार्हैरासनस्थालैः, प्रेमपात्रैरिवोदितैः ।
**मङ्गलं** मानयामास, वीक्षामासे मुहुर्दृशा ॥१७७॥

वीक्ष्य सन्मानमेतस्य, दुःख्यभूत्पाठकव्रजः ।
क्षमन्ते हन्त सोढं न, ह्येक एव प्रभाववान् ॥१७८॥

अथाऽध्यापकमूचे स, कथां छात्रेण केनचित् ।
आख्यापयत निःशेषरसनिष्पन्दसुन्दराम् ॥१७९॥

छात्रैरथोचिरे स्मित्वा, यस्य सन्मान ईदृशः ।
स सकर्णः श्रवःपेयां, कथयिष्यति वः कथाम् ॥१८०॥

अभाषिष्ट बुधादिष्टो, **मङ्गलो** मङ्गलं गिरा ।
कल्पिताकल्पिताभ्यां तु, राजपुत्र ! कथा द्विधा ॥१८१॥

किं कथा कल्पिता कथ्या ? किञ्चान्या रसहारिणी ? ।
अथोचे राजसूः स्मित्वाऽनुभूतां कथ्यतां कथाम् ॥१८२॥

अथोचे **मङ्गलः** स्फीतं, स्वकीयं चरितं ततम् ।
**विशाला**जलयोगेन, स्वादिष्टैर्मोदकैर्वरम् ॥१८३॥

निशम्य भूपभूरेवं, क्रोधोद्धुर इवाऽवदत् ।
अरेरे ! कोऽयमत्यन्तमसम्बद्धप्रलापकः ॥१८४॥

अस्माकं कुरुते मन्त्री, किमिदं जनगर्हितम् ? ।
धत्तैतस्य न कोऽप्यस्ति, किमु दूरं भटा गताः ? ॥१८५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

धृते तस्मिन् सह छात्रैस्तदैकः कोऽपि पाठकृत् ।
**धनदत्ताय** नंष्ट्वाऽथ, तं वृत्तान्तं न्यवेदयत् ॥१८६॥
**धनदत्त**स्ततः श्रेष्ठी, भीतिव्याकुलमानसः ।
प्राभृताद्यमुपादाय, स्वयं राजकुलेऽचलत् ॥१८७॥
इतः पुंवेषशालिन्या, **मङ्गलो** मालकोपरि ।
गृहीत्वा प्रेमसन्दर्भं, **सिंह**प्रकटमुच्यते ॥१८८॥
प्राणेश ! निर्भयीभूय, मेऽखिलं दर्शयस्व तत् ।
यत्पित्रा मम तेऽदायि, वैवाहे मङ्गलक्षणे ॥१८९॥
मूर्त्यन्तरं पितुः **सिंहो**, मत्कृते दर्शयस्व तत् ।
विना प्रत्यय-सङ्केतं, न प्रत्येति विचक्षणः ॥१९०॥
**कलशो**ऽप्युक्तवानेवं, यद्यसौ स्वसुरोत्तमः ।
प्रेष्यतां मन्दिरेऽस्माकं, यथा गच्छति वस्तु तत् ॥१९१॥
एवमुक्तो गतः **सिंहः**, सच्चक्रे तत्पिताऽप्यमुम् ।
परं चित्तं भयभ्रान्तं, वीक्ष्यैनं प्रोक्तवानसौ ॥१९२॥
मा भैषीद् भद्र ! मा भैषीन्नारीरूपधो नरः ।
सा स्नुषा तव तत्पितृदत्तं वस्तु प्रदर्शय ॥१९३॥
तथोदिते **धने**नापि, नृपनामाङ्कमुज्ज्वलम् ।
श्रेष्ठिना तुष्टिभृत् चित्ते, भूषणाद्यमदर्शयत् ॥१९४॥
सन्मान्य **धनदत्तेन**, प्रेषितः **सिंह**भूपतिः ।
सर्वमाख्याय ताञ्चक्रे, नारीरूपधरां पुनः ॥१९५॥
**त्रैलोक्यसुदरी** देवी, दिव्यनेपथ्यधारिणी ।
पत्युः प्रणम्य पादाब्जं कृताञ्जलिरभाषत ॥१९६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा प्राणेश ! मां मुक्त्वा, दम्भेन गतवानसि ।
इदानीं चित्तचौर ! त्वं, क्व याताऽसि दृशोर्मम ? ॥१९७॥

अथोचे **मङ्गलो** विद्वान्, दैवादिदमभूत्प्रिये ! ।
अतः परं त्वया कार्यो, न विषादः कदाचन ॥१९८॥

अथ **सिंहो** नरेन्द्राऽन्ते, नरवेषां विधाय ताम् ।
नीत्वा यथाभवं वृत्तमाख्यद्भूमानुवाच च ॥१९९॥

अनया पालितं शुद्धं, महाशीलव्रतं चिरम् ।
अहो ! मतिप्रपञ्चोऽस्या, नृशंसत्वं च मन्त्रिणः ॥२००॥

सभासमक्षं भूपस्तां, प्रशंस्येति वचोऽवदत् ।
भज वत्से ! स्वभर्तारं, भव पुत्रवती सति ! ॥२०१॥

इत्युक्त्वा पुत्रिकीकृत्य, स्त्रीवेषीकृत्य भूपतिः ।
**धनदत्त**गृहे प्रैषीद् वरेण सह तां वधूम् ॥२०२॥

दशाऽहानि **धनश्रेष्ठी,** वर्धापनमकारयत् ।
**सिंहो**ऽपि **वैरिसिंहान्ते,** तदाऽऽदेशात् तदा ययौ ॥२०३॥

पृष्ठा क्षमाभुजा पुत्री, वृत्तं स सर्वमाऽऽख्यत ।
तथा पुरुषवेषत्वकारिवेषं समार्पयत् ॥२०४॥

समाकर्ण्येति नन्दिन्या, महिमानमनुत्तरम् ।
प्रमोदाऽऽमोदसुरभिः, क्षोणीशो ध्यातवानदः ॥२०५॥

अहो ! शक्तिरहो ! शीलमहो ! भक्तिः स्ववल्लभे ।
अहो ! कलङ्कवैकल्यमिति ज्ञात्वा महीपतिः ॥२०६॥

**अवन्त्या**स्तां समानाय्याऽवेशयत् सवरां सुताम् ।
तद्द्वयं वीक्ष्य दृग्द्वन्द्वं, मेने साफल्यमात्मनः ॥२०७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वस्वामिद्रोहिणा कस्मान्, मन्त्रिणा मिथुनं हहा ।
कलङ्कितं कलङ्केन, न धर्मे लोभिनां मतिः ॥२०८॥
अथो नाथो विशां रोषात्, **सिंहं** सेवकमादिशत् ।
मन्त्रिणं मारयाद्र्यग्रं, समारोह्य सनन्दनम् ॥२०९॥
इतश्च **मङ्गलो**ऽवादीद्देव ! मन्त्री पिता मम ।
मुञ्चाऽमुं मा वधीस्तत् त्वं, स च पापात् पतिष्यति ॥२१०॥
सुतापतिचरित्रेण, भूपस्तेन चमत्कृतः ।
तथा चक्रे स्वदेशान्नु मन्त्री निर्वासितः पुरात् ॥२११॥
पुर्यां सौख्येन सोऽप्यस्थात्, सप्रियो **मङ्गल**श्चिरम् ।
निष्पुत्रत्वान्नृपेणाथ, स्वपदे विनिवेशितः ॥२१२॥
शीलशालीनभद्रस्य, **यशोभद्र**स्य सद्गुरोः ।
व्रतमाप्य तपस्तप्त्वा, देवभूवं नृपो ययौ ॥२१३॥
कियत्यथ गते काले, मही शासति **मङ्गले** ।
ज्ञात्वेति वणिजं क्षुद्रं, क्रुद्धास्तु प्रान्तभूभुजः ॥२१४॥
हेलया मेलयामासुरखिलानि बलान्यमी ।
रुरुधु**र्मङ्गलं** भूपं, दैत्या इव सुराधिपम् ॥२१५॥
अथ ते निर्जिताः सर्वे, युद्धे **मङ्गल**भूभुजा ।
न तेजस्तादृशां हन्त, जात्यपेक्षं विजृम्भते ॥२१६॥
जितकाशी तत**श्चम्पा**मगान् **मङ्गल**भूपतिः ।
**जयकेशर** इत्यस्य, समभून्नाम चाऽपरम् ॥२१७॥
अन्यदोद्यानमायातं, **जयसिंहं** मुनीश्वरम् ।
आरामिकमुखाज्ज्ञात्वा, तं प्रणन्तुमगान्नृपः ॥२१८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निषण्णे भूपतौ तत्र, प्रसादविकसद्दृशि ।
वासनाशासनावासां, विदधे धर्मदेशनाम् ॥२१९॥
प्रस्तावेऽवोचदुर्वीशो, गुरो ! दुःख्यभवं कथम् ? ।
सकलङ्का कथं देवी ?, तद् ब्रूहि ज्ञानिनाम्वर ! ॥२२०॥
अथोचे साधुपुन्नागः, पुरे **क्षितिप्रतिष्ठिते** ।
**श्रीदेवी**दयितः सौम्यः **सोमचन्द्राऽभिधो** धनी ॥२२१॥
तत्रैव नगरे जज्ञे, **जिनदत्ता**ऽभिधो नरः ।
**सोमचन्द्रस्य** समभूत्, प्रीतिस्तेन सहोच्चकैः ॥२२२॥
गत्वा देशाऽन्तरं लक्ष्मीं, समुपार्ज्य सहस्रधा ।
मनोरथान्पूरयिष्ये, सर्वेषां तनुजन्मिनाम् ॥२२३॥
देशाऽन्तरं गतवतश्चेन्मे भवति पञ्चता ।
परलोकगतेः श्रेयः, न स्यादसुमतां क्वचित् ॥२२४॥
तदस्माद्दापयिष्यामि, पश्चाद्दानं सुहृत्तमात् ।
निर्मलः परलोको मे, यथा भवति निश्चितम् ॥२२५॥
ध्यात्वेति दश दीनारसहस्राणि सुहृत्करे ।
समर्प्येदमवादीत्स, द्वितीयं हृदयं भवान् ॥२२६॥
अमी देयास्त्वया धर्मे, देशान्तरगतस्य मे ।
मम पुण्यस्य षष्ठांशो, भूयात् तव सुहृद्वरः ॥२२७॥
त्वन्मित्रं **जिनदत्तो**ऽपि, त्वयि देशान्तरं गते ।
व्यस्राणयत्सुपात्रेषु, मित्रे श्रेयः कृते श्रियम् ॥२२८॥
वासनावासितस्वान्तः, स ददानः परश्रियम् ।
**जिनदत्तो**ऽभवत्पुण्यभाजनं जनवर्णितः ॥२२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अप्यन्यसम्पदां दाता, प्रपापालकवज्जनः ।
याच्यतेऽञ्जलिमायोज्य, कटरे दानवल्गितम् ॥२३०॥

यत् त्वया परहस्तेन, दापितं द्रव्यमात्मनः ।
तद्भाटकेन समभूदुद्वाहस्तव भूपते ! ॥२३१॥

**जिनदत्त**प्रिया **भद्रा**, रहस्येवमुवाच सा ।
तव पूर्वभवां पत्नीं, **श्रीदेवीं** धिरया गिरा ॥२३२॥

जामे ! प्रियो विरक्तो मे, कारणं तन्निवेदय ।
सहास्यमूचे **श्रीदेवी**, त्वग्दोषस्तव कोऽप्यभूत् ॥२३३॥

भद्रां दुःखातुरीं वीक्ष्य, श्रीदेव्यूचे घृणान्विता ।
मा दुःखं भज हास्येन, मयाऽवादि त्वयीदृशम् ॥२३४॥

**सोमचन्द्र**स्ततो मृत्वा, त्वमभू**र्मङ्गलो** नृपः ।
**श्रीदेव्यपि** तव प्राणवल्लभाऽजनि पूर्ववत् ॥२३५॥

पूर्वकर्माभिलापेन, त्वत्पत्नी लक्ष्मवत्यभूत् ।
सुकृतं दुष्कृतं भद्र ! भुज्यते स्वयमेव तत् ॥२३६॥

**जयसिंह**गुरोरेवं, श्रुत्वा प्राच्यं भवं निजम् ।
महादेव्या समं सौधमगाद् विमलवासनः ॥२३७॥

ततः प्रभृति भूपालो, दानधर्मपरायणः ।
अर्जयन्सुकृताद्वैतं, द्वादशव्रतपालकः ॥२३८॥

क्रमात् पुत्रे निजं राज्यं, निवेश्य क्षितिवासवः ।
गतिं शिवां सदेवीको, महानन्दमयीं ययौ ॥२३९॥

उपतिष्ठति दातारं, दानं दत्तं परैरपि ।
स्वस्य दत्तस्य दानस्य, किं पुनर्वर्ण्यते फलम् ? ॥२४०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रायः शुद्धैस्त्रिविधविधिना, प्राशुकैरेषणीयैः,
कल्पप्रायैः स्वयमुपहितैर्वस्तुभिः पानकाद्यैः ।
काले प्राप्तान् सदनमसकृच्छ्रद्धया साधुवर्गान्,
धन्याः केचित् परभवहिता हन्त ! सन्मानयन्ति ॥२४१॥ मन्दाक्रान्ता ॥

अशनमखिलं खाद्यं स्वाद्यं, भवेदथ पानकं,
यतिजनहितं वस्त्रं पात्रं, सकम्बलप्रोञ्छनम् ।
वसतिफलकप्रख्यं मुख्यं, चरित्रविवर्धनं,
निजकमनसः प्रीत्याधायि, प्रदेयमुपासकैः ॥२४२॥ हरि ॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ४. श्रीअजितप्रभसूरिविरचितम्
# मङ्गलकलशकथानकम् ॥

**उज्जयिन्यां** महापुर्यां **वैरिसिंहो** महीपतिः ।
**सोमचन्द्रा** च तद्भार्या **धनदत्तश्च** श्रेष्ठ्यभूत् ॥१॥
धर्मार्थी सुविनीतात्मा सत्यशीलदयान्वितः ।
गुरुदेवार्चनप्रीतः स श्रेष्ठी धनदत्तकः ॥२॥
**सत्यभामेति** तद्भार्या शीलालङ्कृतिशालिनी ।
पत्यौ प्रेमपरा किं त्वपत्यभाण्डविवर्जिता ॥३॥
साऽन्यदा श्रेष्ठिनं पुत्रचिन्ताम्लानमुखाम्बुजम् ।
दृष्ट्वा पप्रच्छ हे नाथ ! किं ते दुःखस्य कारणम् ॥४॥
श्रेष्ठिना च समाख्याते तस्यै तस्मिन् यथातथे ।
श्रेष्ठिनी पुनरप्यूचे पर्याप्तं चिन्तयाऽनया ॥५॥
धर्म एव भवेन्नृणामिहामुत्र सुखप्रदः ।
स एव सेवनीयो हि विशेषेण सुखैषिणा ॥६॥
तत् त्वं देवे गुरौ चापि कुरु भक्तिं यथोचिताम् ।
देहि दानं सुपात्रेभ्यः पुस्तकं चापि लेखय ॥७॥
एवं च कुर्वतोः पुत्रो भावी यदि तदा वरम् ।
भविता निर्मलो नाथ ! परलोकोऽन्यथाऽऽवयोः ॥८॥
हृष्टः श्रेष्ठ्यप्युवाचैवं प्रिये ! साधूदितं त्वया ।
सम्यगाराधितो धर्मो भवेच्चिन्तामणिर्नृणाम् ॥९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततश्च देवपूजार्थं पुष्पग्रहणहेतवे ।
आकार्यारामिकं तस्मै ददौ श्रेष्ठी धनं बहु ॥१०॥
स्वयं गत्वा तदारामे पुष्पाण्यानीय स प्रगे ।
गृहार्चामर्चयित्वा च गच्छति स्म जिनालये ॥११॥
तत्र नैषेधिकीमुख्यान् यथास्थानं दश त्रिकान् ।
ख्यापयन् परया भक्त्या विदधे चैत्यवन्दनाम् ॥१२॥
ततः साधून् नमस्कृत्य प्रत्याखयानं विधाय च ।
अतिथीनां संविभागं चकार च महामतिः ॥१३॥
अन्यदप्यखिलं धर्मकर्म शर्मनिबन्धनम् ।
आह्निकं रात्रिकं चैवं **धनदत्तो** व्यधात्सुधीः ॥१४॥
अथ धर्मप्रभावेण तुष्टा शासनदेवता ।
ददौ तस्मै पुत्रवरं प्रत्यक्षीभूय साऽन्यदा ॥१५॥
पुत्रे गर्भागते रात्रिशेषे श्रेष्ठिन्युदैक्षत ।
स्वप्ने हेममयं पूर्णकलशं मङ्गलावृतम् ॥१६॥
जातश्च समये पुत्रस्ततः कृत्वोत्सवं गुरुम् ।
तस्मै **मङ्गलकलश** इत्याख्यां तत्पिता ददौ ॥१७॥
कलाभ्यासपरः सोऽथाष्टवर्षप्रमितोऽन्यदा ।
तात ! त्वं कुत्र यासीति पप्रच्छ पितरं निजम् ॥१८॥
सोऽवदद् वत्स ! गत्वाहमारामे प्रतिवासरम् ।
ततः पुष्पाणि चानीय करोमि जिनपूजम् ॥१९॥
ययौ पित्रा सहान्येद्युस्तत्र सोऽपि कुतूहली ।
आरामिकोऽवदत्कोऽयं बालो नेत्रविशालकः ? ॥२०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञात्वा च श्रेष्ठिपुत्रं तं तस्मै सोऽपि ददौ मुदा ।
नारङ्गकरु(र)णादीनि सुस्वादूनि फलान्यलम् ॥२१॥
स्वगेहे पुनरागत्य कुर्वतो जिनपूजनम् ।
श्रेष्ठिनोऽढौकयत्पुत्रः पूजोपकरणं स्वयम् ॥२२॥
द्वितीये च दिने तेन सादरं भणितः पिता ।
अतः परं मया गम्यं पुष्पानयनकर्मणि ॥२३॥
निश्चिन्तेनैव स्थातव्यं त्वया तात ! निजे गृहे ।
अत्याग्रहेण तद्वाक्यमनुमेने पितापि तत् ॥२४॥
एवं च कुर्वतस्तस्य धर्माभ्यासं तथान्तरा ।
कियत्यपि गते काले यज्जातं तन्निशम्यताम् ॥२५॥
अस्त्यत्र भरतक्षेत्रे **चम्पा** नाम महापुरी ।
अभूत् तत्र महाबाहुः पार्थिवः **सुरसुन्दरः** ॥२६॥
राज्ञी **गुणावली** तस्य सा निजोत्सङ्गवर्त्तिनीम् ।
दृष्ट्वा कल्पलतां स्वप्ने पार्थिवाय न्यवेदयत् ॥२७॥
राजा प्रोवाच हे देवि ! तव पुत्री भविष्यति ।
सर्वलक्षणसम्पूर्णा सर्वनारीशिरोमणिः ॥२८॥
पूर्णकालेऽथ चार्वङ्गी सा देवी सुषुवे सुताम् ।
**त्रैलोक्यसुन्दरी** नाम तस्याश्चक्रे महीपतिः ॥२९॥
लावण्यधनमञ्जूषा सौभाग्यरसनिम्नगा ।
बभूव यौवनप्राप्ता सा मूर्त्तेव सुराङ्गना ॥३०॥
तां विलोक्यानवद्याङ्गीं दध्याविति धराधिपः ।
रमणः कोऽनुरूपोऽस्या वत्साया मे भविष्यति ? ॥३१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऊचे च प्रेयसीः सर्वा वरार्हेयं सुताऽभवत् ।
दातव्या ब्रूत तत् कस्मा अत्रार्थे वः प्रधानता ॥३२॥

ता ऊचुरियमस्माकं जीवितादपि वल्लभा ।
नालं धर्त्तुं वयं प्राणान् क्षणमप्यनया विना ॥३३॥

दातव्या तदसौ मन्त्रिपुत्रायात्रैव हे प्रिय ! ।
प्रत्यहं नयनानन्दकारिणी दृश्यते यथा ॥३४॥

ततो राज्ञा समाहूय **सुबुद्धिः** सचिवो निजः ।
अभाणि यन्मया दत्ता त्वत्सुतायात्मनन्दिनी ॥३५॥

अमात्योऽप्यवदद्देव ! किमयुक्तं ब्रवीष्यदः ? ।
कस्मैचिद् राजपुत्राय दातुं कन्या तवोचिता ॥३६॥

राज्ञोचे न त्वया वाच्यमित्यर्थे किञ्चनापि भोः ।
देया त्वत्सूनवेऽवश्यं पुत्री **त्रैलोक्यसुन्दरी** ॥३७॥

मन्त्री कृतावहित्थोऽथ गृहे गत्वा व्यचिन्तयत् ।
हा ! व्याघ्रदुस्तटीन्याये पतितोऽस्मि करोमि किम् ? ॥३८॥

रतिरम्भोपमाकारा राज्ञः पुत्री सुतस्तु मे ।
कुष्ठी तदेतयोर्योगं कथं जानन् करोम्यहम् ॥३९॥

अथवाऽयं मयोपायो लब्धो यत्कुलदेवताम् ।
आराध्य साधयिष्यामि सर्वमात्मसमीहितम् ॥४०॥

ततश्चाराधयामास विधिना कुलदेवताम् ।
उवाच साऽपि प्रत्यक्षीभूय मन्त्रिन् ! स्मृताऽस्मि किम् ? ॥४१॥

मन्त्र्यूचे त्वं स्वयं वेत्सि सर्वं दुःखस्य कारणम् ।
तथा कुरु यथा पुत्रो नीरोगाङ्गो भवेन्मम ॥४२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देव्यूचे नान्यथाकर्त्तुं नृणां कर्म पुराकृतम् ।
दैवतैरपि शक्येत वृथेयं प्रार्थना तव ॥४३॥

मन्त्री प्रोवाच यद्येवं तदन्यमपि पूरुषम् ।
तदाकारं निराकल्यं कुतोऽप्यानीय मेऽर्पय ॥४४॥

तेनोद्वाह्य महाराजपुत्रीं कमललोचनाम् ।
अर्पयिष्यामि पुत्रस्य करिष्येऽस्य यथोचितम् ॥४५॥

देवतोचे पुरीद्वारेऽश्वरक्षकनरान्तिके ।
शीतव्यथानिरासार्थमग्निसेवापरो हि यः ॥४६॥

कुतोऽप्यानीय मयका मुक्तो भवति बालकः ।
स मन्त्रिन् ! भवता ग्राह्यः पश्चात्कुर्याद् यथोचितम् ॥४७॥ युग्मम् ॥

इत्युक्त्वाऽन्तर्दधे देवी हृष्टोऽथ सचिवेश्वरः ।
सर्वां विवाहसामग्रीं प्रगुणीकुरुते स्म सः ॥४८॥

अश्वपालनरं छन्नमाकार्य निजकं ततः ।
तस्मै निवेद्य सकलं वृत्तान्तं सत्यमादितः ॥४९॥

इदमूचे च यः कश्चिदभ्येति भवदन्तिके ।
कुतोऽपि बालकः सो हि समर्प्यो मेऽविलम्बितम् ॥५०॥

तं श्रेष्ठिनन्दनं तस्या वरं विज्ञाय भाविनम् ।
उज्जयिन्यां ययौ पुर्यां मन्त्रिणः कुलदेवता ॥५१॥

अन्तरिक्षस्थितोवाच सा चैवं तस्य शृण्वतः ।
पुष्पाण्यानीय चारामाद्गच्छतो निजवेश्मनि ॥५२॥

स एष बालको याति पुष्पभाजनपाणिकः ।
परिणेष्यति यो राजकन्यकां भाटकेन हि ॥५३॥ युग्मम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तच्छ्रुत्वा विस्मितः सोऽथ किमेतदिति सम्भ्रमात् ।
तातस्य कथयिष्यामीति ध्यायन् सदनं ययौ ॥५४॥
गृहं गतस्य सा वाणी विस्मृता तस्य दैवती ।
द्वितीये दिवसेऽप्येवं श्रुत्वा पुनरचिन्तयत् ॥५५॥
अहो अद्यापि सा वाणी या श्रुता ह्यो मयाऽम्बरे ।
तदद्य सदनं प्राप्तः कथयिष्याम्यहं पितुः ॥५६॥
सोऽचिन्तयदिदं यावत् तावदुत्पाट्य वात्यया ।
नीतो दूरतरारण्ये **चम्पापुर्याः** समीपगे ॥५७॥
भयभ्रान्तस्तृषाक्रान्तः श्रान्तस्तत्र स बालकः ।
सन्मानसभ्रमकरं ददर्शाग्रे सरोवरम् ॥५८॥
तत्र वस्त्राञ्चलापूतं पयः पीत्वाऽतिशीतलम् ।
तत्सेतुस्कन्धसंरूढमाशिश्राय वटद्रुमम् ॥५९॥
तदा चास्तमितो भानुरवस्थापतितस्य हि ।
श्रेष्ठिपुत्रस्य तस्योपकारं कर्त्तुमिवाक्षमः ॥६०॥
कृत्वा दर्भतृणै रज्जुं तयाऽऽरुह्य च तं द्रुमम् ।
स ददर्शोत्तराशायामदूरे ज्वलितानलम् ॥६१॥
ततो वटात्समुत्तीर्य स भीतः शीतविह्वलः ।
हुताशनानुसारेण **चम्पापुर्या** ययौ बहिः ॥६२॥
तत्रोपान्तेऽश्वपालानां कुर्वाणो वह्निसेवनम् ।
यावदासीदसौ हस्यमानस्तैर्दुष्टचेष्टितैः ॥६३॥
तावत् तेन नरेणैत्य पूर्वादिष्टेन मन्त्रिणा ।
आत्मनः पार्श्वमानीतः कृतश्च निरुपद्रवः ॥६४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गोपयित्वाऽतियत्नेन प्रभातसमयेऽमुना ।
अर्पितोऽमात्यवर्यस्य गृहे नीत्वा सगौरवम् ॥६५॥
भोजनाच्छादनप्रायममात्योऽप्यस्य गौरवम् ।
चकार सदनस्यान्तर्गोपनं च दिवानिशम् ॥६६॥
ततोऽसौ चिन्तयामास किमयं मम सत्क्रियाम् ।
कुरुते ? निर्गमं चैव यत्नाद् रक्षति मन्दिरात् ? ॥६७॥
पप्रच्छ चान्यदाऽमात्यं तात ! वैदेशिकस्य मे ।
किमिदं माननं हन्त ! भवद्भिः क्रियतेऽधिकम् ? ॥६८॥
का नामैषा पुरी ? को वा देशः ? को वाऽत्र भूपतिः ? ।
इति सत्यं ममाख्याहि विस्मयोऽत्र प्रवर्त्तते ॥६९॥
अमात्योऽप्यब्रवी**च्चम्पा**नाम्नीयं नगरी वरा ।
**अङ्गा**भिधानो देशश्च राजात्र **सुरसुन्दरः** ॥७०॥
**सुबुद्धि**र्नाम तस्याहं माननीयो महत्तमः ।
मयाऽऽनीतोऽसि वत्स ! त्वं कारणेन गरीयसा ॥७१॥
**त्रैलोक्यसुन्दरी** नाम राज्ञा पुत्री विवाहितुम् ।
प्रदत्ता मम पुत्राय स तु कुष्ठेन पीडितः ॥७२॥
परिणीय त्वया भद्र ! विधिना सा नृपाङ्गजा ।
दातव्या मम पुत्राय तदर्थं त्वामिहानयम् ॥७३॥
तच्छ्रुत्वा **मङ्गलो**ऽवोचदकृत्यं किं करोष्यदः ? ।
क्व सा रूपवती बाला ? निन्द्यरोगी क्व ते सुतः ? ॥७४॥
कर्मेदं न करिष्यामि कथञ्चिदतिनिष्ठुरम् ।
कूपे क्षिप्त्वा जनं मुग्धं वरत्राकर्त्तनोपमम् ॥७५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मन्त्र्यूचे चेन्न कर्मेदं करिष्यसि सुदुर्मते ! ।
तदा त्वां निजहस्तेन मारयिष्यामि निश्चितम् ॥७६॥
इति निस्त्रिंशमाकृष्य भणितोऽपि **सुबुद्धि**ना ।
अकृत्यं नानुमेने तत् स कुलीनशिरोमणिः ॥७७॥
प्रधानपुरुषैर्मन्त्री निषिद्धस्तस्य मारणात् ।
अभाणि सोऽपि गन्यस्व भद्र ! त्वं मन्त्रिणो वचः ॥७८॥
ततोऽसौ चिन्तयामास भवितव्यमिदं खलु ।
अन्य**थोज्जयिनी** क्वाऽसौ ? ममेहागमनं क्व च ? ॥७९॥
इदमाकाशवाचाऽपि दैवत्या कथितं तदा ।
तत्करोम्यहमप्येवं यद् भाव्यं तद् भवत्यहो ! ॥८०॥
विचिन्त्येदं पुनः स्माह **मङ्गलो** मन्त्रिणं प्रति ।
यद्यवश्यमिदं कार्यं मयका कर्म निर्घृणम् ॥८१॥
तदाऽहमपि वः पार्श्वे नाथ ! नाथामि सर्वथा ।
मह्यं ददाति यद् राजा वस्तुजातं ममैव तत् ॥८२॥
स्थापनीयं तु तत्सर्व**मुज्जयिन्याः** पुरोऽध्वनि ।
एवमस्त्विति तद्वाक्यं मेने मन्त्र्यपि बुद्धिमान् ॥८३॥
इति **मङ्गलकुम्भो**क्तं सचिवः प्रत्यपद्यत ।
सर्वं च सज्जयामास क्रमाद् वैवाहिकं विधिम् ॥८४॥
अथ व्योम्नः प्रतिच्छन्दमिव मण्डपमुत्तमम् ।
आदेशकारकैर्भूपः स्वानुरूपमकारयत् ॥८५॥
कुमारकः कृतस्नानः कृचतन्दनलेपनः ।
सदशश्वेतवसनो हस्तविन्यस्तकङ्कणः ॥८६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दत्तकुङ्कुमहस्तोऽथ हस्त्यारूढो विभूषणैः ।
उत्तममेरुशृङ्गाग्ररूढकल्पद्रुमोपमः ॥८७॥

द्राघीयोभिर्वरस्त्रीणां उलूलुध्वनिभिर्भृशम् ।
पञ्चस्वनैश्च विदधद् दिवं नादमयीमिव ॥८८॥

कृतशक्रधनुर्दण्डैर्मायूरातपवारणैः ।
वार्यमाणातपः प्राप मण्डपद्वारसन्निधिम् ॥८९॥

उत्तीर्य कुञ्जरात् तुङ्गात् कुलस्त्रीभिः कृतं तदा ।
अर्घ्यमेष प्रतीयेष प्रद्योतन इव प्रगे ॥९०॥

समासन्ने ततो लग्ने हस्तिस्कन्धाधिरोपितः ।
स निन्ये भूपतेः पार्श्वे वस्त्राभरणभूषितः ॥९१॥

**त्रैलोक्यसुन्दरी** साऽथ दृष्ट्वा तं मन्मथोपमम् ।
अमंस्त तद्वरप्राप्त्या कृतार्थं स्वं मनस्विनी ॥९२॥

ततश्च विप्रे पुण्याहं पुण्याहमिति जल्पति ।
चत्वारि परितो वह्निं भ्रेमतुर्मङ्गलानि तौ ॥९३॥

प्रथमे मङ्गले राजा चारुवस्त्राण्यनेकशः ।
वरायादाद् द्वितीये च स्थालाभरणसञ्चयम् ॥९४॥

तृतीये मणिहेमादि चतुर्थे च रथादिकम् ।
जायापत्योस्तयोरित्थं जज्ञे पाणिग्रहोत्सवः ॥९५॥

कृतोद्वाहे वरे चास्मिन् वधूहस्तममुञ्चति ।
उवाच नृपतिर्भूयो वत्स ! यच्छामि किं नु ते ? ॥९६॥

ततश्च याचितस्तेन जात्यघोटकपञ्चकम् ।
तत् तस्मै शीघ्रमेवाऽसौ प्रददौ प्रीतमानसः ॥९७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वाद्यमाने ततस्तूर्येऽभवद् धवलमङ्गलः ।
मन्त्रिणा स्वगृहे निन्ये समं वध्वा स **मङ्गलः** ॥९८॥

तत्रामात्यगृहजनश्छन्नं छन्नमभाषत ।
कथं निर्वास्यतेऽद्यापि नायं वैदेशिको नरः ? ॥९९॥

**त्रैलोक्यसुन्दरी** साऽथ चलचित्तं निजं पतिम् ।
ज्ञात्वेङ्गितैस्ततस्तस्योपान्तं नैवामुचत् क्षणम् ॥१००॥

ततः क्षणान्तरेणासौ देहचिन्तार्थमुत्थितः ।
जलपात्रं गृहीत्वाऽऽशु तदनु प्राचलच्च सा ॥१०१॥

कृतायामपि तस्यां तं शून्यचित्तं रहःस्थितम् ।
उवाच प्रेयसी कान्त ! बाधते त्वां क्षुधा नु किम् ? ॥१०२॥

ओमिति भणिते तेन दासीहस्तेन मोदकान् ।
आनाय्य स्वगृहात् तस्मै ददौ **त्रैलोक्यसुन्दरी** ॥१०३॥

भुक्तेषु तेषु पानीयं पिबता तेन भाषितम् ।
अहो ! रम्यतरा एते मोदकाः सिंहकेसराः ॥१०४॥

**उज्जयिन्या** नगर्याश्चेन्नीरमास्वाद्यतेऽमलम् ।
तदा तृप्तिर्भवेन्नूनं मोदकेष्वशितेष्वपि ॥१०५॥

तच्छ्रुत्वा राजपुत्री सा दध्यावाकुलचेतसा ।
अहो ! अघटमानं किं वाक्यमेष प्रजल्पति ? ॥१०६॥

मातृगेहमथावन्त्यामार्यपुत्रस्य भावि वा ।
तदसौ दृष्टपूर्वत्वाज्जानात्यस्याः स्वरूपताम् ॥१०७॥

ततश्च निजहस्तेन मुखपाटवकारणम् ।
पञ्चसौगन्धिकं तस्मै ताम्बूलं दत्तवत्यसौ ॥१०८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सन्ध्याकाले पुनर्मन्त्रिमानुषैः प्रेरितोऽथ सः ।
**त्रैलोक्यसुन्दरी**मेवमूचे मतिमतां वरः ॥१०९॥
गमिष्यामि पुनर्देहचिन्तायामुदरार्त्तिभाक् ।
त्वया क्षणान्तरेणागन्तव्यमादाय पुष्करम् ॥११०॥
निरगाच्च ततो मन्त्रिमन्दिरात्पुरुषाश्च तान् ।
पप्रच्छ राजदत्तं भोः ! क्वास्ति तद्वस्तु मामकम् ? ॥१११॥
तैश्च तद् दर्शितं सर्व**मुज्जयिन्याः** पथि स्थितम् ।
ततः सारतरं वस्तु निक्षिप्यैकरथे वरे ॥११२॥
तस्मिंश्च योजयित्वाऽश्वांश्चतुरः पृष्ठतस्तथा ।
बद्ध्वैकं शेषकं वस्तु मुक्त्वा तत्रैव सोऽचलत् ॥११३॥ युग्मम् ॥
पृष्टाश्चानेन ते ग्रामा**नुज्जयिन्य**ध्वगान्नराः ।
प्रत्येकं कथयन्ति स्म नामग्राहं मुहुर्मुहुः ॥११४॥
ततो रथाधिरूढोऽसौ तेन मार्गेण बुद्धिमान् ।
स्तोकैरेव दिनैः प्रप्तस्तामेव नगरीं निजाम् ॥११५॥
इतश्च पितरौ तस्य तमन्विष्य विलप्य च ।
बहुधा बहुभिर्घस्रैर्गतशोकौ बभूवतुः ॥११६॥
गृहाभिमुखमायान्तं रथारूढं विलोक्य तम् ।
बभाषेऽथापरिज्ञाय जनन्यस्य ससम्भ्रम् ॥११७॥
प्रेर्यते गृहमध्येन राजपुत्र ! कथं रथः ? ।
कर्त्तास्यभिनवं मार्गं किं त्वं त्यक्त्वा पुरातनम् ? ॥११८॥
इत्थं निषिध्यमानोऽपि न यावद् विरराम सः ।
आचख्यौ श्रेष्ठिनस्तावत् श्रेष्ठिन्याकुलिताशया ॥११९॥

श्रेष्ठ्यप्यस्य निषेधार्थं गृहद्यावन्निरीयिवान् ।
तावद् रथात्समुत्तीर्य पितुः पादौ ननाम सः ॥१२०॥

उपलक्ष्य ततस्ताभ्यामाश्लिष्टस्तनयो निजः ।
सद्यः प्रादुर्भवद्धर्षाऽश्रुपूरप्लावितेक्षणम् ॥१२१॥

पप्रच्छ चोपविष्टः सन् वत्सर्द्धिः कुत ईदृशी ? ।
क्व वा कालमियन्तं त्वं स्थितोऽसि ? वद नन्दन ! ॥१२२॥

ततश्चात्मकथा तेन पितुरग्रे निवेदिता ।
वाक्श्रुत्यपहारादि स्वस्थानागमनावधि ॥१२३॥

अहो ! पुत्रस्य सौभाग्यमहो ! पुत्रस्य दक्षता ।
अहो ! धैर्यमहो ! भाग्यमिति प्राशंसतामिमौ ॥१२४॥

ततः प्राकारसंगुप्तं स स्वगेहमकारयत् ।
अश्वानां रक्षणार्थं च मन्दुरादिनियन्त्रणम् ॥१२५॥

सोऽन्येद्युर्जनकं स्माह मम तात ! कलागमः ।
स्वल्पोऽस्त्यद्यापि तं पूर्णं करिष्यामि त्वदाज्ञया ॥१२६॥

ततश्चानुमतः पित्रा कलाचार्यस्य सन्निधौ ।
कलाऽभ्यासं चकारासौ स्वकीयसदनान्तिके ॥१२७॥

इतश्च मन्त्रिणा तेन रात्रौ **मङ्गल**वेषभृत् ।
प्रेषितो वासभवने वधूपान्ते सुतो निजः ॥१२८॥

शय्यारूढं च तं दृष्ट्वा दध्यौ **त्रैलोक्यसुन्दरी** ।
कोऽयं कुष्ठाभिभूताङ्गः समायातो ममान्तिकम् ? ॥१२९॥

करस्पर्शमथो कर्त्तुमुद्यतेऽस्मिन् झटित्यपि ।
सा शय्यायाः समुत्थाय निर्ययौ भवनाद् बहिः ॥१३०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दासीभिर्भणिता किं नु स्वामिन्यसि ससम्भ्रमा ? ।
साऽवदद् देवतारूपी गतः क्वापि स मे पतिः ॥१३१॥
प्रत्यूचुस्ता इदानीं स प्रविष्टोऽत्र पतिस्तव ।
साऽब्रवीन्नास्त्यसावत्र कुष्ठिकः कोऽपि विद्यते ॥१३२॥
दासीमध्ये ततः सुप्ता तामतीत्य विभावरीम् ।
**त्रैलोक्यसुन्दरी** प्रातर्ययौ पितृगृहं निजम् ॥१३३॥
**सुबुद्धिः** रपि दुर्बुद्धिः सोऽथ मन्त्री महीपतेः ।
ययौ सकाशमन्येद्युश्चिन्ताश्याममुखः किल ॥१३४॥
कृतप्रणतिमासीनमथैनं पृथिवीपतिः ।
हर्षस्थाने विषादः किं ? तवेत्यूचे कृताग्रहः ॥१३५॥
स जगाद महाराज ! विचित्रा कर्मणां गतिः ।
अस्माकं मन्दभाग्यानां वशात्परिणता कथम् ? ॥१३६॥
चिन्तयत्यन्यथा जीवो हर्षपूरितमानसः ।
विधिस्त्वेष महावैरी कुरुते कार्यमन्यथा ॥१३७॥
राजा प्रोवाच हे मन्त्रिन् ! उक्त्वा स्वं दुःखकारणम् ।
मामप्यमुष्य दुःखस्य संविभागयुतं कुरु ॥१३८॥
निःश्वस्य सचिवोऽप्यूचे देव ! दैवं करोति तत् ।
यद् वक्तुमपि नो शक्यमश्रद्धेयं च शृण्वताम् ॥१३९॥
स्वामिपादैः सप्रसादैर्दत्ता सूनोर्ममात्मजा ।
तस्यां तु परिणीतायां यद् वृत्तं तन्निशम्यताम् ॥१४०॥
यादृग् राज्ञा स्वयं दृष्टस्तादृगेव सुतो मम ।
अधुना कुष्ठरोगाप्तो दृश्यते क्रियते नु किम् ? ॥१४१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तच्छ्रुत्वा भूपतिर्दध्यौ सा नूनं मम नन्दिनी ।
अलक्षणा तत्प्रभावात् कुष्ठी जातोऽस्य पुत्रकः ॥१४२॥

स्वकर्मफलभोक्तारः सर्वे जगति जन्तवः ।
अयं हि निश्चयनयो यद्यप्यस्ति जिनोदितः ॥१४३॥

तथापि व्यवहारोऽयं यो हेतुः सुखदुःखयोः ।
स एव क्रियते लोके भाजनं गुणदोषयोः ॥१४४॥ युग्मम् ॥

स्वकर्मपरिणामेन जज्ञे पुत्रोऽस्य कुष्ठिकः ।
जाता च तन्निमित्तत्वात्पुत्री मे दोषभाजनम् ॥१४५॥

उचे च सचिवाऽनर्थमकार्षमहमीदृशम् ।
नादास्यं चेत्सुतां कुष्ठी नाभविष्यत्सुतोऽपि ते ॥१४६॥

अमात्योऽप्यब्रवीत् स्वामिन् ! हितकार्यं प्रकुर्वताम् ।
को दोषो भवतामत्र ? दोषो मत्कर्मणां पुनः ॥१४७॥

अथोत्थाय ययौ मन्त्री सा तु **त्रैलोक्यसुन्दरी** ।
इष्टाऽप्यनिष्टा सञ्जाता राज्ञः परिजनस्य च ॥१४८॥

न कोऽप्येनामाललाप नाभ्यनन्दत् दृशाऽपि हि ।
एकत्र गुप्तगेहेऽस्थात् सा मातृगृहपृष्ठतः ॥१४९॥

अचिन्तयच्च दुष्कर्म किं मया विहितं पुरा ? ।
येन क्वापि ययौ नंष्ट्वा परिणीतः स मे पतिः ॥१५०॥

अन्यच्च लोकमध्येऽदः कलङ्कं समुपस्थितम् ।
किं करोमि ? क्व गच्छामि ? व्यसने पतिताऽस्मि हा ! ॥१५१॥

एवं चिन्तां प्रकुर्वन्त्यास्तस्याश्चित्ते स्थितं तदा ।
भवि**तोज्जयिनी**पुर्यां प्राप्तो नूनं स मे पतिः ॥१५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तदा च मोदकास्तेन भुक्त्वा सञ्जल्पितं किल ।
एते हि मोदका रम्याः किं **त्ववन्त्या** जलोचिताः ॥१५३॥
ततः केनाप्युपायेन तत्र गच्छाम्यहं यदि ।
तदान्विष्य मिलित्वाऽस्य भवामि सुखभागिनी ॥१५४॥
अथान्येद्युरुवाचाम्बां हे मातर्जनको मम ।
एकवारं यथा वाक्यं शृणोति त्वं तथा कुरु ॥१५५॥
तां दृष्ट्वानादरपरामन्येद्युः **सिंह**नामकम् ।
सामन्तं ज्ञापयामास सा तमर्थं कृताञ्जलिः ॥१५६॥
सोऽथ राजकुले गत्वा नृपं नत्वोपविश्य च ।
इति विज्ञापयामास प्रस्तावे वदतां वरः ॥१५७॥
नृनाथ ! भवता मान्यचरी सम्प्रत्यसम्मता ।
वराकी वर्त्तते कष्टे सैषा **त्रैलोक्यसुन्दरी** ॥१५८॥
अस्याः संमानदानादि दूरेऽस्त्वालपनं तथा ।
वाक्यश्रवणामात्रेण प्रसादोऽद्य विधीयताम् ॥१५९॥
पार्थिवोऽप्यश्रुपूर्णाक्षः प्रोचे **सिंह** ! पुराभवे ।
अनया विहितं किञ्चिदभ्याख्यानादि दुष्कृतम् ॥१६०॥
तदियं तत्प्रभावेण कलङ्किततनूरभूत् ।
इष्टाऽप्यनिष्टतां प्राप्ता गाढमस्माकमप्यहो ! ॥१६१॥
वाक्यं तदद्य यत्किञ्चिदनयाऽस्ति विवक्षितम् ।
तद् ब्रवीतु न रुष्टैरप्यात्मीयः परिभूयते ॥१६२॥
ततस्तदनुमत्यैत्य तत्र **त्रैलोक्यसुन्दरी** ।
उवाच तात ! मे वेषं कुमारोचितमर्पय ॥१६३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भूयो राजाऽब्रवीत् **सिंहं** किमिदं वक्त्यसौ वचः ? ।
सोऽवदद् देव ! युक्तं हि क्रमोऽस्ति यदयं किल ॥१६४॥
राज्ञां गृहेषु चेत्पुत्री गुरुकार्येण केनचित् ।
पुंवेषं याचते तस्यै दातव्यः स न संशयः ॥१६५॥
ततस्तदनुमत्याऽस्यै पुंवेषं पार्थिवो ददौ ।
आदिदेश च तं **सिंहं** तद्रक्षार्थं बलान्वितम् ॥१६६॥
अभ्यधात्**सुन्दरी** भूयस्ताताज्ञा चेद् भवेत् तव ।
**उज्जयिन्यां** ततो यामि कारणेन गरीयसा ॥१६७॥
कारणं कथयिष्यामि तज्जाते च समीहिते ।
अधुना कथिते तस्मिन् परिणामो न शोभनः ॥१६८॥
हे पुत्रि ! मम वंशस्य यथा नाभ्येति दूषणम् ।
तथा कार्यं त्वयेत्युक्त्वा विसृष्टा सा महीभुजा ॥१६९॥
ततश्च **सिंह**सामन्तभूरिसैन्यसमन्विता ।
अखण्डितप्रयाणैः सा ययाव**ुज्जयिनीं** पुरीम् ॥१७०॥
**वैरिसिंहो** नृपोऽथैवं शुश्राव जनतामुखात् ।
यच्**चम्पायाः** समागच्छन्नस्त्यत्र नृपनन्दनः ॥१७१॥
अभियानादिसन्मानस्वागतप्रश्नपूर्वकम् ।
पुरे प्रवेश्य तेनासावानीतो निजमन्दिरे ॥१७२॥
पृष्टा चागमनार्थं सा प्रोवाच नगरीमिमाम् ।
दृष्टुमाश्चर्यसम्पूर्णामागतोऽस्मि कुतूहलात् ॥१७३॥
ततः प्रोक्तो नरेन्द्रेण त्वया स्थेयं ममौकसि ।
**सुरसुन्दर**राजस्य मम गेहस्य नान्तरम् ॥१७४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राजढौकितगेहे सा तस्थौ सबलवाहना ।
पत्तींश्चेत्यादिशत् स्वादुनीरस्थानं निरीक्ष्यताम् ॥१७५॥
पूर्वस्यां दिशि ते तत् तु ज्ञात्वा तस्यै न्यवेदयन् ।
तन्मार्गे कारितावासेऽवात्सीत् साऽथनृपाज्ञया ॥१७६॥
गच्छतो नीरपानार्थमन्यदाऽश्वान्निरीक्ष्य तान् ।
सा दध्यौ मम तातस्य सत्का एते तुरङ्गमाः ॥१७७॥
तेषामनुपदं प्रेष्य पुनर्भृत्यान् विवेद सा ।
भर्त्तुर्गृहाभिधानादिसर्वशुद्धिं मनस्विनी ॥१७८॥
कलाभ्यासपरं तं च ज्ञात्वा **त्रैलोक्यसुन्दरी** ।
उवाच **सिंह**मेते हि कथं ग्राह्यास्तुरङ्गमाः ? ॥१७९॥
**सिंहो**ऽवादीत् त्वयाऽऽदिष्टोपायेनैव ततश्च सा ।
सच्छात्रं तं कलाचार्यं भोजनाय न्यमन्त्रयत् ॥१८०॥
भोजनार्थमुपाध्याये तत्रायाते ददर्श सा ।
छात्रमध्ये स्वभर्त्तारं हृदयानन्ददायिनम् ॥१८१॥
तस्मा आसनमात्मीयं स्थालं चादापयत् तदा ।
अकारयद् विशेषेण गौरवं भोजनादिषु ॥१८२॥
ततो वस्त्राणि सर्वेभ्यो यथायुक्तमदत्त सा ।
तस्मै निजाङ्गलग्नं च वासोयुग्मं मनोहरम् ॥१८३॥
उवाच च कलाचार्यमेतन्मध्यात् त्वदाज्ञया ।
यो जानाति स आख्यातु च्छात्रो मम कथानकम् ॥१८४॥
सर्वैरपीर्ष्यया छात्रैर्निर्दिष्टः सोऽथ **मङ्गलः** ।
उपाध्यायगिरा धीमान् वक्तुमेवं प्रचक्रमे ॥१८५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चरितं कल्पितं किं वा कथयामि कथानकम् ? ।
साऽवदच्चरितं ब्रूहि, पर्याप्तं कल्पितेन भोः ! ॥१८६॥
**मङ्गल**श्चिन्तयामास सैषा **त्रैलोक्यसुन्दरी** ।
**चम्पापुर्यां** भाटकेन परिणीता हि या मया ॥१८७॥
केनापि हेतुनेहागात् भूत्वा पुंवेषधारिणी ।
भवत्वेवं कथां तावत् कथयामि निजामहम् ॥१८८॥
जगाद च कथा लोकप्रिया चित्रकरी भवेत् ।
सा च वृत्ता मदीयेऽङ्गे तामाख्यामि निशम्यताम् ॥१८९॥
ततश्चात्मकथा तेनादितस्तत्र प्रकाशिता ।
तावद् यावदमात्येन गृहान्निर्वासितोऽस्म्यहम् ॥१९०॥
अत्रान्तरे कृतालीककोपा राजसुताऽवदत् ।
अमुं गृह्णीत गृह्णीत रे ! रे ! मिथ्याभिभाषिणम् ॥१९१॥
इत्युक्ते पत्तयस्तस्यास्तद्ग्रहार्थं समुद्यताः ।
तयैव वारिताः शीघ्रं स चानीतो गृहान्तरे ॥१९२॥
अथैनमासनेऽध्यास्य **सिंह**मूचे नृपात्मजा ।
अयि ! येनाहमूढाऽस्मि स एवायं प्रियो मम ॥१९३॥
किमत्र युज्यते कर्तुमित्युक्तः सोऽपि चाब्रवीत् ।
अयं तव भवेद् भर्ता तदा सेव्योऽपशङ्कितम् ॥१९४॥
सोचे **सिंहं** तवाद्यापि चित्ते यद्यस्ति संशयः ।
ततोऽस्य मन्दिरे गत्वा स्थालादीनि विलोकय ॥१९५॥
तद् विधातुमथो **सिंहो धनदत्त**गृहं ययौ ।
सोऽग्रे छात्रमुखात् पुत्रापायं श्रुत्वाऽऽकुलोऽभवत् ॥१९६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुत्रस्य गौरवोदन्तमाख्यायैतेन बोधितः ।
दर्शयामास च स्थालादीनि तद्भणितोऽस्य सः ॥१९७॥

वध्वाः स्वरूपकथनेनाह्लाद्य श्रेष्ठिनं ततः ।
**सिंहः** पुना राजपुत्र्याः समीपं समुपाययौ ॥१९८॥

**सिंहे**नानुमता साऽथ कृत्वा स्त्रीवेषमुद्भटम् ।
बभूव वल्लभा तस्य **मङ्गल**स्य महात्मनः ॥१९९॥

ययौ च श्रेष्ठिनो वेश्म तत् युग्मं पार्थिवोऽपि तत् ।
आकार्य सर्ववृत्तान्तं पृष्ट्वा श्रुत्वा विसिष्मिये ॥२००॥

ततस्तत्रैव प्रासादे गत्वा राजाज्ञया पुनः ।
समं **त्रैलोक्यसुन्दर्या** विललास स **मङ्गलः** ॥२०१॥

**सुन्दर्या** प्रेषितः सोऽथ **सिंहः** सबलवाहनः ।
लात्वा पुरुषवेषं तं ययौ **चम्पापुरीं** पुनः ॥२०२॥

अमुना सर्ववृत्तान्ते कथिते जगतीपतिः ।
हृष्टोऽभाषिष्ट वत्साया अहो ! मे मतिकौशलम् ॥२०३॥

अहो ! कुधीरमात्यस्य पापकर्मविधायिनः ।
येनादोषाऽपि मत्पुत्री सदोषा विहिता कथम् ? ॥२०४॥

**सिंहं** पुनरपि प्रेष्यो**ज्जयिन्यां** निजनन्दिनीम् ।
सकान्तां स समानाय सच्चक्रे च यथाविधि ॥२०५॥

अमात्यं धारयित्वा तं मार्यमाणं महीभुजा ।
**मङ्गलो** मोचयामास गाढाभ्यर्थनया नृपात् ॥२०६॥

जामातुरुपरोधेन मया मुक्तोऽसि पाप ! रे ।
इति विब्रुवता राज्ञा सोऽथ निर्वासितः पुरात् ॥२०७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अपुत्रः सोऽथ भूपालो मेने जामातरं सुतम् ।
तत्रैवानाययामास तन्मातापितरावपि ॥२०८॥

अन्येद्युर्मन्त्रिसामन्तसम्मत्योत्सवपूर्वकम् ।
**मङ्गलकलशं** राज्ये सुधीः स्थापयति स्म सः ॥२०९॥

**यशोभद्रा**भिधानानां सूरीणां चरणान्तिके ।
**सुरसुन्दर**भूपालः परिव्रज्यामुपाददे ॥२१०॥

राज्ये संस्थापितः कोऽपि वणिग्जातिरितीर्ष्यया ।
प्रत्यन्तपार्थिवा राज्यं हर्तुं तस्योपतस्थिरे ॥२११॥

सेनया चतुरङ्गिण्या सहितेन महौजसा ।
दृढपुण्यप्रभावेण जिताः सर्वेऽपि तेन ते ॥२१२॥

शान्ताऽमित्रस्य तस्याथ राज्यं पालयतः सतः ।
पत्न्यां **त्रैलोक्यसुन्दर्यां** सुतोऽभूज्**जयशेखरः** ॥२१३॥

स च राजा निजे देशे जिनचैत्यान्यनेकशः ।
जिनार्चारथयात्राश्चेत्यादिधर्ममकारयत् ॥२१४॥

अन्यदोद्यानमायातं **जयसिंहा**भिधं गुरुम् ।
गत्वा ववन्दे भावेन सकलत्रः स भूपतिः ॥२१५॥

पप्रच्छ च यथा केन कर्मणा भगवन्मया ।
प्राप्ता विडम्बनोद्वाहे देव्या प्राप्तं च दूषणम् ? ॥२१६॥

सूरिरूचेऽथ **भरते** क्षेत्रेऽत्रैवास्ति पत्तनम् ।
**क्षितिप्रतिष्ठितं** नाम धनधान्यसमृद्धिमत् ॥२१७॥

आसीत् तत्र **सोमचन्द्रा**भिधानः कुलपुत्रकः ।
**श्रीदेवी** तद्भार्याऽभूत् तौ मिथः प्रीतिशालिनौ ॥२१८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सोमचन्द्रः** प्रकृत्यासावार्जवादिगुणान्वितः ।
मान्यः समस्तलोकानां तस्य भार्या च तादृशी ॥२१९॥
इतस्तत्रैव नगरे **जिनदेवा**भिधः सुधीः ।
श्रावकोऽभूत्समं तेन तस्य मैत्री निरन्तरा ॥२२०॥
**जिनदेवो** धनाकाङ्क्षी धने सत्यपि सोऽन्यदा ।
देशान्तरं गन्तुकामो निजं मित्रमभाषत ॥२२१॥
धनायाहं गमिष्यामि मयि तत्र गते त्वया ।
मामकीनं धनं सप्तक्षेत्र्यां वाप्यं यथाविधि ॥२२२॥
तवापि तस्य पुण्यस्य षष्ठांशो भवतादिति ।
दीनाराणां सहस्राणि दशैतस्यार्पयत्करे ॥२२३॥
गते देशान्तरे तस्मिन् **सोमचन्द्रो**ऽथ तत्सुहृत् ।
व्ययति स्म यथास्थानं तद्द्रव्यं शुद्धचेतसा ॥२२४॥
आत्मीयमपि तस्यानुसारेणायं व्याधाद् वृषम् ।
तज्ज्ञात्वा तस्य भार्याऽपि धर्मं भेजेऽनुमोदनात् ॥२२५॥
तस्मिन्नेव पुरे तस्याः सखी **भद्रा**ऽभिधाऽभवत् ।
**नन्दस्य** श्रेष्ठिनः पुत्री **देवदत्तस्य** गेहिनी ॥२२६॥
**देवदत्तः** स कालेन कर्मदोषेण केनचित् ।
कुष्ठी जज्ञे ततो **भद्रा** तत्प्रिया विषसाद सा ॥२२७॥
पुरः सख्यास्तयाऽन्येद्युस्तत्स्वरूपं निवेदितम् ।
तया च हासपरया भणिता सा ससंभ्रमम् ॥२२८॥
हले ! त्वत्सङ्गदोषेण कुष्ठी जज्ञे पतिस्तव ।
ममापि दृष्टिं मा गास्त्वमतोऽपसर दूरतः ॥२२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सा तेन वचसा दूना तस्थौ श्याममुखी क्षणम् ।
हास्यमेतदिति प्रोच्य तयैवाह्लादिता ततः ॥२३०॥

स **सोमचन्द्रः श्रीदेव्या** तया सार्द्धं च भार्यया ।
साधुसंसर्गतः प्राप्तं श्राद्धधर्ममपालयत् ॥२३१॥

अन्ते समाधिना मृत्वा सौधर्मे त्रिदशाविमौ ।
दम्पती समजायेतां पञ्चपल्योपमस्थिती ॥२३२॥

**सौधर्मात्सोमचन्द्रा**त्मा च्युत्वाऽभूत् भूपतिर्भवान् ।
जीवश्च्युत्वा च **श्रीदेव्या** जज्ञे **त्रैलोक्यसुन्दरी** ॥२३३॥

परद्रव्येण यत्पुण्यं भवतोपार्जितं तदा ।
तदेषा भाटकेनैव परिणीता नृपात्मजा ॥२३४॥

हास्येनापि वयस्यायै यद्दत्तमनया पुरा ।
तदेतस्यामिह भवे कलङ्कः समभूद् ध्रुवम् ॥२३५॥

तदाकर्ण्य विरक्तौ तौ दत्त्वा राज्यं स्वसूनवे ।
राजा राज्ञी च प्रव्रज्यां पार्श्वे जगृहतुर्गुरोः ॥२३६॥

क्रमेण सोऽथ राजर्षिः सर्वसिद्धान्तपारगः ।
स्थापितो गुरुणा सूरिपदे परिकरावृतः ॥२३७॥

**त्रैलोक्यसुन्दरी** साध्वी स्थापिता च प्रवर्त्तिनी ।
विपद्योभौ च तावन्ते **ब्रह्म**लोकमुपेयतुः ॥२३८॥

ततश्च्युतौ मनुष्यत्वं प्राप्यानिमिषतां पुनः ।
एवं भवे तृतीये तौ प्रापतुः पदमव्ययम् ॥२३९॥

**इति मङ्गलकलशकथानकम् ॥**

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ५. श्रीमुनिदेवसूरिविरचितम्
# मङ्गलकलशकथानकम् ॥

पूर्वं युगादिदेवस्य, जज्ञिरे शतमङ्गजाः ।
**अवन्तिवर्धनो** नाम, तेष्वेको भरतादिषु ॥१॥
**अवन्ति**रिति विख्यातो, देशस्तस्याभिधानतः ।
आस्ते समस्तलक्ष्मीणां, सङ्केतसदनोपमः ॥२॥
तस्मिन्**नुज्जयनी** नाम, पुरी सुरपरीसमा ।
भूपसेवासमायातसामन्तजनसङ्कुला ॥३॥
लङ्काऽलकाद्यानगरीर्निर्जित्यातिप्रमोदतः ।
चञ्चलैर्नरिनर्तीव या निकेतनकैतनैः ॥४॥ युग्मम् ॥
तत्र दुःखाब्धिनिर्मज्जद्गोत्रोद्धरणपोत्रभृत् ।
वैरिकुञ्जरसिंहोस्ति, **वैरिसिंहो** महीपतिः ॥५॥
तत्प्रतापो भुवि स्फूर्जन्नूर्जस्विधरणीभृतः ।
उवोष नतु सोष्मापि, चित्रं सन्मित्रकाननम् ॥६॥
तस्यास्ति महिषी **सोमचन्द्रा** चन्द्राभसद्गुणा ।
वर्धने रागकल्लोलप्रेमकल्लोलमालिनः ॥७॥
सोमत्वाह्लादकत्वाभ्यां, द्विधापि विजितो विधुः ।
नामयुग्ममितीवास्य, जगृहे सा गृहेश्वरी ॥८॥
राजप्रसादविश्रामभूमिर्भूमगुणाश्रयः ।
तत्र न्यायार्जितधनो, **धनदत्तो**स्ति वाणिजः ॥९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आस्तिक्यकायसच्छायो, वैराग्यातुच्छपुच्छभृत् ।
पञ्चभिर्भूषणैः पञ्चमुखः कर्मेभमर्मभित् ॥१०॥

उद्यद्गुणद्रुमच्छाये, कृपाकुलंकषाकुले ।
सम्यक्त्वकेशरी यस्यावसन्मानसकानने ॥११॥ युग्मम् ॥

बभूव गेहिनी तस्य, गेहश्रीरेव देहिनी ।
अभिरामगुणग्रामा, **सत्यभामा**ऽभिधानतः ॥१२॥

प्रसर्पद्दर्पकन्दर्पसर्पहालाहलोपहम् ।
शीलरत्नं सयत्नं सा, दक्षा रक्षति सर्वथा ॥१३॥

त्रिवर्गमाराधयतोस्तयोरथ यथातथम् ।
प्राच्य पुण्यपरीपाकात्, शतानि शरदां ययुः ॥१४॥

चरमे यामिनीयामेऽन्यदा दध्यौ धनो हृदि ।
गतनिद्रोऽपितन्द्रात्मा[1] स्व-स्वरूपमनुस्मरन् ॥१५॥

प्रवाल-रजत-स्वर्ण-मणि-मौक्तिकसञ्चयाः ।
प्राङ्गणे मम सन्त्येते, कणवद् गणनातिगाः ॥१६॥

स्वर्विमानसमानानि, सन्ति सद्मान्यनेकशः ।
वराशिराशय इव, क्षोमाणि च सहस्रशः ॥१७॥

पादातं माहिषं चैवाश्वीयमौक्षकमौष्ट्र्यकम् ।
शिबिका-शकटादीनि, सन्ति वस्तूनि लक्षशः ॥१८॥

दत्तदुःखावसादश्च, प्रसादः पृथिवीपतेः ।
मय्यस्ति बन्धुलोकोयं, पौरवर्गश्च वत्सलः ॥१९॥

किन्तु पुत्रमुखादर्शसुखास्वादं विना मम ।
ताम्बूलहीनं नेपथ्यमिव सर्वं निरर्थकम् ॥२०॥

---

१. ०निद्रो वितन्द्रात्मा - पा.१ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यौवनार्धं गतमिदं, सन्निधाने च वार्धकम् ।
जज्ञे गार्हस्थ्यवृक्षोयमवकेशी विना सुतम् ॥२१॥
रसं विनेव काव्यानि, पृथक् प्रेमेव च प्रिया ।
ऋतेऽब्जमिव कासारा, नाना वृष्टिमिवाम्बुदाः ॥२२॥
गन्धेनेव प्रसूनानि, विवेकेन गुणा इव ।
तनयेन विना पुंसो, न विभान्ति विभूतयः ॥२३॥ युग्मम् ॥
मदन्वयोदधिं वृद्धिं, नयन्नयनिधेः सुतः ।
केनोपायेन भविता, शशीवाभ्युदयी ततः ॥२४॥
एवं विकल्पकल्लोलैः, सुतचिन्तासमुद्रजैः ।
प्रेर्यमाणस्य तस्याभूत्, क्षणादाऽक्षणादा[२] भृशम् ॥२५॥
शय्योत्थायं ततः प्रातःकृत्यमातत्य तस्थुषः ।
अस्यास्ये श्यामिकां वीक्ष्य, **भामा**ऽभाषिष्ट दुःखभाक् ॥२६॥
बाधते भवतामङ्गं, नाथ ! कापि रुजा कथम् ? ।
इष्टनाशभवं किञ्चिदसुखं मानसेऽथ वा ? ॥२७॥
व्यवहारमहारम्भे, द्रव्यहानिर्बभूव वा ? ।
नृपापमानतः कश्चिदाधिः प्रादुर्बभूव वा ? ॥२८॥
अभूतपूर्वं यदिदं, मुखे श्यामत्वमेधते ।
गोप्यं मम न चेदेतदस्ति तन्नाथ ! कथ्यताम् ॥२९॥
**धनः** प्राह प्रियेऽवाचि, त्वयाऽत्यनुचितं वचः ।
किं तद्गोप्यं किमप्यस्ति ? चित्ताद् यदपलप्यते ? ॥३०॥

---

२. क्षणं उत्सवं आनन्दं यावत्, तं ददाति - क्षणदा, न क्षणदा अक्षणदा, अथवा क्षणं द्यति छिनत्ति इति क्षणदा ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न रुजा नेष्टनाशो मे, नार्थहानिर्मनागपि ।
अपमानान्महीभर्तुराधिः कापि न मानसे ॥३१॥
परमेतदपुत्रत्वमनिशं बाधतेऽधिकम् ।
हृदयेऽवस्थितं शल्यमतुल्यमिव लिप्तकम्[3] ॥३२॥
श्रुत्वेति सा पुनः प्राह, प्रिये ! कोपि न कर्मणाम् ।
विभुर्भवि तथापि स्युः, सिद्धयो न विनोद्यमम् ॥३३॥
सर्वकामदमेकाग्रं, त्रिसन्ध्यं देवपूजनम् ।
विधेहि धेहि तद्धर्मे, मतिं मतिमतांवर ! ॥३४॥
सुगुरोश्चरणद्वन्द्वमद्वन्द्वसुखदायकम् ।
वरिवस्य तथा वित्तं, दत्त्वार्थिषु कृतार्थय ॥३५॥
निर्निदानं मुदा दानं, पात्रेभ्यो देहि शुद्धधीः ।
जिनेश्वरवचश्चारु पुस्तकेषु निवेशय ॥३६॥
यद्येवं कुर्वतः पुत्रो, भावी तत् तव सुन्दरम् ।
अन्यथा परलोकाय, कृतं सुकृतसेवनम् ॥३७॥
**धनो**ऽमन्यत तत्सर्वं, तथेति दयितावचः ।
बालेभ्योऽप्यबलाभ्योपि, सद्भिर्ग्राह्या शुभा मतिः ॥३८॥
इदं विदधते पूर्वप्रत्यूहव्यूहहानितः ।
तस्मै तुतोष सन्तोषवते शासनदेवता ॥३९॥
**धन**स्याथ प्रसुप्तस्य, प्रत्यक्षीभूय सा निशि ।
उवाच वत्स ! दत्तस्ते, कुलोद्योतकरः सुतः ॥४०॥
अथान्यदा निशाशेषे, **सत्यभामा**ऽस्य गेहिनी ।
शयनीये सुखस्पर्शे, सुप्ता गङ्गाजलोज्ज्वले ॥४१॥

---

३. विषाक्तं शरम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कण्ठावलम्बिसुमनःश्रेणीभिः समलङ्कृतम् ।
मुखस्थपद्मसौरभ्यलुभ्यद्भ्रमरबन्धुरम् ॥४२॥

मूर्तं पुण्यमिवात्मीयमानन्दस्येव सञ्चयम् ।
शातकुम्भमयं स्वप्ने, पूर्णकुम्भं निरैक्षत ॥४३॥ त्रिभिर्विशेषकम् ॥

प्रातर्निवेदयामास, सा पत्ये मुदिताशया ।
सोऽपि स्वप्नमभाषिष्ट, हृष्टस्तत्पुत्रसम्भवम् ॥४४॥

तदादि गर्भं सा बभ्रे, समं दयितसंमदैः ।
रसैर्मितैर्हितैर्यत्नात् तोषपूर्णा पुपोष च ॥४५॥

काले च सुषुवे पुत्रं, प्रातः प्राचीव भास्करम् ।
सच्चक्रनन्दनपटुं, पितृदुःखतमोपहम् ॥४६॥

**धनदत्तो**पि विज्ञप्य, भूपं कारितवान्पुरे ।
गन्धनीरच्छटां राजमार्गे मञ्चविपञ्चनम् ॥४७॥

उत्तमाङ्गेन निर्यातः, सीमन्तघुसृणच्छलात् ।
तज्जन्मरङ्गो नारीणामसंमानिव मानसे ॥४८॥

सुते कलाविलासिन्योद्रक्ष्यन्त्यत्र मुखं सुखम् ।
इतीव न्यासि वंशाग्रे, दर्पणः शिशुपाठकैः ॥४९॥

महोत्सवे व्यतिक्रान्ते, षष्ठीजागरणादिके ।
बन्धून्निमन्त्रयामास, द्वादशे दिवसे पिता ॥५०॥

मङ्गल्यकारकः कुम्भः, स्वप्ने मात्राऽस्य वीक्षितः ।
'**मङ्गलकलश**' इति, चक्रे नाम ततः शिशोः ॥५१॥

धात्रीभिर्लाल्यमानोऽथ, साकं पितृमनोरथैः ।
वर्धमानो बभूवायमष्टवर्षवयाः क्रमात् ॥५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उद्यानं गतवानेष, जनकेन सहैकदा ।
श्रेष्ठिनं च शिशुः कोऽयमिति पप्रच्छ पुष्पचित्[४] ॥५३॥
पुत्रो ममेति तेनोक्ते, तत्तदौचित्यकृत्यवित् ।
मालिको बालकायादाल्लाङ्गलीफललुम्बिकाम् ॥५४॥
उवाच पितरं बालो, विनीतो गृहमागतम् ।
अहमेवान्वहं याता, तातारामं सुमोच्चये ॥५५॥
तेनोक्तं वत्स ! मार्गस्यानभिज्ञस्त्वम् शिशुत्वतः ।
शिरीषसुकुमाराङ्गः स चारामोऽतिदूरतः ॥५६॥
स प्राह विदितस्तात !, मार्गः संप्रति गच्छतः ।
का च मे पितुरादेशं, कुर्वतः सुकुमारता ? ॥५७॥
इत्याग्रेहेण गच्छन्तं, पितरं विनिवार्य सः ।
उद्याने स्वयमेवागान्नित्यं जनकभक्तिभाक् ॥५८॥
प्रसूनान्यानयन्नित्थं, स मेधाजितवाक्पतिः ।
अन्तरन्तधीयानोऽकलयत्सकलाः कलाः ॥५९॥
इति **मङ्गलकुम्भो**ऽयं, निदेशं विदधत् पितुः ।
क्रमेण मध्यमध्यास्त, शावभावयुवत्वयोः ॥६०॥
इतश्च पूरि **चम्पायां,** रमाजितपुरन्दरः ।
कृतद्वेषिदरः पृथ्वीनाथोऽस्ति **सुरन्दरः** ॥६१॥
महिषी तस्य निस्तन्द्रचन्द्रोज्ज्वलगुणावली ।
**गुणावली**ति विख्याता, लावण्यरसवाहिनी ॥६२॥
तदङ्गजा गजगतिर्नाम्ना **त्रैलोक्यसुन्दरी** ।
उत्सङ्गसङ्गिफलवल्लतास्वप्नेन सूचिता ॥६३॥

---

४. पुष्पाणि चिनोति इति पुष्पचित्, मालिकः इति ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यदा सा समाजस्थं, महिनाथमुपस्थिता ।
नन्तुं गुणावलीदेव्यादेशाद् यौवनशालिनी ॥६४॥
तां वीक्ष्य क्ष्मापतिर्दक्षश्चिन्तयामास चेतसि ।
कोऽनुरूपः सरूपाया, वरोऽमुष्या भविष्यति ? ॥६५॥
विचिन्त्येति समाजं स, विससर्ज महीपतिः ।
मध्येऽन्तपुरमागत्य, तच्च देव्यै न्यवेदयत् ॥६६॥
तया पराभिरप्यूचे, नाथेयं दुहिता तव ।
एककैव ततोऽमुष्या, न वियोगं क्षमामहे ॥६७॥
अत्रैव पुरि कस्मैचित् तदेतां प्रतिपादय ।
तद्गृहात् तूर्णमागत्य, नित्यं सङ्गच्छते यथा ॥६८॥
ऊचे **सुबुद्धि**नामानमथामात्यं क्ष्मापतिः ।
मत्सुतां मन्निदेशात् त्वं, स्वसुतेन विवाहय ॥६९॥
विभाव्य मन्त्री त्वग्दोषदूषितं स्वसुतं हृदि ।
ऊवाच किमिदं स्वामिन्नुच्यतेऽनुचितं वचः ? ॥७०॥
क्वैरावतः क्व च हुडुः ?, क्व पारीन्द्रः क्व जम्बुकः ? ।
क्व गरुत्मान् क्व मशकः ?, क्व नागेशः क्व राजिलः ? ॥७१॥
क्व पीयूषं क्व सौवीरं ?, क्व समुद्रः क्व गोःपदम् ? ।
देवः क्व विश्वसंसेव्यः ?, क्वाहं देवसेवकः ? ॥७२॥
किं च स्यान्न यथा प्रद्योतन-खद्योतपोतयोः ।
सम्बन्धः सुन्दरो देव !, सेव्य-सेवकयोस्तथा ॥७३॥
तं प्रत्याह नराधीश, ईदृशं भद्र ! मा वद ।
यतो द्वयोर्गुणवतोः, सम्बन्धः शोभते भृशम् ॥७४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गुणैर्विभाति सम्बन्धो, जन्मना भिन्नयोरपि ।
अन्यान्यदेशागतयोर्मणिकाञ्चनयोरिव ॥७५॥

इति गाढाग्रहं मत्वा, महीनाथस्य धीसखः ।
तन्मन्ये[५], सेवकाः स्वामिवाचां न विमुखाः क्वचित् ॥७६॥

एवं विचिन्तयामास, मन्त्री मन्दिरमागतः ।
मया स्वामिसमादेशः, कथं निर्वाहयिष्यते ? ॥७७॥

एष व्याघ्रतटीन्यायो, ममेदानीमुपस्थितः ।
न चैतन्निस्तरिष्यामि, देवतानुग्रहं विना ॥७८॥

इत्याशु सचिवः कृत्वा, स्वधियैव विनिश्चयम् ।
एवं व्यजिज्ञपद्गोत्रदेवीं विरचिताञ्जलिः ॥७९॥

अपारचिन्ताऽकूपारे, त्वद्भृत्यस्य निमज्जतः ।
दुःखौघकर्शनं, देवि !, दर्शनं तव पोतवत् ॥८०॥

इत्युक्त्वा दर्भगर्भेण, सस्तरं विरचय्य सः ।
तस्या एव पुरः शिश्ये, तदनुध्यानबद्धधीः ॥८१॥

अथ विश्वक् प्रभापूरैर्दूरीकृततमोभरा ।
सचिवं शर्वरीशेषे, बभाषे कुलदेवता ॥८२॥

विहितं मदनुध्यानं, वत्स ! स्वच्छमते कथम् ? ।
इत्याकर्ण्य प्रमुदितो, बभाषे धीसखस्ततः ॥८३॥

जाङ्गुलीमन्त्रसङ्काशत्वत्प्रसादप्रभावतः ।
मत्पुत्रकायबिलतो यातु रोगोरगः क्षयम् ॥८४॥

देव्यूचे तव पुत्रस्य रोगपूगक्षयो मया ।
कर्तुं न पार्यते विश्वे, नूनं भोग्यं हि भुज्यते ॥८५॥

---

५. यदि 'तन्मेने' पाठः, तर्हि सुष्ठु ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद् वज्रमयदेहास्ते, शलाकापुरुषा अपि ।
न मुच्यन्ते विना भोगं, स्वनिकाचितकर्मणः ॥८६॥

सचिवः प्राह यद्येवं, तदन्यं कञ्चिदानय ।
यो दत्तेऽवक्रयेणापि, परिणीय नृपात्मजाम् ॥८७॥

देवताह विधातास्मि, सर्वं त्वद्भक्तितोषिता ।
यथा स्याद् भक्तितस्तुष्टिर्देवानां न तथाऽर्चनात् ॥८८॥

अस्या एव पूरो दूरे, शीतार्त्तो यः कुमारकः ।
वह्नौ तापयते कोऽपि, स्थानपालतटस्थितः ॥८९॥

तं गुप्तमाप्तेनानाय्य, राजकन्यां विवाहयेः ।
सचिवं शिक्षयित्वैवं, कुलदेवी तिरोदधे ॥९०॥ युग्मम् ॥

अनुद्विग्नमना लग्नं, गणकैर्विगणय्य सः ।
पाणिपीडनसामग्रीं, समग्रामप्यकारयत् ॥९१॥

यः कश्चिन्मन्दुरापार्श्वे, रम्यरूपः कुमारकः ।
समभ्येति समानेयः, प्रच्छन्नं स ममान्तिकम् ॥९२॥

त्वयैवं कुर्वता स्माकमादेशः सर्वथाकृतः ।
स एकं मन्दुरापालमाकार्यैवमशिक्षयत् ॥९३॥ युग्मम् ॥

देवतापि विशालायां, गत्वा तद्वनसन्निधौ ।
इदं **मङ्गलकुम्भाग्रे**, व्योमस्था समभाषत ॥९४॥

कुमारकोऽयमुद्वोढाऽवक्रयेण नृपात्मजाम् ।
इति व्योमवचः श्रुत्वा, विस्मितोऽयं व्यचिन्तयत् ॥९५॥

कोऽयं ब्रवीति व्योमस्थो युक्तिमुक्तमिदं वचः ।
पित्रे निवेदयिष्यामि, ध्यायन्निति गृहं ययौ ॥९६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्य व्याक्षिप्तचित्तस्य, विसस्मार च तद्वचः ।
अन्यदाऽपि तदाश्रौषीत्, सुमार्थं वाटिकां व्रजन् ॥९७॥
अवश्यमेव तातायावेदयिष्यामि साम्प्रतम् ।
तस्यैवं ध्यायतो वात्या, प्रादुराशीत् क्षणादथ ॥९८॥
तदा तत्पितरौ स्नेहादनायाते गृहं सुते ।
विमुच्यान्नं स्फुरच्चिन्तौ, विलापानिति चक्रतुः ॥९९॥
हा वत्स ! स्वच्छमहत्वकुलकैरवचन्द्रमः ! ।
हा चन्द्राभयशोऽम्भोजराजहंससमप्रभ ! ॥१००॥
हा राजहंसप्रतिमैरभिरामैर्गुणोत्करैः ।
हा रामचन्द्रचरित !, क्व गतो ? देहि दर्शनम् ॥१०१॥
ततस्तत्प्रतिबोधाय, तद्भाव्यं पाणिपीडनम् ।
अपहारादिवृत्तान्तमाचष्टे शासनाऽमरी ॥१०२॥
मनसाऽपि नरोयन्न, कदाचिदपि चिन्तयेत् ।
नूनं तत्रापि विस्फूर्तिमियर्ति विधिजृम्भितम् ॥१०३॥
जन्तूनां नियतेर्योगाज्जायमानं शुभाशुभम् ।
वारिधेरिवकल्लोलजालं केन निवार्यते ॥१०४॥
स तया वात्ययोत्पाट्य तूलपूल इवाम्बरे ।
**चम्पा**पूर्निकटाटव्यां, भीषणायाममुच्यत ॥१०५॥
भ्रमन्ति यमदोर्दण्डप्रचण्डाकारधारकाः ।
मणित्विषिनखा यत्र जन्तून् लातुं बिलेशयाः ॥१०६॥
यस्यां जनङ्गमाचारा, जङ्गमाः पापमूर्तयः ।
कलिकालप्रतिच्छन्दा इव खेलन्ति नाहलाः ॥१०७॥ युग्मम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अयमीदृगरण्यान्यामविज्ञातहरिद्गणः ।
मार्गं विमार्गयन् यूथभ्रष्टो मृग इवाभ्रमत् ॥१०८॥

अथाह्वयन्तमध्वन्यान् तटद्रुविहगस्वनैः ।
सवारि वारिभृत्साम्यशालि पालिद्रुमावलिम् ॥१०९॥

नवभ्योऽभिनवं भूमौ, सुधाकुण्डमिवागतम् ।
विष्वक् पालिच्छलाद् भूमौ, रक्ष्यमाणं महाहिना ॥११०॥

कुम्भोद्भवभयान्मूर्तिं लघूकृत्य वनान्तरे ।
नष्टं क्षीरोदधिमिव भृङ्गाम्भोदचयाञ्चितम् ॥१११॥

तटद्रुमप्रतिच्छायशिलोच्चयशताङ्कितम् ।
सूर्यबिम्बप्रतिबिम्बलसद्वाडवसंश्रितम् ॥११२॥

इतस्ततः परिभ्राम्यत्कस्मिंश्चिन्निर्जने वने ।
कासारं पद्मिनीखण्डसारमीदृक्षमैक्षत ॥११३॥ पञ्चभिः कुलकम् ॥

तत्र स्नात्वा स पीत्वा च, जलं पालिवटद्रुमे ।
वटपादैः समारुह्य प्रौढमार्गं व्यमार्गयत् ॥११४॥

अथ मित्रस्तदीयेन दुखेनेवातिपीडितः ।
अस्ताद्रिमौलिमारुह्य, पतति स्म पयोनिधौ ॥११५॥

या तमःप्रणिधिश्रेणी वृक्षछायाच्छलादभूत् ।
वासरे वासरेशस्योस्त्रैः साऽधावत सर्वतः ॥११६॥

क्रीडत्कालकिरातस्य कराद्भग्नांशुपञ्जरः ।
नष्टो जवेन हंसो[६]ऽयमपराम्भोधिमाविशत् ॥११७॥

सञ्जाते गोपतेरस्ते भाति राजनियोजिता ।
भृङ्गालिः श्रीगृहाम्भोजद्वारि यन्त्रणशृङ्खला ॥११८॥

---

६. रविः ।

प्रत्यक्षकुम्भ-मकर[७] मीन-कर्कसमाश्रयम् ।
हंसं विना गतश्रीकं तदा व्योमसरोऽभवत् ॥११९॥

सोऽथ न्यग्रोधमारूढ उत्तरेण हुताशनम् ।
प्रज्वलन्तं निशाशेषे दृष्ट्वाऽहृष्यत् कुमारकः ॥१२०॥

तमुद्दिश्य गतस्तप्यमानश्च स्थानपालकैः ।
सुशीलः प्रहतोऽश्लीलप्रहारैरेष मस्तके ॥१२१॥

एकेन स्थानपालेन, स्मृत्वा तन्मन्त्रिभाषितम् ।
तेभ्योऽपसार्य विजने, स वह्नौ तापितः क्षणम् ॥१२२॥

तदैव चार्पयामास, मन्त्रिणे स कुमारकम् ।
तं च देवकुमाराभं, दृष्ट्वा हृष्यन्महत्तमः ॥१२३॥

अनिशं सरसैरन्नपानैः पोषयति स्म तम् ।
विजने स्थापयित्वा च, रक्षयामास यामिकैः ॥१२४॥

एकदा सचिवस्तेन, पृष्टस्तात ! कुतो मम ।
यत्नो वैदेशिकस्यापि, किं नामा त्वं ? पुरी च का ? ॥१२५॥

तेनोक्तं विदधे वत्स !, स्वार्थेन तव गौवरम् ।
इयं **चम्पापुरी** ख्याताऽहं च तन्नाथधीसखः ॥१२६॥

कः स्वार्थो बालकेनेति, पृष्टेऽथ सचिवोऽब्रवीत् ।
स्वार्थं निवेदयिष्यामि, कस्मिंश्चित्समये तव ॥१२७॥

गतेषु वासरेष्वेष, कियत्स्वपी स तं पुनः ।
स्वार्थं प्रपच्छ सोऽथास्मै, स्वाभिप्रायं न्यवेदयत् ॥१२८॥

असौ विधुरकः प्राह, तात ! पातककारकम् ।
आः ! किमुक्तं युक्तिमुक्तं, वचः कुलकलङ्ककृत् ॥१२९॥

---

७. प्रत्यक्षकं तु मकरं - पा-१ ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क एवं कुरुतेऽन्यायं, कन्यामन्यार्थमुद्वहन् ।
बालेनेत्यूदिते मन्त्री, कुपितोऽन्तकवद्भृशम् ॥१३०॥

निस्त्रिंशवृत्तो निस्त्रिंशं, विकोशीकृत्य धावितः ।
कृपाद्रैर्यामिकैर्मन्त्री न्यवारित्क्रूरकर्मतः ॥१३१॥

तैर्बोधितः स बालोऽपि, व्यालोक्य मतिचक्षुषा ।
ऊचे तन्मम दातव्य, यल्लेभे करमोचने ॥१३२॥

इति **मङ्गलकुम्भो**क्तं, सचिवः प्रत्यपद्यत ।
सर्वं च सज्जयामास, क्रमाद्वैवाहिकं विधिम् ॥१३३॥

अथ व्योम्नः प्रतिच्छन्दमिव मण्डपमुत्तमम् ।
आदेशकारकैर्भूपः, स्वानुरुपमकारयत् ॥१३४॥

कुमारकः कृतस्नानः, कृतचन्दनलेपनः ।
सदशश्वेतवसनो, हस्तविन्यस्तकङ्कणः ॥१३५॥

दत्तकुङ्कुमहस्तोऽथ हस्त्यारूढो विभूषणैः ।
उत्तुङ्गमेरुशृङ्गाग्ररूढकल्पद्रुमोपमः ॥१३६॥

द्राधीयोभिर्वरस्त्रीणां, उलूलुध्वनिभिर्भृशम् ।
पञ्चस्वनैश्च विदधद् दिवं नादमयीमिव ॥१३७॥

कृतशक्रधनुर्दण्डैर्मायूरातपवारणैः ।
वार्यमाणातपः प्राप, मण्डपद्वारसन्निधिम् ॥१३८॥ चतुर्भिःकुलकम् ॥

उत्तीर्य कुञ्जरात् तुङ्गात्, कुलस्त्रीभिः कृतं तदा ।
अर्घमेष प्रतीयेष, प्रद्योतन इव प्रगे ॥१३९॥

सम्प्राप्ते च शुभे लग्ने, ग्रहदोषादिवर्जिते ।
अमील्यत करौ मङ्क्षु, वरवध्वोः पुरोधसा ॥१४०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्षौमाणि मङ्गले चाद्ये, भूषणानि द्वितीयके ।
तृतीये स्वर्ण-माणिक्यं, रथाश्वादि चतुर्थके ॥१४१॥
दत्वैवमुचितं भूपो, वधूकरममोचयत् ।
ऊचे च तं पुनः किञ्चिद्, याचस्व विषयं वरम् ॥१४२॥
देव ! पञ्च प्रदीयतां, पञ्चवल्लभवाडवाः ।
स्तोकं त्वयेष्टमित्युक्त्वा, ददौ भूपस्तुरङ्गमान् ॥१४३॥
सोऽथ वासगृहं यावत्प्रविष्टः किङ्करीजनैः ।
निर्वास्यतामयं तावदिति प्रोचे मिथः शनैः ॥१४४॥
एषोऽपि तत्समाकर्ण्य, विचार्य मनसा क्षणम् ।
देहचिन्तामिषेणाशु, निर्ययौ वासमन्दिरात् ॥१४५॥
स्वर्णपात्रं पयःपूर्णं, तूर्णमादाय पाणिना ।
राजकन्याऽपि तत्पृष्टमगाच्छायेव देहगा ॥१४६॥
आयान्तं देहचिन्तायाः, पतिमुन्मनसं तदा ।
वीक्ष्य प्राह वधूर्नाथ !, किमु त्वां बाधते क्षुधा ? ॥१४७॥
तस्मिन्नजल्पति वधूः, प्रेक्ष्य चेटीं **प्रियङ्करीम्** ।
स्थालमानाययच्चित्तमोदकैर्मोदकैर्भृतम् ॥१४८॥
एकस्थालस्थितास्ताभ्यां, चातुर्जातकसंस्कृताः ।
उभाभ्यामप्यभुज्यन्त, सिंहकेसरमोदकाः ॥१४९॥
तेनाऽदताऽस्याः स्वस्थानज्ञापनायेत्यभाषत ।
मोदका मोदका एते, **विशाला**वारिणा परम् ॥१५०॥
विस्मिता चिन्तयच्चेति, तदाकर्ण्य नृपाङ्गना ।
कथमीदृगसम्बद्धमार्यपुत्रेण भाषितम् ? ॥१५१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**विशाला**नगरी यस्मात्सा योजनशतान्तरा ।
भविता यदि वा तत्र, गेहमेतत्प्रसूपितुः ॥१५२॥
विचिन्त्येति लवङ्गैलाकर्पूरसुरभीकृतम् ।
ताम्बूलं सा ददौ स्वस्य, सरङ्गमिव मानसम् ॥१५३॥
देहचितामिषेणैष, विनिर्गत्य पुनस्ततः ।
चतुरस्तुरगान् पञ्च, लात्वाऽवन्तीं क्रमाद् ययौ ॥१५४॥
तमालोक्य समायातं, पितरौ नितरां मुदा ।
अतुच्छमुत्सवं जन्मोत्सवतुल्यं वितेनतुः ॥१५५॥
विधाप्य मन्दिराऽदूरे, मन्दुरां सुन्दराशयः ।
अश्वान् स बन्धयामास, वासवाश्वसमाश्रयः ॥१५६॥
पित्रोः स्ववृत्तमावेद्य, हृद्यां विद्याख्यवल्लरीम् ।
शिषेवाऽध्यापकाम्भोदशास्त्राम्भोभिः शुभाशयः ॥१५७॥
अयमात्मनृपो देहसौधस्थः सुमतिप्रियः ।
सुवर्णैर्भूष्यते शास्त्रैर्यथा न तु तथापरैः ॥१५८॥
राजात्मजापि पल्यङ्के, शयानं मन्त्रिनन्दनम् ।
वीक्ष्य हित्वा च तं वेगान्निरगाद् वासवेश्मनः ॥१५९॥
दासीमध्यनिषण्णा सा, विषण्णा गमयन्निशाम् ।
सचिवो नृपतिं प्रातः, सेवायातो व्यजिज्ञपत् ॥१६०॥
कल्ये कल्येन देहेन, युतो मम सुतः प्रभोः ।
त्वत्सुतास्पर्शरोगेणाक्रान्तस्तत् किं करोम्यहम् ? ॥१६१॥
श्रुत्वेति दृक्पथाद्देवी-नृपाभ्यां सा निवारिता ।
उवाच **सिंहं** राजन्यं, पितृविज्ञप्तिहेतवे ॥१६२॥

तद्विज्ञप्तेन भूपेन, सुताऽऽहूता व्यजिज्ञपत् ।
त्वज्जामातास्त्य**वन्त्यां** तत् तात ! पुंवेषमर्पय ॥१६३॥

एनं संसोध्य गृह्णामि, यथाऽहमथ तद्व्यधात् ।
**सिंह**मारक्षमादिश्य, सर्वं सर्वंसहापतिः ॥१६४॥

ययौ च राज्ञाऽनुज्ञाता, सा भटैरुद्भटैर्वृता ।
गाम्भीर्येण नृपोऽप्यस्थाद्गूढकोपश्च मन्त्रिणि ॥१६५॥

**मालवा**ऽधिपतिर्मत्वा, **चम्पा**धिपतिनन्दनम् ।
आयान्तमभ्युत्थानाद्यैः, सच्चकार विचारवित् ॥१६६॥

एषोऽन्यदा सरस्तीरे, गच्छतः सदनाग्रतः ।
पितृनामाङ्कितानश्वानादर्शद् दर्शनीयधीः ॥१६७॥

तत्पृष्टगैर्नरैर्मत्वा, तद्गृहाद्यं स शुद्धधीः ।
**सिंहे**नालोच्य सच्छात्रमुपाध्यायं न्यमन्त्रयत् ॥१६८॥

आसनाऽशनवस्त्राद्यैः, स सर्वानप्यमानयत् ।
पतिं स्वकैः स्तुतैः सर्वैर्गौरवंशः सगौरवम्[८] ॥१६९॥

वैवाहिकानिव नवान्सर्वान्सन्मान्य भूपजः ।
छात्रैः कथयितुं वीतकथामाचार्यमुचिवान् ॥१७०॥

कुमारोक्तकलाचार्यादिष्टछात्रैः क्रुधोदितम् ।
बाढं गौरवितो योऽस्ति, स कथां कथयत्वयम् ॥१७१॥

अथ **मङ्गलकुम्भ**स्तां, मत्या मत्वा निजप्रियाम् ।
स्वमुद्वाहादिकं **सिंहा**दिकानां श्रुण्वतां जगौ ॥१७२॥

---

८. 'गौरवंशः सः आसनाऽशनाद्यैः सर्वानपि अमानययत्, पतिं [च] स्वकैः स्तुतैः सर्वैः सगौरवं अमानयत् ।' इत्यन्वयः कार्यः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

लात लातैनमित्यूच्चैः, कुमारोदितवात्यया ।
तुषराशिरिवोड्डीनः, सच्छात्रः पण्डितस्ततः ॥१७३॥

अथासने निवेश्यैनं, भद्रं भद्रेभगामिनी ।
ऊचे नाथ ! कथं त्यक्ता, तदाऽहं मन्दभागिनी ? ॥१७४॥

यद्दुःखं त्वद्विना सोढं, मनसोऽपि न गोचरम् ।
सहन्तु दुःसहं तन्मा, मद्द्विषोऽपि कदाचन ॥१७५॥

इत्युदित्वा नृवेषं तं, प्रत्यर्प्य नृपतेः सुता ।
सत्कृत्य प्राहिणोत् **सिंहं**, सह सैन्यैः पितुर्गृहम् ॥१७६॥

समं **मङ्गलकुम्भो**पि, वध्वा नूतनयाऽनया ।
प्रणनाम पितुर्मातुः, पदपद्मौ यथाक्रमम् ॥१७७॥

**सिंहः** प्रत्यर्पयामास, तं नृवेषं महीभुजे ।
सोऽपि तं मुदितस्वान्त, इत्यशंसन् मुहुर्मुहुः ॥१७८॥

सत्क्रमस्य सुसत्वस्य, तवाज्ञाये(यी)भघातिनः ।
**सिंहत्रैलोक्यसुन्दर्याः** स्थाने शीलवानाऽवनम् ॥१७९॥

**अवन्ती**शमनुज्ञाप्य, सप्रियः स्वजनैः समम् ।
आयान्**मङ्गलकुम्भो**ऽपि, **चम्पा**नृपनिदेशतः ॥१८०॥

राजाऽपि मन्त्रिदुर्वृत्तं, सत्यं निश्चित्य चेतसि ।
गृहीत्वा गृहसर्वस्वं, व्यधाद् वध्यमवन्ध्यरुट् ॥१८१॥

निपत्य पादयोरेनं, जामाता पर्यमोचयत् ।
विषयं तं परित्यज्य, गतोऽसौ विषयान्तरम् ॥१८२॥

इहलोकेऽपि यद्दुःखसहनं स समुद्गमः ।
अमुत्र तु फलं किञ्चिदन्यदन्यायशाखिनः ॥१८३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राजा जामातरं चक्रे, युवराजं स भेजिवान् ।
समं **त्रैलोक्यसुन्दर्या**, सुखं त्रैलोक्यसुन्दरम् ॥१८४॥
अथास्थानधरित्रीस्थं, धरित्रीशं वनावकः ।
व्यजिज्ञपद् **यशोभद्र**गुरोरागमनं मुदा ॥१८५॥
तदाकर्ण्य क्षमाधीशः, क्षमाधीशपदाम्बुजम् ।
नन्तुं जगाम स वने, नामतोपि **मनोरमे** ॥१८६॥
सुधोर्मिवर्मितां तत्र, श्रुत्वा तद्देशनागिरम् ।
राज्ये जामातरं न्यस्य, स्वयं दीक्षामुपाददे ॥१८७॥
परोपि भङ्क्त्वा विद्वेषिशाखिशाखां महाबलः ।
हरितोऽलम्भयत्कीर्तिसौरभं सौरभङ्गिभृत् ॥१८८॥
कुस्वामिचरितग्रीष्मशुष्कं नीतिलतावनम् ।
सुवृत्तेनोन्नताब्देन, नृपतिर्निरवापयत् ॥१८९॥
**जयसिंहो**ऽन्यदा ज्ञानी, मुनिर्नत्वा महीभुजा ।
प्राग्भवं स्वस्य देव्याश्च, पृष्टः स्पष्टं न्यवेदयत् ॥१९०॥
**क्षितिप्रतिष्ठित**पुरे, पुराऽभूत् कुलपुत्रकः ।
**सोमचन्द्रं** इति ख्यात, **श्रीदेव्यस्य** कुटुम्बिनी ॥१९१॥
वयस्यो **जिनदत्तो**ऽस्य, श्राद्धः श्रद्धाविशुद्धधीः ।
गच्छन् देशान्तरं तस्मै, दानाय स्वं स्वमार्पयत् ॥१९२॥
तस्मिन्देशान्तरं प्राप्ते, तदीयं ददतो धनम् ।
अमुष्यापि क्रमाद् दानश्रद्धामानसमानसे ॥१९३॥
**श्रीदेव्या** अपि तद्दृष्ट्वा, दानधर्मेऽभवन्मतिः ।
कुलपुत्रेण पात्रशात् कृतं स्वं स्वं नयार्जितम् ॥१९४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वीक्ष्य **भद्रा** सहचरी, पतिं त्वग्दोषदूषितम् ।
**श्रीदेव्या** गदितं हास्यात् तस्याः सम्मुखमीदृशम् ॥१९५॥

सखिकेऽङ्गप्रभावस्ते, स्वपतिर्येन दूषितः ।
**भद्रा** तदा तदाकर्ण्य, हृदि दोदूयते स्म सा ॥१९६॥

क्षमितेति क्षणादूर्ध्वं, वयस्ये ! मा कृथा वृथा ।
खेदं हृदि यतो जन्तोः, कर्मैव कुरुतेऽखिलम् ॥१९७॥

अथ **सोमेन्दु**-तत्पत्न्यौ, मृत्वा जातौ युवां क्रमात् ।
जातः परार्थदानेनाऽवक्रयोपयमस्तव ॥१९८॥

सख्याश्च दोषदानेन त्वत्प्रियायाः कलङ्किता ।
ईदृग् मुनिवचः श्रुत्वा, जज्ञे जातिस्मृतिस्तयोः ॥१९९॥

राज्ये निवेश्य तनयं, सनयं भूपतिस्ततः ।
समं **त्रैलोक्यसुन्दर्या**, प्रव्रज्य स्वर्गभागभूत् ॥२००॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ६. श्रीमुनिभद्रसूरिविरचितम्
# मङ्गलकलशकथानकम् ॥

संजज्ञिरे प्रथमतीर्थकरस्य तस्य,
पुत्राः शतं **भरत**चक्रिमुखा नरेन्द्राः ।
ज्ञानत्रयावगतविश्वविशेषकृत्यः
सांसारिकव्यवहृतिं समदीदृशद् यः ॥१॥ [वसन्ततिलका]

तेषु प्रतापभवनं समजायतैकः
श्रीमा**नवन्ति**रिति विश्रुतनामधेयः ।
पुत्रः पवित्रचरितः पितृदत्तदेश-
स्तस्याख्ययैव विषयः प्रथितोऽस्**त्यवन्तिः** ॥२॥

क्षेत्रेषु यत्र विविधैरपि धान्यजातै-
र्जातैः समस्तधरणीतलपूर्तिकारैः ।
स्वस्यावकाशमधिवस्तुमविन्दमानं
दुर्भिक्षमन्यविषयं रभसाद् बभाज ॥३॥

तुङ्गेक्षुदण्डविपिनं मिलिताग्रभागं
पार्श्वद्वयेऽपि सरसं समवेक्षमाणाः ।
नैदाघदाघसमयेऽपि पथि प्रवृत्ताः
पान्थाः श्रमं किमपि यत्र न जानते स्म ॥४॥

श्यामाककोद्रवकुलित्थकराजमाषा-
कङ्ग्वादिकं कदशनं समवेक्ष्यते न ।
विज्ञायते न खलु यत्र च नालिकेर-
द्वीपाधिवासिपुरुषैरिव जातवेदाः ॥५॥ त्रिभिर्विशेषकम् ॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत्रास्ति चैत्यरुचिरा नगरी **विशाला**
शश्वत्समृद्धिसमुदायमहाविशाला ।
अभ्रंकषोच्चकपिशीर्षकशालिशाला
शुभ्रांशुमण्डलसमुज्ज्वलचित्रशाला ॥६॥

यस्याः प्रसिद्धममृतं किमु नामृतं त-
न्माधुर्यधुर्यमुपमानविवर्जितं यत् ।
अन्यद् भवेद्यदि कुतः परिदृश्यते न
तस्मात् तदप्यमृतमेव वितर्कयामः ॥७॥

एकाग्रमानसतया महतां जिनेन्द्रान्
साधून् गुरून् प्रणमतां ददतां धनानि ।
साधर्मिकानपि च भोजयतां यथेच्छं
यस्यां दिनानि किल पुण्यवतामगच्छन् ॥८॥

सद्विद्ययैव विनयः कृपयैव धर्मः
स्नेहः प्रकर्षमतुलं कलयन्प्रकृत्या ।
त्यागः श्रिया सह समेत्य कुटुम्बभाव-
मापद्य यत्र वसति स्म नयेशभाजि ॥९॥

**वाराणसी** दिविषदापगया यथैव
पाथोब्जिनीशसुतया **मथुरा** यथैव ।
**श्रीकोशला**पि नगरी च यथा सरय्वा
या **शिप्रयै**व सरिताऽपि तथा विभाति ॥१०॥

लोकप्रशासननिमित्तविधौ नृसिंहः
प्रत्यर्थिपार्थिवमहेभविभेदसिंहः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आसीन्महीपतिरशेषमहीद्रसिंह-
स्तत्राभिधानविदितः स तु **वैरिसिंहः** ॥११॥

एकेन येन सकलार्थिसमीहितानि
सम्पादितानि समवेक्ष्य विलज्जमानाः ।
ते दुर्गमेरुगिरिगह्वरबद्धवासाः
पञ्चापि नूनमभवन्सुरशाखिनोऽपि ॥१२॥ युग्मम् ॥

जायापि तस्य समजायत **सोमचन्द्रा**
स्वाङ्गेत्थगौरिमपराजितसोमचन्द्रा ।
आस्यप्रभाहसितशारदसोमचन्द्रा
सौजन्यवासपरिवर्द्धितसौम्यचन्द्रा ॥१३॥

सौभाग्यलक्षणगुणेन विचक्षणा या
कात्यायनीं पशुपतेर्दयितामजैषीत् ।
उल्लासियौवनविलासमनोहराङ्गी
किं शक्तिरप्रतिहता न हि निर्मिमीते ? ॥१४॥ युग्मम् ॥

श्रेष्ठी वरिष्ठगुणरत्नमहासमुद्र-
स्तत्राजनिष्ट सुमतिर्**धनदत्त**नामा ।
राजप्रसादसदनं सदनन्तकीर्तिः
सङ्ख्यातिगद्रविणनिर्जितराजराजः ॥१५॥

शङ्कां कदापि न चकार विकारहीनो-
नाकाङ्क्षणं क्वचन यो विचिकित्सनं न ।
मिथ्यादृशां स्तवनसंस्तवने न चापि
सम्यक्त्वमात्ररतिरेव विवेकपात्रम् ॥१६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

योे वीतरागपदपूजनमाचचार
    यः श्रद्धया गुरुपदप्रणतिं चकार ।
धर्मं दयासमुदितं हृदि यो बभार
    रत्नत्रयं परमभूषणमाश्रयद्यः ॥१७॥ त्रिभिर्विशेषकम् ॥

भार्यापि तस्य समपद्यत **सत्त्यभामा**
    चन्द्रावदातधनसातगुणाभिरामा ।
पुण्यानुभावपरिपूरितचित्तकामा
    शीलश्रियावमतविश्वविवर्तिवामा ॥१८॥

अर्द्धाङ्गदानकपटेन महेश्वरेण
    संरक्ष्यमाणनिरवग्रहविभ्रमां यत् ।
गौरीं जहास धनदत्तधनेशपत्नी
    व्रीडां वहन्त्यजनि तेन च साऽत्र काली ॥१९॥ युग्मम् ॥

सार्द्धं तयाप्यनुभवन् विषयोत्थसौख्यं
    मासानिवागमयदद्भुतऋद्धिरब्दान् ।
मासान् दिनानिव दिनानिव सोऽपि यामान्
    यामान् क्षणानिव विचक्षणमौलिरत्नम् ॥२०॥

अन्येद्युरात्मसदनं समुपेत्य भूप-
    प्रासादतः सुदयया परिवीतमूर्तिः ।
पूजां वितत्य भुवनाधिपतेः प्रदोषे
    संभाव्य विभ्रमवचोभिरसौ स्वजायाम् ॥२१॥

निद्रासुखं समनुभूय निशावसाने
    किञ्चिद् विचिन्तयति स स्म परं प्रबुद्धः ।

मुक्ताफलानि यवनालकराशिवन्मे
हर्म्ये बृहत्कुवलिकाफलमानवन्ति ॥२२॥ युग्मम् ॥

क्षौमाणि सन्ति विविधानि विचित्रभाञ्जि
गौणीवदङ्गणगतानि परःशतानि ।
मृत्सेष्टकावदमिताः कनकेष्टकाश्च
पाषाणवद् रजतखण्डकदम्बकानि ॥२३॥

वाहा दिवाकरमहारथवाहवाह-
दर्पापहारपटिमानममी वहन्तः ।
संख्यातिगाः किमिह सन्ति न मन्दुरायां
सप्ताननं प्रथितनामतया हसन्तः ॥२४॥

ईशानवाहनमहावृषभानुकारा-
भाङ्कारनादजितभाद्रपदाम्बुवाहाः ।
कैलासशैलशिखरोच्चतरप्रमाणाः
मद्गोकुलेऽत्र वृषभा बहवोऽपि सन्ति ॥२५॥

वज्राकरेऽपि न भवन्ति च यानि वज्रा-
ण्यत्रैव तानि बहुधा द्युतिमन्ति सन्ति ।
माणिक्यमुख्यमणिसञ्चय एव सर्वः
सर्वात्मनैव गगने यदिवोडुचक्रम् ॥२६॥

सर्वं तदेतदफलं तनयं विना मे
विद्यास्थितेर्गुणगणो विनयं विनेव ।
स्फाती रसेशितुरनल्पनयं विनेव
चारित्रमुज्ज्वलतरं च शमं विनेव ॥२७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नेपथ्यजातमखिलं तिलकं विनेव
शीलं विनेव विनयं सुभगं कलत्रम् ।
प्रासादसर्जनमिदं कलसं विनेव
काव्यं सुबद्धमपि चारुरसं विनेव ॥२८॥

पुत्रं विना न भवनं सुषमां दधाति
चन्द्रं विनेव गगनं समुदग्रतारम् ।
सिंहं विनेव विपिनं विलसत्प्रतापं
क्षेत्रं स्वरूपकलितं पुरुषं विनेव ॥२९॥

तत्किं करोमि कमहं शरणं प्रपद्ये ?
कस्याश्रयामि सुगुरोश्चरणाब्जयुग्मम् ? ।
यस्य प्रसादवशतस्तनयो ममापि
संपद्यते सपदि सम्मदमादधानः ॥३०॥

इत्थं विचिन्तयत एव विभातकृत्यं
यावन्न तस्य मनसो विषयं बभाज ।
तावत्समेत्य रभसात् सह संभ्रमेण
तत्प्रेयसी प्रियमिदं निजगाद वाक्यम् ॥३१॥

किं द्रव्यहानिरभवद् भवतां कुतश्चित् ?
किं यानपात्रमुदधौ निममज्ज किञ्चित् ? ।
काचिद् रुजा किमुत बाधत एव देहे ?
दुःस्वप्नदर्शनमहो किमथापि जज्ञे ? ॥३२॥

राज्ञोऽपमानमथवा हृदये दधध्वे
योषां विशेषसुभगां यदि वापि काञ्चित् ? ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चिन्तां यतो वहथ तेन वितर्कयामि
नाकारणं किमपि कार्यमवेक्ष्यते हि ॥३३॥

मत्तो न चेद्हृदयनायक ! गोप्यमस्ति
सद्यः प्रसद्य तदिदं स्वयमेव वाच्यम् ।
यस्मान्मुखेन्दुवचनामृतमाऽऽप्य पत्युः
स्त्रीणां मनांसि समदं प्रमदं वहन्ति ॥३४॥

तस्या निशम्य वचनं गिरमुज्जगार
श्रेष्ठी प्रहृष्टहृदयः सदयः स दक्षः ।
कान्ते ! किमेतदनुदीरितपूर्वमीदृग्
निर्व्याजभक्तिपरया जगदे भवत्या ॥३५॥

गोप्यं बहिर्विषयतः क्रियतेऽपि धीरै-
श्चित्तान्न किञ्चन विवेचनचारुबुद्धे ! ।
मच्चित्तभित्तिमधिशय्य विरिञ्चिनापि
पाञ्चालिकेव भवती लिखिता न वा किम् ? ॥३६॥

नैवार्थहानिरुदधौ न च पोतभङ्गो-
रोगो न कोऽपि शयने न च दुर्निरीक्षा ।
क्ष्मावासवस्य मम कोऽपि न चापमान-
श्चित्तं न तापयति काचन पद्मनेत्रा ॥३७॥

अर्थस्य हानिमुपलभ्य त एव तापं
कुर्वन्ति येऽर्जयितुमर्थमयेऽसमर्थाः ।
अस्मादृशाः पुनरुदारतयाऽर्थहान्या-
जल्पन्त्यमङ्गलमुपागतमाहतं नः ॥३८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ताम्यन्ति केऽत्र जलधावपि पोतभङ्गे
पूजा यतो भवति सा जलदेवतायाः ।
तीर्थङ्करस्य हि वरं प्रतिमाप्रतिष्ठा
कालेऽर्हणाप्यभिमता जलदेवतायाः ॥३९॥

कश्चिन्न रोगमधिगम्य नरो गतार्थः
सन्तापमाश्रयति विश्रुतबुद्धिधारः ।
यस्मादुपार्जितमवश्यमवेदयित्वा
ज्ञानाश्रयैरपि जिनैर्न च कर्म शक्यम् ॥४०॥

दुःस्वप्नमापतति भाविविशेषयोगात्
पुंसां सुषुप्तिसमये नियतेर्नियोगात् ।
दुःखं न तत्र विमृशन्ति विवेकभाज-
स्तन्वन्ति शान्तिकविधिं खलु तस्य शान्त्यै ॥४१॥

भूपोऽपमानमपि सुन्दरि ! यत् तनोति
दोषः समाश्रयति तत्र निदानभावम् ।
नास्थायि शैशवभरस्य विपर्ययेऽपि
दोषाश्रितस्य सविधेऽपि मया कदाचित् ॥४२॥

नास्पृक्षदन्यवनितामपि मामकीनं
किञ्चिन्मनस्विनि ! मनः सुकृतोपरुद्धम् ।
मिथ्यात्ववृत्तिमिव दुर्गतिपातभीत-
मुच्चैस्तरप्रणयभावनिबद्धकक्षाम् ॥४३॥

किन्तु प्रवर्तयति तापमपारमेष-
त्वत्कुक्षिजाततनयप्रतिपत्त्यभावः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यश्चन्दनेन न च चन्द्रमरीचिचक्रैः
शक्यो निवर्त्तयितुमेव न गाङ्गवार्भिः ॥४४॥
श्रुत्वेति तत्सहचरी वचनं तदस्य
निःश्वस्य गाढमवदद्वदतां वरा सा ।
चिन्तामपास्य कुरु नाथ ! विशिष्य पुण्यं
यत् स्यात् तदेव सकलाभिमतार्थसिद्ध्यै ॥४५॥
प्रासादमारचय तीर्थकृतां नवानि
बिम्बानि तत्र विनिवेशय भावतस्त्वम् ।
पूजां विधापय सुवर्णविचित्रजाति-
मुख्यैः सुमैर्भगवतां घनसारसारैः ॥४६॥
जैनागमं सुभग ! लेखय पुस्तकेषु
दत्त्वा वसून्यगणितानि च लेखकेभ्यः ।
पक्वान्नखण्डघृतपायसमुख्यभाज्यैः
साधर्मिकानविरतं प्रिय ! भोजय त्वम् ॥४७॥
साधून् महाव्रतधरान् प्रतिलाभयस्व
वस्त्रान्नपानवरमोदकखादिमाद्यैः ।
साध्वीश्च निर्मितविधापितकल्पितादि-
दोषान् विधूय शुचिमानसवृत्तिसक्तः ॥४८॥
धर्मं समाचरत एवमचिन्तचिन्ता-
रत्नं चिरत्नकृतदुष्कृतभङ्गहेतुम् ।
भावी तवापि तनयस्तदिहापि रम्यं
नो चेदमुत्र सुकृताचरणं सुखाय ॥४९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

शिक्षामिमां तदुदितां विदितां महार्था-
मादाय नैगममहापुरुषस्तथेति ।
सर्वं तदाप्रभृति तत्सुगुरूपदेश-
देशीयमारचयति स्म यथावदेषः ॥५०॥

आहूय मालिकमसौ द्रविणं व्यतारी-
दिच्छातिरिक्तमविलम्बपरो महेच्छः ।
पुष्पाणि मे प्रतिदिनं दिवसोदयेऽप्या-
नीयार्पयेरिति पुनर्धनवानुवाच ॥५१॥

उत्सूरमारचयिता कुसुमावचाय-
मारामिकः स विदधन्निदधत्फलानि ।
ध्यात्वेति धार्मिकशिरोमणिरेष शय्यो-
त्थायं वर्नी स्वमियाय सलीलगत्या ॥५२॥

धन्योऽहमस्मि यदुपागमदेष वेष-
संस्कारशोभितसदाकृतिरत्र हर्मी ।
इत्यात्मसंशनपरेण वनावनेन
तस्मै फलानि ददिरे कुसुमानि चापि ॥५३॥

लात्वा फलानि विपुलानि स मञ्जुलानि
पुष्पाणि गन्धकलितानि धनेष्वरोऽपि ।
हर्म्यं समेत्य सकलं विनिवेश्य पात्रे
स्नात्वा जलैः शुचिरुपाक्रमतार्हदर्चाम् ॥५४॥

सद्मस्थिताऽऽर्हतमहाप्रतिमासपर्यां
कृत्वा यथावदथ सङ्घजिनालयेऽगात् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नैषेधिकीत्रयपुरस्सरमात्मनैव
दक्षः प्रदक्षिणविधिं त्रिविधं विधाय ॥५५॥

पूजां त्रिधापि विरचय्य विचित्रभक्ति-
र्भूमिप्रार्जनमपि त्रिविधं प्रकुर्वन् ।
तिस्त्रो वितत्य विनयी प्रणतीर्नयज्ञो-
ऽवस्थात्रयं निजमनो विषयं वितन्वन् ॥५६॥

आशात्रयेक्षणविवर्जनमादधानो-
विन्यस्तदृष्टियुगलो जिनराजबिम्बे ।
वर्णादिकत्रितयभावनया प्रसक्तो-
मुद्रात्रयं प्रकटयन् प्रतिपत्तिपूर्वम् ॥५७॥

अत्युत्तमप्रणिहितत्रितयप्रणेता
देवानवदन्त जिनाधिपतीन् सुचेताः ।
कस्यानवद्यतमतां न सतां क्रमोऽयं
संपादयत्यविरतं हि विधीयमानः ॥५८॥

चैत्यालयादथ निरीय सवेगमिभ्यो
वव्राज धामवसतिर्वसतिं गुरूणाम् ।
तत्र प्रणम्य गुरुपादपयोजयुग्मं
साधून् यथाक्रममवन्दत वन्द्यवन्द्यान् ॥५९॥

व्याख्यां निशम्य समभावविधानधुर्या-
माचार्यवर्यसुगुरोरमृतायमानाम् ।
कार्यः स्फुरन्सुकृतबुद्धिभिरेषणीया-
हारग्रहाय भगवद्भिरनुग्रहो मे ॥६०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दत्त्वा क्षमाश्रमणमित्यवधानपूर्वं
श्रेष्ठी निकेतनमुपेत्य कृतार्हदर्चः ।
साधून् विहार्यपरिहार्यविपर्ययेण
भोक्तुं समारभत स स्वजनैः समेतः ॥६१॥ युग्मम् ॥

साधर्मिकानमृतसंनिभभोज्यपेयैः
संमानितान्प्रथममभ्यवहार्य मान्यान् ।
यद्भुज्यते स्वरुचिभिः प्रतिलाभ्य साधू-
स्तद्भोजनं जठरपूरणमन्यदाहुः ॥६२॥

दौर्विध्यसंकुचितमानसवृत्तिदीना-
नामन्त्र्य भोज्यनिचयैरुपभोज्य सम्यक् ।
वासांसि निश्वसितहार्यतमाञ्चलानि
दत्त्वा विसर्जयति स स्म निरीश्वरांश्च ॥६३॥

आह्वाय्य मङ्क्षु लिपिकर्मविधानदक्षान्
स स्थूललक्षकुललक्षणलक्षणीयः ।
द्रव्यं वितीर्य जिननायकसंप्रणीत-
सिद्धान्तशास्त्रलिखनानि समादिदेश ॥६४॥

इत्याग्रहेण महता निहतान्तरायं
धर्मं सदा विदधतोऽस्य धनेश्वरस्य ।
तुष्टा कथञ्चिदपि शासनदेवतासौ
पुत्रो भविष्यति तवेति मुदा शशंस ॥६५॥

देवीवरे ! भवति तुष्टिमुपागतायां
नो दुर्लभं भवति किञ्चन वस्तुवृत्त्या ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्युद्धतस्वरमुदीर्य कृताञ्जलिः स
साधर्मिकप्रणयतः प्रणतिं चकार ॥६६॥

पत्न्यै न्यवेदयत शासनदेवतायाः
पश्चात्स वाक्यमथ निर्भरतोषितायाः ।
प्रागेव वक्त्रकमलं प्रभवत्प्रसाद-
मानन्दतुन्दिलमिदं प्रकटीचकार ॥६७॥

गर्भं बभार धनदत्तधनेशभार्या
सा तत्प्रभृत्यपि भृता सुकृतप्रभावैः ।
स्वप्ने च पूर्णकलसं सलिलैः प्रपूर्ण-
माम्रच्छदैरपिहितं कलयाम्बभूव ॥६८॥

स्वप्नोपलब्धिसमनन्तरमेव गन्ध-
पुष्पाणि पाणिकमले विनिवेश्य धन्या ।
प्राणप्रियं मृदुवचोभिरुदारबुद्धि-
रुत्थाप्य सा प्रवदति स्म यथार्थमेवम् ॥६९॥

स्वप्ने निरैक्षिषि विशेषविदां वराद्य
कल्याणपूर्णकलसं जलसम्भृतं च ।
कीदृक् फलं मम भविष्यति चास्य नाथ !
तत्त्वं निवेदय मदग्रत एव तत् त्वम् ॥७०॥

एतत् तदुक्तमवधार्य विचार्य बुद्ध्या
प्राह स्म विस्मितमनाः प्रमनाः स चाढ्यः ।
जानेऽस्मि पूर्णकलसप्रविलोकनेन
सूनुस्तवेन्दुमुखि ! संभविताचिरेण ॥७१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वाचं प्रियस्य परमार्थत एव सत्यां
मत्वा समुत्थितवती फलसंयुतानि ।
सा बिभ्रती प्रियतमप्रतिपादितानि
पुष्पाणि वासवसतिं स्ववशा विवेश ॥७२॥

यान् दोहदान् स्वहृदये बिभराम्बभूव
सा श्रेष्ठिराजदयिता कलिता गुणौघैः ।
पृच्छत्पुरन्ध्रिवदनेरितवाक्यभङ्ग्या
तान् वल्लभः सपदि पूरयति स्म तस्याः ॥७३॥

प्रासूत सा तनयमद्भुतरूपसम्पत्-
संतर्जितामरकुमारकुमाररूपम् ।
विद्योतयन्तमभितस्तदरिष्टदीप-
तेजांसि केन्द्रपतितोच्चशुभग्रहेषु ॥७४॥

दासीजनैर्द्रुतमुपेत्य सुतप्रभूत्या
श्रेष्ठीप्रहृष्टहृदयैरभिवर्द्धितोऽयम् ।
देयं न किञ्चन विवेद न चाप्यदेयं
नादेयमेव परिपूर्णमनाः प्रमोदैः ॥७५॥

पुत्रा भवन्ति भवने बहवोऽपि यस्य
जाते सुते वितनुतेऽपि महामहं सः ।
प्रापोपयाचितशतैस्तनयं तथा यः
किं नोत्सवं स तनुतां तनुताण्डवेन ? ॥७६॥

विज्ञप्य विज्ञतमताऽवमताग्र्यजीवं
सर्वंसहाधिपतिमेष महोपदाभिः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कारागृहस्थितिमतः पुरुषान्समस्तान्-
सत्कृत्य कृत्यविदरं व्यमुचन्महेच्छः ॥७७॥

अध्यापकैर्मुकुरमण्डलमग्रदेशे
वंशस्य शस्यमतिभिस्त्वरितं निधाय ।
छात्रैः समं समुपगत्य पठद्भिरुच्चै-
र्द्वारं समाश्रितममुष्य निकेतनस्य ॥७८॥

भालानि कुङ्कुमविशेषकभूषितानि
तेषां विधाप्य विधिवत् स सुवासिनीभ्यः ।
ताम्बूलमात्मशयतामरसेन दत्त्वा
द्रव्यं प्रदाप्य बहुलं विससर्ज धीमान् ॥७९॥

स्थालानि काञ्चनमयानि निवेश्य पाणौ
कुन्दोज्ज्वलाक्षतभृतानि समन्ततोऽपि ।
पौरस्त्रियो घुसृणचन्दनपात्रहस्ताः
कर्तुं विशेषकमुपास्थिषताऽस्य पस्त्यम् ॥८०॥

ताः श्रेष्ठिनं समुपवेश्य चतुष्किकायां
भाले विधाय तिलकं वितताक्षतं च ।
विश्राण्य वानपरिपाकिमनालिकेरं
त्वं जीव नन्द भव पुत्रवतामधीशः ॥८१॥

इत्याशिषः स हृदये बहुधाभिनन्द्य
प्रोद्यत्प्रमोदनिवहः पुरसुन्दरीणाम् ।
दत्त्वांशुकानि शरदिन्दुमयूखजाल-
व्यूतिभ्रमं विरचयन्ति विसृष्टवांस्ताः ॥८२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

द्रव्याणि यानि स धनी विचिकाय षष्ठी-
जागर्यिकामहमवाप्य सुतस्य तस्य ।
नो तानि कश्चिदपि च व्ययसात्करोति
पाणिग्रहेऽपि तनयस्य महर्द्धिकोऽपि ॥८३॥

जाते महोत्सवभरे सकलेऽपि लोके
सम्मानिते वसनचीनदुकूलदानैः ।
स्वप्नानुसारि तनयस्य ततान नाम
श्रेष्ठी महेन दशमेऽहनि सम्मदेन ॥८४॥

ज्योतिर्विदोऽपि विनिवार्य सुवासिनीश्च
नैमित्तिकानपि कलाकुशलानशेषान् ।
सन्मङ्गलश्रुति च **मङ्गलकुम्भ** इत्या-
ब्रह्माण्डमाकलितशारदचन्द्रकीर्तिः ॥८५॥ युग्मम् ॥

धात्रीभिरुज्ज्वलरसोदयसृत्वरीभि-
र्विश्वम्भरारुह इवाचलसारिणीभिः ।
संवर्द्धमानसुभगः परिपाल्यमानो-
जज्ञे जनप्रमददोऽष्टसमः क्रमात्सः ॥८६॥

दृष्ट्वा प्रयान्तमपरेद्युरुदारचित्तं
तातं वर्णी प्रति स **मङ्गलकुम्भ** एतत् ।
व्याचष्ट मङ्गलमुखो ननु तातपादाः !
सिद्ध्यै प्रयात मयि सत्यपि किं स्वयं वा ? ॥८७॥

स्मित्वा जगाद जनकः प्रियपुत्र ! याम्या-
नेतुं सुमानि जगदीश्वरपूजनार्थम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आराममुद्गतफलाभ्युदयाभिराम-
मामोदमाशु जनयन्तमुपागतानाम् ॥८८॥

पित्राभ्युदीरितमिदं विनिशम्य पुत्रः
प्रोवाच वाचमतिमात्रविनीतधुर्यः ।
आज्ञाप्यते यदि भवद्भिरनुग्रहेणा-
रामं तमप्यहमुपैमि समं भवद्भिः ॥८९॥

अत्यन्तवल्लभतया न निवर्तितुं तं
पुष्यच्छिरीषसुकुमारतया न नेतुम् ।
शक्तोऽभवत्स भुवनाद्भुतभागधेयः
कूलङ्कषारयमिवायनवर्त्तिशैलः ॥९०॥

तस्याग्रहं शिशुतयाऽविनिवार्यमार्य-
श्चित्ते विचार्य सममेव समाप तं तम् ।
जाम्बूनदाभरणभूषितपाणिकण्ठं
मञ्जुस्वरावजितकोकिलकण्ठनालम् ॥९१॥

साक्षात् षडानन इवैष महेश्वरेण
श्रीमाञ्जयन्त इव जम्भनिषूदनेन ।
पद्मालयाप्रणयिनेव सुमेषुवीरो-
गच्छन् समं स जनकेन विराजते स्म ॥९२॥

पृच्छन् क्वचिद्विटपिनां विटपानतानां
नामानि लोकविदितान्यपि न श्रुतानि ।
वल्लीदलानि विपुलानि सविस्मयः सन्
गृह्णन् क्वचिच्छिशुतयाऽतिचलाचलत्वात् ॥९३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

उद्यद्दिनाधिपतिमण्डलसन्निभानि
कुत्रापि पाककलकोलफलानि चिन्वन् ।
गोपाङ्गनाः क्वचन लोचनगोचरेऽपि
कुर्वन् पयोदधिघटीः शिरसाऽऽदधानाः ॥९४॥

दूर्वाप्रवालशकलानि सुकोमलानि
भास्वत्तुरङ्गमतनूरुहसोदराणि ।
मत्तं पुरीपरिसरे परितश्चरन्तं
कुत्रापि तर्णककुलं समवेक्षमाणः ॥९५॥

छायां भजन् क्वचिदपि श्रमघर्मतोयै-
राप्लावितः समुदयत्सुकुमारभावः ।
अभ्रंलिहावनिरुहावलिलक्ष्यमाणां
दूरादवैक्षत वनीमवनः श्रियां सः ॥९६॥ चतुर्भिः कुलकम् ॥

पुंस्कोकिलान् क्वचन दर्शयता रसाल-
शाखाप्रदेशमवलम्ब्य सुखं निविष्टान् ।
पीयूषपारणविधिं श्रवसां जनाना-
मातन्वतः सुमधुरस्वरगीतभङ्ग्या ॥९७॥

व्याकोशकिंशुकसुमायतचारुचञ्चून्
लीलाचलच्चरणचङ्क्रमणैकचुञ्चून् ।
क्षीरोदसागरतरङ्गसदृक्षपक्षान्
पद्माङ्कुरादनपरान् क्वचनापि हंसान् ॥९८॥

चक्रीं प्रियां विशलताशकलार्पणेन
प्रेमप्रकाशमनुरञ्जयतो यथेच्छम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुत्राप्यगाधसरसीं निकषैव चक्रा-
नाराममासददयं जनकेन साकम् ॥९९॥ त्रिभिर्विशेषकम् ॥

भास्वत्करप्रसरवारणमाऽऽदधानं
छायाभरेण विततोद्गतभूरुहाणाम् ।
सान्द्रीभवत्किसलयच्छदनाञ्चितानां
स श्रेष्ठिसूरुपवनं प्रविवेश तच्च ॥१००॥

तं बालकं समवलोक्य समाव्रजन्तं
पीयूषवर्षमिव लोचनयोः सृजन्तम् ।
पप्रच्छ मालिकवरो धनदत्तमिभ्यं
कोऽयं नवोऽत्र भवता समुपैति चेति ॥१०१॥

सूनुर्ममायमतिजातकुतूहलः स-
न्नाराममागमदवेक्षितुमेव तेऽद्य ।
इभ्यप्रभूदितमिदं विनिशम्य सम्यग्
जम्बीरदाडिमफलानि ददौ स तस्मै ॥१०२॥

रम्भाफलानि विपुलानि मनोरमाणि
सल्लाङ्गलीतनुमहाफललुम्बियुञ्जि ।
आरामिको व्यतरदाशु निवारितोऽपि
त्यागोद्धतेन किल तज्जनकेन मेति ॥१०३॥

प्रोत्फुल्लचम्पकसुमानि सकेतकानि
जाम्बूनदोपपदजातिसुमानि लात्वा ।
व्यावर्तत स्वभवनं प्रति वाणिजेशः
प्रीतिं परां कलयता तनयेन सार्द्धम् ॥१०४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आनन्द्यमानमनसं जननीं प्रकुर्व-
न्नालिङ्गनेन वचनेन च सम्मतेन ।
यच्छन् फलानि वनपालसमर्पितानि
तानि स्वयं परिजनाय यथाक्रमेण ॥१०५॥

पश्यन् जिनाधिपतिपूजनमेकतान-
स्तं कञ्चन प्रमदमापदयं स्वतोऽपि ।
आराधयद्भिरसमं परमेश्वरं यः
सम्प्राप्यते नियमिभिर्नियतं कथञ्चित् ॥१०६॥

विज्ञाप्य स्वमुखेन तातचरणान् कल्याणरुक्प्रीणितान्
गत्वाऽऽराममुपानयत्स सततं पुष्पाणि मालाकृतः ।
अभ्यस्यत् सकलाः कलाश्च वयसोर्मध्यं जगाहे द्वयोः
**कुम्भा**ख्यो बहुशावभावयुवताप्रख्यातनाम्नोरयम् ॥१०७॥ [शार्दूल०]

आसीत् श्रीगुरुगच्छमौलिमुकुटश्री**मानभद्र**प्रभोः
पट्टे श्री**गुणभद्रसूरि**सुगुरुर्विद्यावतां सद्गुरुः ।
तच्छिष्येण कृतेऽत्र षोडशजिनाधीशस्य वृत्ते महा-
काव्ये श्री**मुनिभद्रसूरि**कविना सर्गस्तृतीयोऽगमत् ॥१०८॥ [शार्दूल०]

उपास्य यस्याङ्कमनाप्यमन्यैर्विलोचनानामबलाजनानाम् ।
मृगो बभाराप्युपमानभावं **शान्ति**प्रभुर्वस्तनुतां स शर्म ॥१०९॥ [उपजातिः]

इतश्च **चम्पा**नगरी प्रसिद्धा **कलिङ्ग**देशे विषयावतंसे ।
भोगीशितायामवलोक्य रम्यां भोगावतीं स्वामध एव चक्रे ॥११०॥

न्यायक्रियासुन्दर एव तस्यां पृथ्वीपतिः **सुन्दर**नामधेयः ।
बभूव यस्याग्रत एव लक्ष्म्या पुरन्दरः किङ्कर इत्यमानि ॥१११॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**गुणावली** तस्य नृपस्य देवी देवीव सौन्दर्यगुणेन याऽऽसीत् ।
**त्रैलोक्यसुन्दर्य**भिधा तदीया त्रैलोक्यसुन्दर्यभवत् तनूजा ॥११२॥
उत्सङ्गसंसङ्गिफलोपशोभां स्वप्ने समालोकत वीरुधं यत् ।
तमीतुरीयप्रहरेऽवशिष्टे तस्यां प्रसूर्गर्भमधिश्रयन्त्याम् ॥११३॥
अन्योऽन्यमास्फालयता तदस्या विज्जृम्भमाणेन कुचद्वयेन ।
कन्दर्पलीलोपवने कृशाङ्ग्या तद्यौवने किं फलितं न चापि ? ॥११४॥
तां यौवनोद्भेदविशेषरम्यां माता समालोक्य मुदं बभार ।
विचिन्तयन्तीति सुधा किमेषा मत्कुक्षिरत्नाकरतो विजज्ञे ॥११५॥
अन्येद्युरभ्यज्य सहस्त्रपाकतैलेन कर्पूरसुगन्धिनैनाम् ।
श्रीखण्डवासैर्मसृणैः समन्तादुद्वर्त्य कोष्णैरभिषेच्य वार्भिः ॥११६॥
सुवर्णरत्नाभरणैर्विचित्रैराचूलमापादनखं विभूष्य ।
दिव्यं दुकूलं परिधाप्य भव्यं शिरीषकोषम्रदिमाऽपघाति ॥११७॥
**गुणावली** तां प्रसरत्समग्रगुणावलीमालिजनेन सार्द्धम् ।
आस्थानमास्थाय कृतासनस्य प्रस्थापयामास नृपस्य पार्श्वम् ॥११८॥ त्रिभि० ॥
भूपालदोःस्तम्भमवाप्य बाला सा शालभञ्जीव परं रराज ।
विलोचनेन्दीवरसन्ततीनां ज्योत्स्नेव यूनां ददती विकाशम् ॥११९॥
विलोक्य बालां **सुरसुन्दर**स्तां रूपस्वरूपेण जगज्जयन्तीम् ।
गुणैरशेषानपि रञ्जयन्तीं मनोभुवः शासनवैजयन्तीम् ॥१२०॥
दध्यौ नृपस्त्वेवमहो ! किमस्या वरो विधात्रा प्रवरो न सृष्टः ।
सृष्टो यदि स्यादवलोक्यतेऽत्र श्रोत्रातिथित्वं प्रतिपद्यते वा ॥१२१॥ युग्मम् ।
अतादृशाय प्रतिपाद्यते चेत्संपद्यते तद्वचनीयता मे ।
अस्यां हि सृष्टिः सुकृतैरियं तत्सम्पादयिष्यन्ति तमेव तानि ॥१२२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निश्चित्य चित्ते स्वयमित्यधीशः सभां पुनस्तां सहसा विसृज्य ।
अन्तःपुरं बालिकया तयाऽमा समागमद्वेत्रिनिरुद्धलोकम् ॥१२३॥

प्रत्युज्जगामाऽथ **गुणावली** तं नृपावलीवन्द्यपदारविन्दम् ।
भद्रासने भद्रतया निविष्टं सा संनिविष्टा तमिदं बभाषे ॥१२४॥

विवाहयोग्या भवतोऽस्ति पुत्री यशःपवित्रीकृतविश्वविश्व ! ।
दिगीश्वरांशाश्रितमूर्त्तिरद्धा सर्वं स्वतो वेद महीमहेन्द्रः ॥१२५॥

विज्ञापना यत् क्रियते तदत्राऽवधारय त्वं परमार्थमीश ! ।
अस्माकमस्यां मनसा प्रवृद्धः प्रेमा समुज्जृम्भत एव कोऽपि ॥१२६॥

ततो महाराज ! मयि प्रसादं विधाय पुत्रीं प्रतिपादयेमाम् ।
वराय कस्मैचिदिदम्पुरीयवास्तव्यचूडामणये महेच्छ ! ॥१२७॥

सङ्गच्छतेऽसौ श्वसुरस्य गेहादागत्य चागत्य यथाऽनिशं नः ।
अस्या वियोगं न वयं विसोढुं क्षमाः क्षमाखण्डल ! किञ्चिदेव ॥१२८॥

राज्ञीभिरन्याभिरियं निजेच्छा राज्ञः पुरो विज्ञपयाम्बभूवे ।
को वा प्रभूणां न मनीषितं स्वं लब्धावकाशः प्रविकाशयेत ? ॥१२९॥

विज्ञप्तिमासां हृदये निधाय क्ष्मावासवः संसदमध्युवास ।
पूषेव पूर्वाऽचलसानुदेशं सिंहासनं च श्रितवानतन्द्रः ॥१३०॥

**सुबुद्धि**नामानमथो सुबुद्धिं मन्त्रीशमूचे वसुधासुधांशुः ।
सुतां मदीयां स्वसुतेन सार्द्धं विवाहयाऽस्मद्विनियोगतस्त्वम् ॥१३१॥

त्वग्दोषदुष्टं तनयं विभाव्य प्रोवाच मन्त्री नृपतिं प्रतीदम् ।
स्वामिन्ननौचित्यविपञ्चितं किं वचस्त्वयाऽवाचि विपश्चिताऽपि ? ॥१३२॥

क्व स्वर्णकायः क्व च राजिलोऽयं क्वैरावणः क्वैडकडिम्भ एषः ।
राजेन्द्रसंसेव्यपदः क्व देवस्त्वत्पादपद्मप्रणयी क्व चाऽहम् ॥१३३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वित्तं ययोरेव समं जगत्यां कुलं ययोरेव समं प्रतीतम् ।
मैत्री तयोरेव तयोर्विवाहस्तयोर्विवादश्च निरूपितोऽस्ति ॥१३४॥

स एव सम्बन्धविधिर्विधेयः सम्बन्धिता येन भवेत् प्रशस्या ।
निर्बन्धमापाद्य विधीयमानः सम्बन्ध एव प्रकरोति हास्यम् ॥१३५॥

ततो महाराज ! मनागपीदं न युक्तमेतद् भवताऽभ्यधायि ।
महीयसामातनुते महत्त्वं युक्त्यानुयुक्तं हि निरूप्यमाणम् ॥१३६॥

अपेक्षणीया न भवन्ति जातु क्षोणीश्वराणामपि सेवकास्ते ।
ये लोभमालम्ब्य समुत्सहन्ते कीर्तिं प्रभो ! च्छेत्तुमिह प्रसिद्धाम् ॥१३७॥

तदुक्तमाधाय हृदीति राजा विराजमानः सहजेन धाम्ना ।
जगाद मन्त्रिन् ! कथमस्मदीयं वाक्यं विसम्बन्धमुदाहरस्त्वम् ॥१३८॥

स्वस्वामिसम्बन्धमभाषताऽयं दाक्षीसुतो व्याकरणं प्रकुर्वन् ।
आबालगोपालमहो ! प्रसिद्धः संस्मर्यतेऽमात्य ! स किं त्वया न ? ॥१३९॥

सम्बन्धमुद्द्योतयितुं पटिष्ठा षष्ठीविभक्तिः सुधियां मताऽस्ति ।
त्वं सेवकोऽहं प्रभुरस्मि तेऽपि प्रतीतमेवं तमुरीकुरुष्व ॥१४०॥

धनं ययोरेव समानमित्याद्यवाचि यत् तन्न विचारचारु ।
सहस्रपादस्य दिनेश्वरस्य किं पङ्गुना काश्यपिना न योगः ? ॥१४१॥

न किं विभिन्नान्वययोर्भवेयुः प्रीतिश्रियः स्फीततमाः सुबुद्धे ! ।
तथा हि रामः प्रमनाः स्म दत्ते लङ्काधिपत्यं स विभीषणाय ॥१४२॥

श्रीरामलङ्केश्वरयोर्गरीयान् कुले विभिन्नेऽपि रणो बभूव ।
न मन्वते मानधनास्तु यद् वा किञ्चित् परित्यक्तविवेकभावाः ॥१४३॥

प्रीतौ विरोधे च ततश्च पुण्याऽपुण्यप्रवृत्ती प्रथमं निदानम् ।
विचिन्त्य संबन्धविधानतो मे सम्बन्धिनां शेखरतां श्रय त्वम् ॥१४४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्याग्रहं भूमिपुरन्दरस्य सञ्चिन्त्य चित्ते सचिवः स्वचित्ते ।
समागमन्मन्दिरमिद्धऋद्धिप्रदानमाधानमयं सुखस्य ॥१४५॥

बुद्ध्या न यत् सिद्ध्यति कार्यमीषद् वैषम्यमापन्नमनन्तशोऽपि ।
न पौरुषेणापि न भूरिदानैस्तत्रोचितार्चा कुलदेवतायाः ॥१४६॥

इत्यन्तरुद्भाव्य विभावितात्मा निकेतनाभ्यन्तर एव देव्याः ।
निकेतने केतनराजिराजि स्नात्वा प्रविश्य प्रयतः स धीरः ॥१४७॥

संस्नाप्य नीरैर्घनसारमिश्रैर्मनोभिरच्छैरिव भावनाढ्यैः ।
कस्तूरिकाकुङ्कुमचन्दनैस्तां विलिप्य मूर्तिं कुलदेवतायाः ॥१४८॥

मधुव्रताकर्षणसिद्धविद्यारूपाणि पुष्पाणि मनोहराणि ।
आरोप्य मूर्तिं परितः पुरस्तान्निधान नैवेद्यमनेकधापि ॥१४९॥

अदभ्रदर्भैर्मृगचर्विताग्रैरास्तीर्य संस्तारकमस्तदोषम् ।
भवत्प्रसादादचिरेण वाञ्छा भवत्वियं मे सफलेत्युदित्वा ॥१५०॥

स्तुत्वा महार्थैः स्तवनैरुदग्रैर्नानाप्रकारैर्ललितैः सुवृत्तैः ।
अयं जनो देवि ! तव प्रसादे प्राप्ते समुत्थास्यति चेति जल्पन् ॥१५१॥

स्वदेहसामर्थ्यमचिन्तयित्वा यावद्वरप्राप्तिसमानकालम् ।
आहारभङ्गीपरिहाररूपं कुर्वन्नखर्वं नियमं विगर्वः ॥१५२॥

नवाम्बुदक्षालितशम्भुशैलावदातवासा विकसन्मुखश्रीः ।
सुष्वाप देवीचरणारविन्दद्वयाग्रतः शुद्धमनाः प्रशस्यः ॥१५३॥ सप्तभिः कुलकम् ।

अथ प्रभापूरहतान्धकारा तद्ध्यानकाष्ठाचलितासना सा ।
निशावसाने विदितप्रभावा तुष्टा बभाषे कुलदेवता तम् ॥१५४॥

त्वया किमर्थं विहितं मदीयाऽनुध्यानमेतत्सचिवावतंस ! ।
उत्तिष्ठ वत्स ! स्वमनीषितं द्राङ्मदग्रतस्त्वं विनिवेदयस्व ॥१५५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इति प्रसादप्रमुखं मुखोक्तं निशम्य वाक्यं सचिवः स देव्याः ।
उत्थाय बद्धाञ्जलिसम्पुटः सन्नानन्दसम्पूर्णमना जगाद ॥१५६॥

मत्पुत्रकायस्थितकुष्ठगन्धस्तव प्रसादाद् घनसारसारात् ।
देवि ! प्रयातु क्षयमिष्टसिद्धिप्रदानसम्पादनसिद्धिरूपे ! ॥१५७॥

तदुक्तमाकर्ण्य सकर्णसेव्या देव्याऽऽह सा स्म स्मितपूर्वमेवम् ।
रोगक्षयं कर्तुमहं न शक्ता शक्ताऽपि पुत्रस्य तवादिभक्त ! ॥१५८॥

सुरासुराधीशनतक्रमोऽपि विज्ञानसम्पत्तिविभूषितोऽपि ।
नैवाऽन्यथाकर्तुमलम्भविष्णुर्जिनोऽप्यभुक्त्वा निजकर्मजातम् ॥१५९॥

उपार्जितं येन यदेव कर्म शुभाशुभं तेन तदेव भोग्यम् ।
किं नान्यथा पुत्रसुखेन वप्ता वप्तुः सुखेनैव सुतः सुखी वा ? ॥१६०॥

एतत्परित्यज्य ततोऽपरं त्वं हृदा समालोच्य वरं वृणीष्व ।
नाऽस्वामितां स्वाम्यपि विन्दतेऽत्र प्रसाधयन् साध्यमहो ! स्वसाध्यम् ॥१६१॥

ऊचे स यद्येव मतं कुमारं मान्ये ! समानीय समर्पयस्व ।
योऽवक्रयेणापि नरेन्द्रकन्यां विवाह्य मह्यं ददते प्रसह्य ॥१६२॥

विज्ञापनां तस्य निवेश्य चित्तेऽभिधीयते देवतया तया स्म ।
त्वन्माननावासितमानसाऽहं सर्वं विधातास्मि तदेतदाशु ॥१६३॥

अस्याः पुरो दूरत एव कोऽपि त्वन्मन्दुरापालतटस्थ एव ।
यो मन्दुरासन्निहितः कुमारः स्वरूपसन्तर्जितमाररूपः ॥१६४॥

अताड्यजाड्यज्वरपीड्यमानः समेत्य सन्तापयते कृशानौ ।
आप्तेन गुप्तं रभसा तमानाय्योद्वाहये राजसुतां यथेच्छम् ॥१६५॥ युग्मम् ॥

तमेवमुक्त्वा कुलदेवताऽसौ तिरोदधे नम्रजनानुकम्प्रा ।
विधित्सवः कार्यमिहार्यचित्ता भृत्यं हि किं नाम न शिक्षयन्ते ? ॥१६६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततः प्रभाते सचिवः प्रहृष्यन् महाशयः पारणकं विधाय ।
आह्वाय मौहूर्त्तिकमादरेणान्वयुङ्क्त लग्नं स्वहिते विलग्नः ॥१६७॥
ज्योतिर्विदं दत्तविवाहलग्नं धनानि दत्त्वा वसनानि चापि ।
विसर्जयामास नृपस्य शिष्ट्या विवाहसामग्र्यमपि व्यधत्त ॥१६८॥
यः कश्चिदागच्छति वाजिशालापार्श्वे कुमारः सुकुमारगात्रः ।
स्वरूपमारः प्रतिपत्तिसारः स मे समानीय समर्पणीयः ॥१६९॥
प्रकुर्वतेदं भवता मदीयं प्रयोजनं निर्मितमेव सर्वम् ।
एकं समाहूय स वाजिशालाऽध्यक्षं समादिक्षदिति प्रसन्नम् ॥१७०॥ युग्मम् ।
सा देवतापि प्रतिपन्ननिष्ठा गत्वो**ज्जयिन्यां** सुखराजधान्याम् ।
व्योम्नि स्थिता तद्वनपार्श्वतोऽदः पुरोऽवदन् **मङ्गलकुम्भ**कस्य ॥१७१॥
अवक्रयेणैष कुमार एवोद्विवक्ष्यते राजसुतां स्वरूपाम् ।
इत्यन्तरिक्षे स वचो निशम्य व्यचिन्तयद् विस्मित एव चित्ते ॥१७२॥
देवस्य कस्यापि वचः किमेतद् दैत्यस्य कस्याप्यथवा गभीरम् ।
विद्याधरस्याप्यनवद्यविद्याविद्योतमानाशयकस्य किंवा ? ॥१७३॥
सिद्धस्य कस्यापि किमेतदाहोस्विच्चारणस्य व्रतचारिणः किम् ? ।
कार्यं निरालम्बनमेव न स्यान्नाकारणं किञ्चिदवेक्ष्यते हि ॥१७४॥
परं न युक्तिव्यतिरिक्तभावात् स्वान्तं प्रतीतिं दधते ममात्र ।
निवेदयिष्यामि विशेषतोऽदस्तथापि पित्रे सदनं गतः सन् ॥१७५॥
आदाय पुष्पाणि स पाणिना द्राक् समाययौ सद्मनि वाटिकायाः ।
कार्यस्य वैयग्र्यवशादमुष्य स्मृतेर्न तद्गोचरतामयासीत् ॥१७६॥
अन्येद्युरुद्यानममुष्य यातः श्रुतौ प्रयातं वचनं तदेव ।
अथाप्तसद्मा नियमेन वप्तुः पुरः प्रवक्ष्येऽद्भुतमेतदुग्रम् ॥१७७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

न यद्वचोवर्त्मनि मानवानां महाकवीनामपि किञ्चनापि ।
चेत:पथे नापि कदापि धाता करोति लीलास्फुरणेन तच्च ॥१७८॥

शुभोदयो वाऽप्यशुभोदयो वा स्याद्देहभाजां नियतेर्नियोगात् ।
न कोऽपि शक्नोत्यतिवर्तितुं तं कदाचन च्छायमिव स्वकीयम् ॥१७९॥

अत्रान्तरे प्रादुरभूत्कुतश्चिद्वात्या हरन्ती विततं प्रकाशम् ।
रजोभिरान्ध्यं दिशती जनानां विलोचनान्त:पतनप्रगल्भै: ॥१८०॥

स वात्ययोत्पाट्य तया कुमार: सुमार्थमिङ्गन्निजवाटिकायाम् ।
**चम्पा**पुरीसन्निहिताटवीभूभागे क्षणाद्गन्ध इव व्यमोचि ॥१८१॥

विभीषणं यत्र विनैव लङ्कां पश्यन्ति रामाकलितं जनौघा: ।
हरीश्वरो यत्कपिभि: परीत: क्वचित् क्वचित् खेलति निर्विषङ्कम् ॥१८२॥

भीतिं दधाना इव सूरपादा विन्दन्ति यत्र प्रसरं न किञ्चित् ।
अभ्रंकषोर्वीरुहसन्ततीनां छायाच्छलस्थानतम:प्रपञ्चात् ॥१८३॥

तस्मिन्नविज्ञातहरिद्विभागो बभ्राम पञ्चाननवत् स वीर: ।
विमार्गयन्मार्गमुपैतुकामो ग्रामं पुरं वा पृथुगोकुलं वा ॥१८४॥

अथ व्यलोकिष्ट स पुण्यसारं कासारमाशा: परिपूरयन्तम् ।
समाव्रजत्पान्थपरम्पराणां कर्पूरसारैरिव वारिपूरै: ॥१८५॥

अस्ताघभावं कलयन्तमुच्चै: सतां मनोवद् विततं समन्तात् ।
दैत्यारिवक्ष:स्थलवद् दधानं पद्मानुरागं बहुसत्त्वनिष्ठम् ॥१८६॥

चक्राचितं जीवनदानवित्तं राजाधिराजोन्नतपाणिवच्च ।
विष्वग्वृतं चारुविशालशालावल्या महापत्तनवत्सहंसम् ॥१८७॥ त्रिभिर्विशे० ।

ग्रामीणपौरै: क्रयविक्रयाभ्यां चलद्भिराकीर्णमभीप्सिताभ्याम् ।
ग्रामस्य कस्याप्यथवा पुरस्य पन्थानमन्वेषयितुं प्रतीतम् ॥१८८॥

कृत्वा तडागे सवनं श्रमार्त्तः स्वच्छानि शीतानि जलानि पीत्वा ।
आलम्ब्य दोर्भ्यां च वटस्य पादांस्तस्योपरिष्टात् स समारुरोह ॥१८९॥ युग्मम् ॥

सूरस्तमालोक्य तदुग्रदुःखं करेष्वनेकेष्वपि सत्सु हर्तुम् ।
अपारयन्नस्तमहीध्रचूलामारुह्य वेगाज्जलधौ ममज्ज ॥१९०॥

न बन्धनं यस्य न कर्मपाशः किञ्चिन्न वा पञ्जरमस्ति यस्य ।
तनूपभोगत्यजनापरस्य स्थिरः स हंसः प्रतिपद्यते किम् ? ॥१९१॥

निमित्तमात्रं पतने गुरुत्वं प्रोक्तं कणादेन मुनीश्वरेण ।
ग्रहेषु सर्वेष्वपि भास्करस्य व्यक्तं न तत्किं पतनं विधत्ताम् ? ॥१९२॥

सरोजिनीनाथदिनाधिनाथप्रभाधिनाथग्रहनाथमुख्यैः ।
विवर्णना यस्य बभूव शब्दैः स हास्तमेति स्थिरमाः ! परं किम् ? ॥१९३॥

इदं कराणां स्फुरतां सहस्रं पुरस्कृतं यन्मयका पुरैव ।
उपेक्षतेऽस्मिन् समयेऽपि तन्मामिति क्रुधाऽऽरुण्यमधत्त योऽर्कः ॥१९४॥

प्रवर्त्तमानेऽभ्युदयेऽसमाने ये स्वामिना केऽपि पुरस्क्रियन्ते ।
तं तेऽनुगच्छन्ति तथा हि यातः प्रभादिनौ भानुमता सहास्तम् ॥१९५॥

सुतो यदीयः स यमः प्रसिद्धः पद्मापतेर्यः स्वयमेव चक्षुः ।
प्रभुर्ग्रहाणामपि यः समेषां हन्तास्तमेतीह स चेत्स्थिरं किम् ? ॥१९६॥

तमस्ततौ विस्तृतिमाश्रितायामधःस्थितं श्वापदमेव किञ्चित् ।
व्यापादयिष्यत्यचिरेण मामित्यवेत्य सोऽस्थात् स्तिमितस्तथैव ॥१९७॥

तथा कथञ्चित्प्रसृतं तमोऽपि दृश्यो न हंसोऽपि यथाजनिष्ट ।
भासामभावो हि तमोऽपि युक्तं प्रोक्तं कणादेन ततः कथञ्चित् ॥१९८॥

विलोक्य सोऽथ ज्वलनज्ज्वलन्तं न्यग्रोधभूमीरुहमुत्तरेण ।
हृष्यत्तनुः शीतविकम्पमानोऽवतीर्य तस्मात् तमियाय देशम् ॥१९९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स स्थानपालैर्बहु तप्यमानः शीर्षे प्रहारैरभिताडितश्च ।
एकेन तन्मन्त्रिवचो विचिन्त्याऽपसार्य तेभ्यो विजनेऽथ निन्ये ॥२००॥

क्षणं कृशानावकृशाशयस्तं स तापयित्वा सचिवाय मङ्क्षु ।
समर्पयामास कुमाररूपं कुमारमालोक्य मुदेऽदित स्वम् ॥२०१॥

अपूपुषत् तं सचिवोऽप्यजस्रं स्निग्धान्नपानैः स्वकुमारवच्च ।
प्रच्छन्नमाधाय निधानवत् स देयार्थवत्प्राहरिकैररक्षत् ॥२०२॥

स एकदाऽपृच्छदमात्यमेवं वैदेशिकस्यापि विधीयते मे ।
किं गौरवं ? तात ! पुरी च केयं ? किं नामधेयस्त्वमिह प्रसिद्धः ? ॥२०३॥

मन्त्र्यप्यभाषिष्ट विशिष्टबुद्धिः स्वार्थं न ते गौरवमादधेऽहम् ।
**चम्पा**पुरीयं प्रथिता जगत्यां तन्नाथमन्त्र्यऽस्म्यहमत्र वित्तः ॥२०४॥

स्वार्थोऽपि कस्ते ? सचिवेति पृष्टस्तेन न्यगादीत्पुनरेव मन्त्री ।
निवेदयिष्यामि तवाऽपि मुग्ध ! स्वार्थं कदाचित् स्वमनोऽनुमत्या ॥२०५॥

गतेषु घस्रेषु कियत्स्वमात्यं प्रस्तावमासाद्य स पृच्छति स्म ।
स्वार्थं तमाख्याहि ममानुवृत्त्येत्युक्तः स तेनाभिदधेऽभिसन्धिम् ॥२०६॥

श्रुत्वा तदाकूतमुदारचेताः स निःश्वसन् दिक्करकोऽप्युवाच ।
आ ! युक्तिमुक्तं भवता किमुक्तं वचः कलङ्कं रचयत् कुलस्य ॥२०७॥

को नाम तत्कर्म विनिर्मिमीते भूतं न यत् क्वापि न भावि यच्च ।
सचेतनः कः परिणीय कन्यां प्रदातुमीहां तनुतां परस्मै ॥२०८॥

तद्वाचमन्तर्विनिवेश्य मन्त्री च्छेत्स्यामि मूर्द्धानमिति ब्रुवाणः ।
पाणौ कृपाणं कलयन् स पापात् कृपापरैः प्राहरिकैर्न्यवारि ॥२०९॥

देशे त्वदीये यदि वा कुलेऽस्मिन् प्रवृत्तिरेषा न तथापि मेऽर्हा ।
आमुष्मिकं वैहिकमीहमानः समाचरेत्कः प्रतिषिद्धमर्थम् ? ॥२१०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

विमुञ्च सन्तापकरं प्रकोपं कोशे कृपाणं क्षिप मन्त्रिराज ! ।
भवादृशा बालवधाय खड्गं किमाददाना न खलु त्रपन्ते ? ॥२११॥

अवोचदज्ञानवशादबद्धं बालः प्रवालच्छविदन्तवासाः ।
विदन् प्रभूणां पुरतः क एवं वदेत्पिधत्ते प्रतिपद्धि दोषान् ॥२१२॥

तावत्प्रतीक्षस्व विबोधयामो यावद् वयं बालमबालबुद्धिम् ।
इतीरितस्तैः प्रशशाम मन्त्री सामप्रसाध्या ह्यधिपा भवन्ति ॥२१३॥

रक्षानियुक्तास्तमबूबुधंस्ते तथा यथामंस्त स तद्वचस्तत् ।
ऊचे च तन्मे सुमते ! प्रदेयं प्राप्नोमि यत्पाणिविमोचनेऽहम् ॥२१४॥

आमेति तस्य प्रतिपद्य सारव्याहारमाकारपरार्ध्यमूर्त्तेः ।
वैवाहिकं धीसख एव सर्वं विधापयामास विधिं विधिज्ञः ॥२१५॥

प्रवाद्यमानेषु विचित्रभङ्ग्या महामृदङ्गेषु कलस्वनेषु ।
मार्दङ्गिकैर्द्रव्यमुपाददानैरुत्तार्यमाणं स्वसुवासिनीभिः ॥२१६॥

योषासु भूषासुमनोहरासु प्रकुर्वतीषु प्रवरासु गीतम् ।
अभ्यज्य तैलेन सुगन्धिना तं हारिद्रचूर्णोपचितेन तेन ॥२१७॥

स्ववृत्तसन्तोषितकान्तपुत्रप्रपूर्यमाणानुपमाभिलाषाः ।
अम्भोभिरुष्णैरवदातरूपैरसिस्नपंस्तं प्रवरा रमण्यः ॥२१८॥ त्रिभिर्वि० ॥

विलेपनं काश्चन चक्रुरङ्गे कर्पूरसम्भाजितचन्दनेन ।
ललाम काश्चिच्च ललाटपट्टे गोरोचनारोचितकुङ्कुमेन ॥२१९॥

सदा विवाहव्यवहारविज्ञाः काश्चिद् बबन्धुर्वलयं प्रकोष्ठे ।
ताम्बूलमाराद् घनसारमिश्रं व्यश्राणयन् काश्चन भव्यभावाः ॥२२०॥

कपोलदेशे मृगनाभिपत्रभङ्गीं व्यधुः काश्चन रागसङ्गात् ।
वासांसि काश्चित्परिधाप्य नव्यान्यदीदृशन्दर्पणमिद्धदर्पाः ॥२२१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इत्युग्रसौभाग्यपरप्रभावानुमेयभाग्यातिशयस्य तस्य ।
चक्रुः पुरन्ध्र्योऽपि विधिं विवाहे क्व भाग्यभाजां न भवन्ति भोगाः ? ॥२२२॥

चतुर्भिःकला० ।

आरोपितान् कुङ्कुमपङ्कहस्तान्सीमन्तिनीभिर्दधतं समन्तात् ।
ततः समारुक्षदरूक्षकायं स हस्तिनं हस्तिपकात्तहस्तः ॥२२३॥

वीणासु भेरीषु च वाद्यमानास्वनन्तरामासु च कुर्वतीषु ।
गीतानि तारस्वरमन्यपुष्टाध्वनिं जयन्तीषु तमन्वितासु ॥२२४॥ युग्मम् ॥

भट्टेषु काव्यानि पठत्सु सत्सु गीतानि गायत्सु च गायनेषु ।
बर्हातपत्रेण विराजमानः स मण्डपं प्राप निवृत्ततापः ॥२२५॥

तन्मण्डपद्वारि मतङ्गजेन्द्रस्कन्धात्समुत्तीर्य दिशन् वसूनि ।
कुलाङ्गनाभिः कृतमर्घपात्रैरर्घं गृहीत्वान्तरमाविवेश ॥२२६॥ युग्मम् ॥

विभूषयामास विभूषणांशुप्रद्योतिताशः स कुमारसिंहः ।
सिंहासनं श्री**सुरसुन्दरेण** व्यधायि यत् तत्र सुमेरुतुङ्गम् ॥२२७॥

**त्रैलोक्यसुन्दर्य**पि वर्यभूषाविभूषिताङ्गी विहिताभिषेका ।
विलेपनैर्वासितदिक्कदम्बा दुकूलवासःपिहिताननश्रीः ॥२२८॥

सा मातृकासद्मनि मातृकाणां वृद्धाङ्गनास्थापनया स्थितानाम् ।
विधाय पूजां सुमनोऽनुरूपां भद्रासने प्राग्निषसाद भद्रा ॥२२९॥ युग्मम् ॥

लग्ने प्रशस्ते पतिमित्रपूर्णदृष्ट्या प्रदृष्टे बलशालमाने ।
षड्वर्गशुद्धे च तयोः पुरोधा अमीलयन्मङ्क्षु करं करेण ॥२३०॥

स मङ्गले प्राचि दुकूलभारान् ददौ द्वितीये वरभूषणानि ।
सुवर्णमाणिक्यभरं तृतीये तुर्ये रथाश्वादि धराधिराजः ॥२३१॥

यावत्करं मुञ्चति नैव पुत्र्या धवः स तावत् तमुवाच भूपः ।
जामातरद्यापि विमृग्यते यस्तं देशमादत्स्व विना निदेशम् ॥२३२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देशान्निदेशानिव ते निदेशव्यापारभाजः परिपालयन्तु ।
तान्पञ्च पञ्चाञ्चित ! वल्लभस्य देशस्य वाहान् दिश मे नरेन्द्र ! ॥२३३॥

कियत् त्वया याचितमित्युदित्वा स भूपतिः पञ्च ददौ तुरङ्गान् ।
प्रसादमासेदुषि मानसेऽस्मिन् नैवास्त्यदेयं महतां हि किञ्चित् ॥२३४॥

विवाह्य तां **मङ्गलकुम्भ** एवं समाश्रयद् वासगृहं स यावत् ।
तावद् भुजिष्याभिरुदीर्यमाणाः स्वयं समाकर्णयति स्म वाचः ॥२३५॥

निर्गम्यतां सांप्रतमेष गेहात्प्रयोजनं नः परिपूर्णमेव ।
सख्यः क्षणं तिष्ठतु स प्रतिष्ठः प्रवर्त्तते यावदिदं तमोऽपि ॥२३६॥

तासां गिरः कर्णपथं स नीत्वा विमृश्य चित्तेन निमेषमात्रम् ।
शरीरचिन्तामिषतोऽभिमानी विनिर्ययौ वासगृहात् सवेगम् ॥२३७॥

सुवर्णपात्रं सलिलैः प्रपूर्णं स्वपाणिनादाय नरेन्द्रकन्या ।
तमन्वयासीद् रभासाद् रसोत्का सम्पद् यथैव व्यवसायभाजम् ॥२३८॥

वितत्य किञ्चित्किल देहचिन्तामेतं वधूरुन्मनसं समीक्ष्य ।
ब्रूते स्म किं नाथ ! विबाधते त्वामारोग्यसम्पातकरी बुभुक्षा ॥२३९॥

अभाषमाणे दयिते वधूटी चेटीं समादिश्य पटीरवासा ।
स्थालं समानाययति स्म चेतःप्रमोदकैर्मोदककैः प्रपूर्णम् ॥२४०॥

ताभ्यामुभाभ्यामपि मोदकास्ते निष्कृत्रिमप्रेमसमन्विताभ्याम् ।
एकत्र पात्रे घनसारसारैरिवाहिता हर्षभरेण भुक्ताः ॥२४१॥

आस्वादमास्वादयतेव तेषामस्या निजस्थानविबोधनाय ।
तेनेन्दुखण्डैरिव निर्मितानां सौन्दर्यमादर्शयतेत्यवादि ॥२४२॥

स्याच्चेद् **विशाला**सलिलं कथञ्चित् तन्मोदका मानसमोदकाः स्युः ।
द्राक्षारसोत्पादितपानकान्तःसितापरिक्षेपनिदर्शनं च ॥२४३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तद्भाषिताकर्णनतो धरित्रीधवस्य पुत्री परिविस्मिता सा ।
विचिन्तयामास किमार्यपुत्रोऽप्यबद्धमेतन्निजगाद विद्वान् ॥२४४॥
एतस्य जन्मास्पदमेषिका पूरितो **विशाला**नगरी दविष्ठा ।
एतज्जनन्या जनकस्य पस्त्यं प्रशस्तमास्ते ध्रुवमेव तत्र ॥२४५॥
निर्णीय बुद्ध्येति लवङ्गपूगकर्पूरपूरेण विमिश्रितं सा ।
ताम्बूलमस्मै प्रददे नरेन्द्रकन्या मनोरागमिव स्वकीयम् ॥२४६॥
शरीरचिन्ताकपटेन धीमान् वासालयादेष विनिर्जगाम ।
आदाय पञ्चापि तुरङ्गमांस्तान् क्रमात् पुरी**मुज्जयिनीं** जगाम ॥२४७॥
यत्रान्धकोऽसौ धृतराष्ट्र एव पङ्गुः प्रतीतोऽरुण एव कामम् ।
मनुष्यधर्मा स पुरं कुबेरः काणः पुनर्भार्गव एक एव ॥२४८॥ युग्मम् ॥
समागतं तं पितरौ समीक्ष्य प्रमोदमासेदतुरञ्जसापि ।
गाढं समालिङ्ग्य चुचुम्बतुस्तच्छिरोऽम्बुजं षट्पददम्पतीव ॥२४९॥
महामहं जन्मदिने तदीये यं चक्रतुस्तौ सुतरां प्रहृष्टौ ।
तस्यागमे तं विहितावशिष्टमिवादधाते स्म ततोऽप्यनल्पम् ॥२५०॥
वृत्तं यथावृत्तमथ स्वकीयं निवेद्य पित्रोः प्रतिपत्तिपूर्वम् ।
अनीनहत् तानपि पञ्च वाहान् हर्म्ये विनिर्माय स वाजिशालाम् ॥२५१॥
विद्याविहीनस्य नरस्य पुंस्त्वं तिर्यक्त्वमेव प्रकटीकरोति ।
इति स्वचित्ते प्रतिपद्य विद्याभ्यासाय यत्नं स दृढीचकार ॥२५२॥
वाग्वैभवं केवलमेव तज्ज्ञाः पुंस्त्वे निदानं परमामनन्ति ।
साध्यस्य सिद्धिं हि विधित्सतादौ तत्साधनं साधनमेव साध्यम् ॥२५३॥
अध्यापकस्याखिलवेदविद्याक्षीरोदसामीप्यमवाप्य तूर्णम् ।
ततः स पीताब्धिरिव प्रकृत्या विद्यामृतं तच्चुलुकीचकार ॥२५४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथावनीवासवनन्दनी सा **त्रैलोक्यसुन्दर्य**पि सुप्रबुद्धा ।
पार्श्वे शयानं सचिवस्य पुत्रं विलोक्य वैलक्ष्यविलक्षणाऽऽस्या ॥२५५॥
अपास्य तं दुष्टरुजाभिभूतं भूतार्त्तवद् वासगृहान्निरीय ।
दासीव दासीजनसन्निधाने निशां कथञ्चिद् गमयाम्बभूव ॥२५६॥ युग्मम् ॥
सेवागतो मन्त्र्यपि भूमिपालं व्यजिज्ञपद् विज्ञतमः प्रभाते ।
तादृक् सुरूपोऽपि सुतोऽभवन्मे त्वदङ्गजासङ्गवशेन रुग्णः ॥२५७॥
तत् कं प्रतीकारमहं प्रकुर्वे ? कस्याग्रतो वच्म्यसमाधिमेतम् ? ।
श्रुत्वेति देवीमनुजेश्वराभ्यां निवारिता दृष्टिपथात् क्रुधा सा ॥२५८॥
राजन्यसिंहं निजगाद **सिंहं** विज्ञापनायै जनकस्य राज्ञः ।
क्रुद्धस्य नेतुः पुरतः सुतेन गन्तुं न शक्यं सुतया न चापि ॥२५९॥
**सिंह**स्य विज्ञापनयैव राज्ञाऽऽहूता सुता व्यज्ञपयत् स्ववाचा ।
पुंवेषमाश्रित्य तवाज्ञये**त्वावन्तीं** च जामातरमानयामि ॥२६०॥
आकस्मिकी कुष्ठरुजा शरीरे ज्वरादिवन्नैव भवेन्नराणाम् ।
शापेन कस्यापि मुनेर्यदि स्यात् तथापि पूतिव्रणसंश्रिता न ॥२६१॥
दुर्वृत्तमेतत्सचिवस्य सर्वं कियच्चिरं स्थास्यति संवृतं वा ।
अन्तर्दधाने न हि पुण्यपापे सुगन्धदुर्गन्धवदावृत्ते च ॥२६२॥
पुण्यैर्ममायं घटितश्चिरत्नैस्तेषां द्विषत्त्वं सहसा कथं स्यात् ? ।
दिगीशवृन्दांशभवः प्रभुर्वा स्वयं विचारं कुरुतां विचारम् ॥२६३॥
नरेन्द्र ! तन्मां विसृज प्रसादं सृज त्यजाकारणकोपमेतम् ।
पश्चादपि क्रोधफलं मयि त्वं प्रभो ! न किं दर्शयितुं प्रभुः स्याः ? ॥२६४॥
आज्ञापितस्तत्क्षणमेव राज्ञा प्रदाय शिक्षां द्रविणं चमूं च ।
प्रत्यर्थिदन्तावलभेदसिंहस्तया समं प्रास्थित सोऽपि **सिंहः** ॥२६५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

समुत्सुकं तन्मन एव पूर्वं **सिंह**स्ततः क्षोणिभुजा प्रणुन्नः ।
ततोऽपि कामः प्रगुणीकृतेषुस्ततो वरं सा लभतां न किं स्वम् ? ॥२६६॥

वीरैरनेकैरनुगम्यमानां प्रस्थाप्य तां भूमिपतिर्गभीरः ।
कारीषसंछन्नकृशानुवच्च प्रच्छन्नकोपः सचिवाधमेऽस्थात् ॥२६७॥

केनापि नालक्षि पथि प्रयान्ती स्त्रीत्वेन सा नूनपि वार्तयन्ती ।
नृपेण दत्तं खलु धारयन्ती पुंवेषमक्षाण्युपवासयन्ती ॥२६८॥

समेति सूनुः **सुरसुन्दर**स्य त्यागी गुणी क्षोणिपुरन्दरस्य ।
इति श्रुतिग्राहितया जनौघा लात्वोपदां द्रष्टुमुपागमंस्ताम् ॥२६९॥

**अवन्ति**देशाधिपतिर्नरेन्द्रः **पञ्चाल**देशाधिपतेः कुमारम् ।
समाव्रजन्तं विनिशम्य चारैरुपाचरत् संमुखमानदानैः ॥२७०॥

प्रदापिते मालववासवेनावासे नरेन्द्रस्य सुतः स तस्थौ ।
दौर्विध्यविच्छेदकराणि यच्छन् द्विजोत्तमानां द्रविणानि कामम् ॥२७१॥

सरोवरे वारिविसारिपानहेतोः प्रयातः पितृनामवर्णैः ।
अङ्काञ्चितान् पञ्च तुरङ्गमांस्तान् स एकदाऽपश्यददृश्यदोषान् ॥२७२॥

एते तुरङ्गाः प्रविशन्ति यत्र तत्सद्म सद्मप्रभुनाम मत्वा ।
ब्रूतैत्य मह्यं झटिति स्वभृत्यानित्यादिशत् **सिंह**मुखेन सोऽपि ॥२७३॥

तथाकृते तैः क्षितिपालसूनुर्वितत्य **सिंहे**न समं विचारम् ।
निमन्त्रयामास समं समग्रैश्छात्रैरुपाध्यायमधीयमानैः ॥२७४॥

समागतं तं समवेक्ष्य सोऽपि च्छात्रेषु सर्वेष्वपि भासमानम् ।
नरेन्द्रपुत्रः परमं प्रमोदं योगीव लेभे प्रतिभासमानम् ॥२७५॥

वणिक्कुमारोऽपि कुमारधामा कुमारमालोक्य विसिष्मिये तम् ।
इयं किमाकल्पविपर्ययेण प्रिया मदीया समुपागता सा ॥२७६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

भोज्यैर्विचित्रैर्वसनैरनेकैरमानयच्छात्रजनं समस्तम् ।
यं **मङ्गले**ऽसौ विदधे विशेषं तेनैव जज्ञे स च साभ्यसूयः ॥२७७॥
तांस्तीर्थयात्रोपगतानिवाऽयं संमान्य सर्वानपि भाषते स्म ।
आख्यानिकां कोऽपि भवत्सु मेऽग्रे निजानुभूतां सरसां ब्रवीतु ॥२७८॥
विज्ञप्तिमाकर्ण्य नृपाङ्गजस्य गुरुर्जगौ तान् प्रति जल्पतेति ।
ते साभ्यसूया जगदुः स एव वक्ता कथां यत्र कृतो विशेषः ॥२७९॥
अथ स्वयं **मङ्गलकुम्भ** एतां बुद्ध्या विबुध्यात्मवधूमधूतः ।
विवाहमुख्यं सकलं स्ववृत्तं **सिंहा**दिकानां पुरतो बभाण ॥२८०॥
गृह्णीत गृह्णीत जवेन चैनमित्युद्धतं जल्पति राजपुत्रे ।
छात्रैः समं पण्डित एव नष्टः स काकनाशं कलितात्मभीतिः ॥२८१॥
भद्रासनेऽमुं विनिवेश्य सान्द्रभद्रार्थिनी राजसुताह सा स्म ।
त्वया कथं नाथ ! तदा विमुक्ता मुक्ताऽग्रहारा ननु मन्दभाग्या ॥२८२॥
विना त्वया नाथ ! यदन्वभूवं दुःखं प्रवक्तुं न तदस्मि शक्ता ।
द्विजिह्वतादोषपरिष्कृतः स प्रवक्तु किं नाम सहस्त्रजिह्वः ? ॥२८३॥
इति स्वदुःखप्रतिपत्तिपूर्वं स्वाभाविकं वेषमियं प्रपद्य ।
प्रत्यर्प्य सैन्यैः सह तं नृवेषं संमान्य **सिंहं** व्यसृजद् गृहाय ॥२८४॥
पित्रोः पदद्वन्द्वमनुक्रमेण प्राणीनमत्तामुपदान्वितां सः ।
इयं वधूर्वो नमतीति जल्पन् भक्त्योपगूढः स्वयमप्यनंसीत् ॥२८५॥
वधूं समालोक्य विधूतदोषां श्वश्रूः परं तोषमवाप साऽपि ।
योग्यास्य जाया भवितेति चिन्ता तदैव तस्या हृदयं मुमोच ॥२८६॥
श्वश्रूं समीक्ष्य श्वशुरं च लक्ष्मीं निकेतनं चापि परिच्छदं च ।
कृतार्थयामास वधूः स्वमेषा स्वभाग्यसंरम्भविवर्णनेन ॥२८७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**सिंहो**ऽपि गत्वा त्वरितं नृपाय प्रत्यर्पयामास स तं नृवेषम् ।
निशम्य तस्या वरलाभवृत्तं मुदान्वितस्तं प्रशशंस भूपः ॥२८८॥
त्वमेव **सिंहा**खिलवैरिसिंहः परोपकारप्रवणस्त्वमेव ।
इति प्रशस्याङ्गविभूषणानि वासांसि चास्मै नृपतिर्व्यतारीत् ॥२८९॥
अवाप्य **चम्पा**धिपतेर्निदेशं निवेद्य तं **मालव**वासवस्य ।
स **मङ्गल**श्चम्पकपुष्पगौरश्चम्पां परीवारयुतः समागात् ॥२९०॥
प्रवेशितामुत्सवपूर्वमेतां समं प्रियेणोपगतां स पुत्रीम् ।
निरीक्ष्य राजा सचिवस्य तस्य दुश्चेष्टितं सत्यममंस्त सर्वम् ॥२९१॥
सर्वस्वमादाय नरेश्वरस्तं समादिशद् वध्यमवन्ध्यकोपः ।
**कुम्भ**स्तदाकर्ण्य तदैव गत्वा विज्ञप्य राजानममोचयत् तम् ॥२९२॥
विमोचितस्तेन दयालुनासौ विसर्जितोऽगाद् द्रुतमन्यदेशम् ।
कस्यापि कुत्रापि कदाचनापि कुकर्म निर्माय न शर्मलाभः ॥२९३॥
स यौवराज्यं नृपतेः प्रसन्नाल्लब्ध्वा सुखं वैषयिकं बभाज ।
तया समं पौरजनोपगीतां विस्तारयन् कीर्तिमिहेन्दुशुभ्राम् ॥२९४॥
अथावनीशं वनपालकोऽपि द्रुतं समागत्य समाजभाजम् ।
व्यजिज्ञपच्चारु **मनोरमा**ख्ये वने **यशोभद्र**गुरुं समेतम् ॥२९५॥
वितीर्य तस्मै परितुष्टिदानं गुरुं प्रणन्तुं निरगान्नरेन्द्रः ।
नत्वोपदेशं विनिशम्य राज्ये जामातरं न्यस्य ललौ स दीक्षाम् ॥२९६॥
राज्यं समासाद्य तथा कथञ्चित् स पालयामास नृपः प्रजास्ताः ।
यथा कदाचित् **सुरसुन्दरस्य** क्ष्मापस्य नास्मार्षुरपेतबाधाः ॥२९७॥
त्रिवर्गमाराधयतो नृपस्य श्री**मङ्गल**स्य श्रितमङ्गलस्य ।
नीत्या प्रजा रञ्जयतः प्रभूताः सम्वत्सरा जग्मुरमेयशक्तेः ॥२९८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अथान्यदा श्री**जयसिंह**सूरिं प्रणम्य विज्ञानिनमन्वयुङ्क्त ।
कृताञ्जलिः प्राग्भवमात्मनोऽपि देव्यास्तथा **मङ्गलकुम्भ**भूपः ॥२९९॥
जगाद सूरिर्द्विजराजनिर्यत्कान्तिप्रतिक्षिप्ततमःप्रचारः ।
अस्ति प्रशस्तं **क्षिति**संभृतश्री**प्रतिष्ठितं** नाम पुरं गरीयः ॥३००॥
तत्रर्जुरूपः कुलपुत्रकोक्त्या ख्यातोऽपि नाम्नाऽजनि **सोमचन्द्रः** ।
कुटुम्बिनी चास्य विशुद्धशीला **श्रीदेव्य**भिख्या प्रथिता बभूव ॥३०१॥
सुहृत् तदीयो **जिनदत्त**नामा श्रद्धाधनः श्राद्धकुलावतंसः ।
देशान्तरं यत्स्वधनानि तस्मै समर्पयामास विसर्जनाय ॥३०२॥
तस्मिन्नवाप्ते विषयेऽपरस्मिन् प्रयच्छतः स्वच्छतया धनानि ।
विश्राणनेऽजस्रमहिंस्रवृत्तेः श्रद्धा विशुद्धाऽस्य समुल्ललास ॥३०३॥
तस्य प्रियाया अपि दानधर्मे शर्मैकहेतौ मतिरुज्जजृम्भे ।
प्रियस्य वृत्तानुगुणेन नार्यः प्रवर्तयन्ति व्यवहारमेताः ॥३०४॥
नयार्जितं स्वं कुलपुत्रकेण स्वं पात्रसात् तेन कृतं समग्रम् ।
अखण्डितं सौख्यमपेक्षमाणाः किं किं न कुर्वन्ति महाऽनुभवाः ? ॥३०५॥
त्वग्दोषदुष्टं समवेक्ष्य **भद्रा** सखीपतिं सा कुलपुत्रपत्नी ।
हास्याज्जगौ तां प्रति विप्रियं ते किमङ्गमाहात्म्यमिदं सखि ! स्यात् ? ॥३०६॥
येनायमीदृक् समभूत्प्रियस्ते समुल्लसत्सूरणकन्दरूपः ।
तस्या वचस्तद् विनिशम्य **भद्रा** भद्राऽपि सन्तापमधत्त बाढम् ॥३०७॥
तया गिरा तां व्यथितां विभाव्य **सौम्येन्दु**पत्नी क्षमयाम्बभूव ।
खेदं वृथा त्वं हृदि मा कृथा यत् तनोति जन्तोर्निखिलं स्वकर्म ॥३०८॥
अथ स्वमायुः परिपूर्य मृत्वा यातौ युवां तौ क्रमतोऽनुरूपौ ।
अवक्रयेणोपयमस्तवायं परार्थदानेन बभूव भूप ! ॥३०९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सख्याश्च दोषप्रतिपादनेन जज्ञे कलङ्को भवतः प्रियायाः ।
ईदृग्वचस्तस्य निशम्य सूरेस्तयोरभूत् प्राग्भवसंस्मृतिश्च ॥३१०॥

स जातजातिस्मृतिरात्मपत्न्या समं समुत्थाय गुरून् विनम्य ।
आह स्म यावत् समुपैमि गत्वा तावद् भवद्भिः स्थितिरत्र कार्या ॥३११॥

नैव प्रमादं नृपते ! विदध्या इतीरितेऽसौ गुरुभिः ससार ।
निवेश्य राज्ये तनयं विनीतं वैराग्यरङ्गात् तरसाऽऽससार ॥३१२॥

पार्श्वे गुरूणां गरिमाचलानां दक्षः स दीक्षां विविधवत् प्रपेदे ।
**त्रैलोक्यसुन्दर्य**पि कुर्वतीव पतिव्रताभावमियं यथार्थम् ॥३१३॥

क्षमां स्थिरामाश्रयतो नृपस्य तथास्य राज्येन बभूव शर्म ।
चारित्रलक्ष्मीं प्रतिपद्य हृद्यां कषायकालुष्यजयाद् यथैव ॥३१४॥

तपांसि तप्त्वा स सुदुस्तपानि निर्माय कन्दर्पमदर्पकं च ।
विहृत्य पृथ्वीं च मुनिस्तयामा स्वर्लोकलक्ष्मीमुररीचकार ॥३१५॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ७. श्रीराजवल्लभोपाध्यायविरचितम्
# मङ्गलकलशकथानकम् ॥

**उज्जयिन्यां** महापुर्यां, **वैरिसिंहो** महपतिः ।
**सोमचन्द्रा च** तद्भार्या, **धनदत्तश्च** श्रेष्ठ्यभूत् ॥१॥

धर्मार्थी सुविनीतात्मा, सत्यशीलदयान्वितः ।
गुरुदेवार्चने प्रीतः, स श्रेष्ठी धनदत्तकः ॥२॥

**सत्यभामे**ति तद्भार्या, शीलालङ्कृतिशालिनी ।
पत्यौ प्रेमपरा किन्त्वपत्यभाण्डविवर्जिता ॥३॥

साऽन्यदा श्रेष्ठिनं पुत्रचिन्ताम्लानमुखाम्बुजम् ।
दृष्ट्वा पप्रच्छ हे नाथ ! किं ते दुःखस्य कारणम् ? ॥४॥

श्रेष्ठिना च समाख्याते, तस्यैतस्मिन् यथास्थिते ।
श्रेष्ठिनी पुनरप्यूचे, पर्याप्तं चिन्तयानया ॥५॥

धर्म एव भवेन्नृणा-मिहामुत्र सुखप्रदः ।
स एव सेवनीयो हि, विशेषेण सुखैषिणा ॥६॥

तत् त्वं देवगुरौ चापि, कुरु भक्तिं यथोचिताम् ।
देहि दानं सुपात्रेभ्यः, पुस्तकानि च लेखय ॥७॥

कुर्वत इति ते पुत्रो, भावी यदा तदा वरम् ।
भविता निर्मलश्चापि, परलोकोऽन्यथावयोः ॥८॥

हृष्टः श्रेष्ठ्यप्युवाचैवं, प्रिये ! साधूदितं त्वया ।
सम्यगाराधितो धर्मो, भवेच्चिन्तामणिप्रभः ॥९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततश्च देवपूजार्थं, पुष्पग्रहणहेतवे ।
आकार्यारामिकं तस्मै, ददौ श्रेष्ठी धनं बहु ॥१०॥
स्वयं गत्वातदारामे, पुष्पाण्यानीय स प्रगे ।
गृहार्चामर्चयित्वा च, गच्छति स्म जनिलाये ॥११॥
तत्र नैषेधिकी-मुख्यान्, यथास्थानं दश त्रिकान् ।
स्थापयन् परया भक्त्या, विवधे चैत्यवन्दनम् ॥१२॥
ततः साधून्नमस्कृत्य, प्रत्याख्यानं विधाय च ।
अतिथीनां संविभागं, स चकार महामतिः ॥१३॥
अन्यदप्यखिलं धर्मकर्म शर्मनिबंधनम् ।
आह्निकं रात्रिकं चैव, **धनदत्तो** व्यधात्सुधीः ॥१४॥
अथ धर्म-प्रभावेण, तुष्टा शासनदेवता ।
ददौ तस्मै पुत्रवरं, प्रत्यक्षीभूय साऽन्यदा ॥१५॥
पुत्रे गर्भागते रात्रिशेषे श्रेष्ठिन्युदैक्षत ।
स्वप्ने हेममयं पूर्णं, कलशं मङ्गलावृत्तम् ॥१६॥
जातश्च समयेपुत्रस्ततः कृत्वोत्सवं गुरुम् ।
तस्मै **मङ्गलकलश,** इत्याख्यां तत्पिता ददौ ॥१७॥
कलायासपरः सोऽथाष्ट वर्ष प्रमितोऽन्यदा ।
तात ! त्वं कुत्र यासीति, पप्रच्छ पितरं निजम् ॥१८॥
सोऽवदद् वत्स ! गत्वाहमारामे प्रतिवासरम् ।
ततः पुष्पाणि चानीय, करोमि जिनपूजनम् ॥१९॥
ययौ पित्रा सहान्येद्युस्तत्र सोऽपि कुतूहली ।
आरामिकोऽवदत् कोऽयं, बालो नेत्रविलासकः ॥२०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ज्ञात्वा च श्रेष्टिपुत्रं तं, तस्मै सोऽपि ददौ मुदा ।
नारङ्गदाडिमादीनि, सुस्वादूनि फलान्यलम् ॥२१॥
स्वगेहे पुनरागत्य, कुर्वतो जिनपूजनम् ।
श्रेष्ठिनोऽढौकयत्पुत्रः, पूजोपकरणं स्वयम् ॥२२॥
द्वितिये च दिने तेन, सादरं भणितः पिता ।
गच्छाम्यतः परं चाहं, पुष्पानयनहेतवे ॥२३॥
निश्चिंतेनैव स्थातव्यं, त्वया तात ! निजे गृहे ।
अत्याग्रहेण तद्वाक्यमनुमेने पिताऽपि तत् ॥२४॥
एवं च कुर्वतस्तस्य, धर्माभ्यासं तथान्तरा ।
कियत्यपि गते काले, यज्जातं तन्निशम्यताम् ॥२५॥
अस्त्यत्र **भरतक्षेत्रे, चम्पा**नाम महापुरी ।
अभूत् तत्र महाबाहुः पार्थिवः **सुरसुन्दरः** ॥२६॥
राज्ञी **गुणावली** तस्य, सा निजोत्सङ्गवर्तिनीम् ।
दृष्ट्वा कल्पलतां स्वप्ने, पार्थिवाय न्यवेदयत् ॥२७॥
राजा प्रोवाच हे देवि !, तव पुत्री भविष्यति ।
सर्व-लक्षण-सम्पूर्णा, सर्व-नारी-शिरोमणिः ॥२८॥
पूर्णे कालेऽथ चार्वङ्गी, सा देवी सुषुवे सुताम् ।
**त्रैलोक्यसुन्दरी** नाम, तस्याश्चक्रे महीपतिः ॥२९॥
लावण्यरसमञ्जूषा, सौभाग्यरसनिम्नगा ।
बभूव यौवनं प्राप्ता, सा मूर्तेव सुरङ्गना ॥३०॥
तां विलोक्याऽनवद्याङ्गीं, दध्याविति धरापतिः ।
रमणः कोऽनुरुपोऽस्याः, सुताया मे भविष्यति ॥३१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ऊचे च प्रेयसी राजा, वरार्हेयं सुताऽभवत् ।
दातव्या ब्रुत तत्कस्मै, मातुरत्र प्रधानता ॥३२॥
राज्यवगयमास्माकं, जीवितादपि वल्लभा ।
नालं धर्तुं वयं प्राणान्, क्षणमप्यनया विना ॥३३॥
दातव्या तदसौ मन्त्रिपुत्रायात्रैव हे प्रिय ! ।
प्रत्यहं नयनान्दकारिणी दृश्यते यथा ॥३४॥
ततो राज्ञा समाहूय, **सुबुद्धिः** सचिवो निजः ।
अभाणि यन्मया दत्ता, त्वत्सुतायात्मनन्दिनी ॥३५॥
अमात्योऽप्यब्रवीद् देव !, किमयुक्तं ब्रवीष्यदः ? ।
कस्मैचिद् राजपुत्राय, दातुं कन्या तवोचिता ॥३६॥
राजोचे तं त्वया वाच्यमित्यर्थे किञ्चनापि न ।
दत्ता त्वत्सूनवे चेयं, पुत्री **त्रैलोक्यसुन्दरी** ॥३७॥
अथ चिन्तातुरो मन्त्रि, गृहे गत्वा व्यचिन्तयत् ।
हा व्याघ्रदुस्तटीन्याये, पतितोऽस्मि करोमि किम् ? ॥३८॥
रति-रम्भोपमाकारा, राज्ञः पुत्री सुतस्तु मे ।
कुष्ठी तदेतयोर्योगं, कथं जानन् करोम्यहम् ? ॥३९॥
अथवायं मयोपायो, लब्धो यत्कुलदेवताम् ।
आराध्य साधयिष्यामि, सर्वमात्मसमीहितम् ॥४०॥
सोऽथ ह्याराधयामास, विधिना कुलदेवताम् ।
उवाच सापि प्रत्यक्षीभूय मन्त्रिन् ! स्मृतास्मि किम् ? ॥४१॥
मन्त्र्यूचे त्वं स्वयं वेत्सि, सर्वं मे दुःखकारणम् ।
तथा कुरु यथा पुत्रो, नीरोगाङ्गो भवेन्मम ॥४२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

देव्यूचे नान्यथाकर्तुं, नृणां कर्म पुराकृतम् ।
दैवतैरपि शक्येत, वृथेयं प्रार्थना तव ॥४३॥

मन्त्री प्रोवाच यद्येवं, तदन्यमपि पुरुषम् ।
तदाकारं सुरुपं च, कुतोऽप्यानीय मेऽर्पय ॥४४॥

तेनोद्वाह्य महाराजपुत्रीं कमललोचनाम् ।
अर्पयिष्यामि पुत्रस्य, करिष्येऽस्य यथोचितम् ॥४५॥

देवतोचे पुरीद्वारे, वाजिरक्षकसन्निधौ ।
शीतव्यथानिरासार्थमग्निसेवापरो हि यः ॥४६॥

कुतोऽप्यानीय मयका, मुक्तो भवति बालकः ।
स मन्त्रिन् ! भवता ग्राह्यः, पश्चात्कुर्या यथोचितम् ॥४७॥

इत्युक्त्वान्तर्दधे देवी, हृष्टोऽथ सचिवेश्वरः ।
सर्वां विवाहसामग्रीं, प्रगुणीकुरते स्म सः ॥४८॥

अश्वपालनरं छन्नमाकार्य निजकं ततः ।
तस्मै निवेदयित्वा च, सर्वं वृत्तान्तमादितः ॥४९॥

इदमूचे च यः कश्चिदभ्येति भवदन्तिके ।
कुतोऽपि बालकोऽसौ हि, समर्प्यो मेऽविलम्बतः ॥५०॥

तं श्रेष्ठिनन्दनं तस्या, वरं विज्ञाय भाविनम् ।
**उज्जयिन्यां** ययौ पुर्यां, मन्त्रिणः कुलदेवता ॥५१॥

अन्तरिक्षस्थितोवाच, सा चैवं तस्य शृण्वतः ।
पुष्पाण्यानीय चारामाद्गच्छतो निजवेश्मनि ॥५२॥

स एष बालको याति, पुष्पभाजनपाणिकः ।
परिणेष्यति यो राजकन्यकां भाटकेन हि ॥५३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तत् श्रुत्वा विस्मितः सोऽयं, किमेतदिति संभ्रामात् ।
तातस्य कथयिष्यामीतिध्यायन् सदनं ययौ ॥५४॥
गृहं गतस्य सा वाणी, विस्मृता तस्य दैवती ।
द्वितियदिवसेऽप्येवं, श्रुत्वा सोऽथ व्यचिन्तयत् ॥५५॥
अहो ! अद्यापि सा वाणी, श्रुता या ह्यो मयाम्बरे ।
तदद्य सदनं प्राप्तः, कथयिष्याम्यहं पितुः ॥५६॥
चिन्तयतीत्यसौ यावत् तावदुत्पाट्य वात्यया ।
नीतो दूरतरारण्ये, **चम्पा**पुर्याः समीपगे ॥५७॥
भयभ्रान्तस्तृषाक्रान्तः, श्रान्तस्तत्र स बालकः ।
मानसाख्यसरस्तुल्यं, ददर्शैकं सरोवरम् ॥५८॥
तत्र वस्त्राञ्चलात्पूतं, पयः पीत्वातिशीतलम् ।
तत्सेतुस्कन्धमारूढं, स शिश्राय वटद्रुमम् ॥५९॥
तदा चास्तमितो भानुर्विपदि पतितस्य हि ।
श्रेष्ठिपुत्रस्य तस्योपकारं कर्तुमिवाक्षमः ॥६०॥
कृत्वा दर्भतुणै रज्जू, तया रज्ज्वा च तं द्रुमम् ।
समारूढो ददर्शासौ, ज्वलन्तमनलं क्वचित् ॥६१॥
ततो वटात् समुत्तीर्य, स भीतः शीतविद्रुतः ।
हुताशनानुसारेण, **चम्पा**पुर्या ययौ बहिः ॥६२॥
ततः पार्श्वेऽश्वपालानां, कुर्वाणो वह्निसेवनम् ।
यावदासीदसौ हस्यमानस्तैर्दुष्टचेष्टितैः ॥६३॥
तावत् तेन नरेणैत्य, पूर्वादिष्टेन मन्त्रिणा ।
आत्मनः पार्श्वमानीतः, कृतश्च निरुपद्रवः ॥६४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गोपयित्वातियत्नेन, प्रभातसमयेऽमुना ।
अर्पितोऽमात्यवर्यस्य, गृहे नीत्वा सगौरवम् ॥६५॥

भोजनाच्छादनप्रायैरमात्योऽप्यस्य गौरवम् ।
चकार सदनस्यान्तर्गोपनं च दिवानिशं ॥६६॥

ततोऽसौ चिन्तयामास, किमयं मम सत्क्रियाम् ।
कुरूते ? च तथैवं मां, यत्नाद् रक्षति मन्दिरे ॥६७॥

पप्रच्छ सोऽन्यदामात्यं, तात ! वैदेशिकस्य मे ।
सन्मानं किमिदं हन्त ! भवता क्रियते अधिकम् ? ॥६८॥

किं नामैषा पुरी ? को वा, देशः ? को वाऽत्रभूपतिः ? ।
तन्मे सत्यं समाख्याहि, विस्मयोऽत्र प्रवर्तते ॥६९॥

अमात्योऽप्यब्रवीच्**चम्पा**नाम्नीयं नगरी वरा ।
**अङ्गा**भिधानो देशोऽयं, राजात्र **सुरसुन्दरः** ॥७०॥

मन्त्री **सुबुद्धि**नामाहं, माननीयो महत्तमः ।
मयानीतोऽसि वत्स ! त्वं, कारणेन गरीयसा ॥७१॥

**त्रैलोक्यसुन्दरी** नाम्ना, राज्ञः पुत्री विवाहाय ।
सा दत्ता मम पुत्राय, राज्ञा कुष्ठि परं हि सः ॥७२॥

परिणीय त्वया भद्र !, विधिना सा नृपाङ्गजा ।
दातव्या मम पुत्राय, तदर्थं त्वामिहानयम् ॥७३॥

तत्श्रुत्वा मङ्गलोऽवोचदकृत्यं किं करोष्यदः ? ।
क्व सा रुपवती बाला ? निन्द्यरोगी क्व ते सुतः ? ॥७४॥

नेदं कार्यं करिष्यामि, कथञ्चिदपि निष्ठुरम् ।
कूपे क्षिप्त्वा जनं मुग्धं, वरत्राकर्तनोपमम् ॥७५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मन्त्र्यूचे चेन्न कर्मेदं, त्वं करिष्यसि दुर्मते ! ।
तदा त्वां निजहस्तेन, मारयिष्यामि निश्चितम् ॥७६॥
एवं निस्त्रिंशमाकृष्य, भणितोऽपि **सुबुद्धि**ना ।
अकृत्यं नानुमेने तत्, स कुलीनशिरोमणिः ॥७७॥
प्रधानपुरुषैर्मन्त्री, निषिद्धस्तस्य मारणात् ।
अभाणि सोऽपि मन्यस्व, भद्र ! त्वं मन्त्रिणो वचः ॥७८॥
ततोऽसौ चिन्तयामास, भवितव्यमिदं खलु ।
अन्य**थोज्जयिनी** क्वासौ, ममेहागमनं क्व च ? ॥७९॥
इदमाकाशवाचापि, दैवत्या कथितं तदा ।
तत्करोम्यहमप्येवं, यद् भाव्यं तद् भवत्वहो ॥८०॥
विचिन्त्यैवं पुनः स्माह, **मङ्गलो** मन्त्रिणं प्रति ।
यद्यवश्यमिदं कार्यं, मया कर्तव्यमेव तत् ॥८१॥
तदाहमपि वः पार्श्वे, नाथ ! नाथामि सर्वथा ।
मह्यं ददाति यद् राजा, वस्तुजातं ममैव तत् ॥८२॥
स्थापनीयं च तत्सर्व**मुज्जयिन्या** पुरोऽध्वनि ।
एवमस्त्विति तद् वाक्यं, मेने मन्त्र्यपि बुद्धिमान् ॥८३॥
समासन्ने ततो लग्ने, हस्तिस्कन्धाधिरोपितः ।
स निन्ये भूपतेः पार्श्वे, वस्त्राभरणभूषितः ॥८४॥
**त्रैलोक्यसुन्दरी** साथ, दृष्ट्वा तं मन्मथोपमम् ।
अमंस्त तद्वरप्राप्त्या, कृतार्थं स्वं मनस्विनी ॥८५॥
ततश्च विप्रे पुण्याहं पुण्याहमिति जल्पति ।
चत्वारि परितो वह्नेर्भ्रमाते मङ्गलानि तौ ॥८६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रथमे मङ्गले राजा, चारु वस्त्राण्यनेकशः ।
सुवर्णाभरणादीनि, वराय द्वितये ददौ ॥८७॥
तृतीये मणिरत्नादि, चतुर्थे च रथादिकम् ।
जायापत्योस्तयोरिति, जज्ञे पाणिग्रहोत्सवः ॥८८॥
वरः समाप्तेऽप्युद्वाहे, वधूहस्तं न मुञ्चति ।
उवाच नृपतिस्तं च, वत्स ! यच्छामि किं नु ते ? ॥८९॥
ततश्च याचितं तेन, जात्यघोटकपञ्चकम् ।
तत् तस्मै शीघ्रमेवासौ, प्रददौ प्रीतमानसः ॥९०॥
वाद्यमाने ततस्तूर्ये, स्फुरद्धवलमङ्गले ।
मन्त्रिणा स्वगृहं निन्ये, समं वद्ध्वा स **मङ्गलः** ॥९१॥
तत्रामात्यगृहजनश्छन्नं छन्नमभाषत ।
कथं निर्वास्यतेऽद्यापि, नायं वैदेशिको नरः ? ॥९२॥
**त्रैलोक्यसुन्दरी** साथ, चलचित्तं निजं पतिम् ।
ज्ञात्वेङ्गितैस्ततस्तस्योपान्तं नैवामुचत्क्षणं ॥९३॥
ततः क्षणान्तरेणासौ, देहचिन्तार्थमुत्थितः ।
जलपात्रं गृहीत्वाशु, तदनु प्राचलच्च सा ॥९४॥
कृतायामपि तस्यां च, शून्यचित्तं रहःस्थितम् ।
उवाच प्रेयसी कान्त ! बाधते त्वां क्षुधा नु किम् ? ॥९५॥
आमेति भणितं तेन, दासी हस्तेन मोदकान् ।
आनाय्य स्वगृहात् तस्मै, ददौ **त्रैलोक्यसुन्दरी** ॥९६॥
भुक्तेषु तेषु पानीयं, पिबता तेन भाषितं ।
अहो ! रम्यतरा एते, मोदकाः सिंहकेशराः ॥९७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**उज्जयिन्या** नगर्याश्चेन्नीरमास्वाद्यतेऽमलम् ।
तदा तृप्तिर्भवेन्नूनं, मोदकेष्वशितेष्वपि ॥९८॥

तत् श्रुत्वा राजपुत्री सा, दध्यावाकुलचेतसा ।
अहो ! अघटमानं किं, वाक्यमेषः प्रजल्पति ? ॥९९॥

मातुलस्य गृहं नूनम**थावन्त्यां** भविष्यति ।
अस्य मे स्वामिनस्तेन, स्मृतिमागादिदं खलु ॥१००॥

ततश्च निजहस्तेन, मुखपाटवकारणम् ।
पञ्चसौगन्धिकं तस्मै, ताम्बूलं दत्तवत्यसौ ॥१०१॥

सन्ध्याकाले पुनर्मन्त्रिमानुषैः प्रेरितोऽथ सः ।
**त्रैलोक्यसुन्दरी**मेवमूचे मतिमतां वरः ॥१०२॥

गमिष्यामि पुनर्देहचिन्तायामुदरार्त्तिभाक् ।
त्वया क्षणान्तरेणागन्तव्यमादाय पुष्करम् ॥१०३॥

निरगात्स ततो मन्त्रिमन्दिरात्पुरुषांश्च तान् ।
पप्रच्छ राजदत्तं भोः, क्वास्ति तद् वस्तु मामकम् ? ॥१०४॥

तैश्च तद् दर्शितं सर्व**मुज्जयिन्याः** पथि स्थितम् ।
ततः सारतरं वस्तु, निक्षिप्याथ रथे वरे ॥१०५॥

तस्मिंश्च योजयित्वाश्वांश्चतुरः पृष्ठतस्तथा ।
बध्वैकं वस्तु मुक्त्वा च, तत्रैव सोऽचलत्पुरः ॥१०६॥

पृष्टाश्चानेन ते ग्रामा, उज्जयिन्यध्वगाश्च ये ।
मनुष्याणां ततस्तेऽपि, जगुस्तं नामपूर्वकम् ॥१०७॥

ततो रथधिरूढोऽसौ, तेन मार्गेण बुद्धिमान् ।
स्तोकैरेव दिनैः प्राप्तस्तामेव नगरीं निजाम् ॥१०८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतश्च पितरौ तस्य, तमन्वेष्य विलप्य च ।
बहुधा बहुभिर्घस्रैर्गतशोकौ बभूवतुः ॥१०९॥
गृहाभिमुखमायान्तं, रथारूढं विलोक्य तम् ।
जगादाथाऽपरिज्ञाय, जनन्यस्य ससम्भ्रमम् ॥११०॥
प्रेर्यते गृहमध्येन, राजपुत्र ! कथं रथः ? ।
कर्तास्यभिनवं मार्गं, किं त्वं त्यक्त्वा पुरातनम् ? ॥१११॥
इत्थं निषिध्यमानेऽपि, न यावद् विरराम सः ।
आचख्यौ श्रेष्ठिनस्तावत्, श्रेष्ठिन्याकुलिताशया ॥११२॥
श्रेष्ठ्यप्यस्य निषेधार्थं, गृहाद् यावन्निरीयिवान् ।
तावद् रथात्समुत्तीर्य, पितुर्पादौ ननाम सः ॥११३॥
उपलक्ष्य ततस्ताभ्यामाश्लिष्टस्तनयो निजः ।
सद्यः प्रादुर्भवद्धर्षाश्रुपूरप्लावितेक्षणं ॥११४॥
पप्रच्छ चोपविष्टोऽसौ, वत्सर्द्धिः कुत ईदृशी ? ।
क्व च कालमियन्तं त्वं, स्थितोऽसि ? वद नन्दन ! ? ॥११५॥
ततश्चात्मकथा तेन, पितुरग्रे निवेदिता ।
वाक्श्रुत्यपहारादि-स्वस्थानागमनावधिः ॥११६॥
अहो पुत्रस्य सौभाग्यमहो पुत्रस्य दक्षता ।
अहो धैर्यमहो भाग्यमिति प्राशंसतामिमौ ॥११७॥
ततः प्राकारसंयुक्तं, स स्वं गेहमकारयत् ।
अश्वानां रक्षणार्थं च, मन्दुरादिनियन्त्रणम् ॥११८॥
सोऽन्येद्युर्जनकं स्माह, मम तात ! कलागमः ।
न्यूनोऽस्त्यद्यापि सपूर्णं, करिष्यामि त्वदाज्ञया ॥११९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ततश्चानुमतः पित्रा, कलाचार्यस्य सन्निधौ ।
कलाभ्यासं चकारासौ, स्वकीय सदनान्तिके ॥१२०॥

इतश्च मन्त्रिणा तेन, रात्रौ **मङ्गल**वेशभृत् ।
प्रेषितो वासभुवने, वधूपान्ते सुतो निजः ॥१२१॥

शय्यारूढं च तं दृष्ट्वा, दध्यौ **त्रैलोक्यसुन्दरी** ।
कोऽयं कुष्ठाभिभूताङ्गः, समायातो ममान्तिके ? ॥१२२॥

करस्पर्शमथो कर्तुमुद्यतेऽस्मिन् झटित्यपि ।
सा शय्यायाः समुत्थाय, निर्ययौ भुवनाद्बहिः ॥१२३॥

दासीभिर्भणिता किं नु, स्वामिन्यसि ससंभ्रमा ? ।
सावदद् देवतारुपो, गतः क्वापि स मे पतिः ॥१२४॥

प्रत्यूचुस्ता इदानीं स, प्रविष्टोऽत्र पतिस्तव ।
साब्रवीन्नास्त्यसावत्र, कुष्ठी कोऽपि स विद्यते ॥१२५॥

दासी मध्ये ततः सुप्ता, तामतीत्य विभावरीं ।
**त्रैलोक्यसुन्दरी** प्रातर्ययौ पितृगृहं निजं ॥१२६॥

**सुबुद्धि**रपि दुर्बुद्धिः, सोऽथ मन्त्री महीपतेः ।
ययौ समिपमन्येद्युश्चिन्ताश्याममुखः किल ॥१२७॥

कृत प्रणतिमासीनमथैनं पृथिवीपतिः ।
हर्षस्थाने विषादः किं, तवेत्यूचे कृताग्रहः ॥१२८॥

स जगाद महाराज !, विचित्रा कर्मणां गतिः ।
अस्माकं मन्दभाग्यानामागता विपदोऽधुना ॥१२९॥

चिन्तयत्यन्यथा जीवो, हर्षपूरितमानसः ।
विधिस्त्वेष महावैरी, कुरुते कार्यमन्यथा ॥१३०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

राजा प्रोवाच हे मन्त्रिन्नुक्त्वा स्वदु:खकारणं ।
मामप्यमुष्य दुःखस्य, संविभागयुतं कुरु ॥१३१॥
निःश्वस्य सचिवोऽप्यूचे, देव ! दैवं करोति यत् ।
तद् वक्तुमपि नो शक्यमश्रद्धेयं च शृण्वतां ॥१३२॥
स्वामीपादैः सप्रसादैर्दत्ता पुत्री ममात्मजा ।
तस्यां तु परिणीतायां, यज्जातं तन्निशम्यतां ॥१३३॥
यादृग् राज्ञा स्वयं दृष्टस्तादृगेव सुतो मम ।
अधुना कुष्ठरोगार्त्तो, दृश्यते क्रियते नु किं ? ॥१३४॥
तत् श्रुत्वा भूपतिर्दध्यौ, सा नूनं मम नन्दिनी ।
कुलक्षणा यया स्पृष्टः कुष्ठी जातोऽस्य पुत्रकः ॥१३५॥
स्वकर्मफलभोक्तारः, सर्वे जगति जन्तवः ।
अयं हि निश्चयनयो, यद्यप्यस्ति जिनोदितः ॥१३६॥
तथापि व्यवहारोऽयं, यो हेतुः सुखदुःखयोः ।
स एव क्रियते लोकैर्भाजनं गुणदोषयोः ॥१३७॥
स्वकर्मपरिणामेन, जज्ञे पुत्रोऽस्य कुष्ठिकः ।
जाता च तन्निमित्तत्वात्, पुत्री मे दुःखभाजनम् ॥१३८॥
ऊचे च सचिवाऽनर्थमकार्षमहमीदृशम् ।
नादास्यं चेदहं पुत्रीं, कुष्ठी न स्यात्सुतोऽपि ते ॥१३९॥
अमात्योऽप्यब्रवीत्स्वामिन् ! हितं कार्यं प्रकुर्वताम् ।
को दोषो भवतामत्र ?, दोषो मत्कर्मणां पुनः ॥१४०॥
अथोत्थाय गतो मन्त्री, सा तु **त्रैलोक्यसुन्दरी** ।
इष्टाप्यनिष्टा सञ्जाता, राज्ञः परिजनस्य च ॥१४१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

आललाप न कोऽप्येनामीक्षते तां दृशापि न ।
एकत्र गुप्तगेहेऽस्थात्, सा मातृगृहपृष्टतः ॥१४२॥
अचिन्तयच्च दुःकर्म, पुरा यद् विहितं मया ।
तेन क्वापि ययौ नंष्ट्वा, परिणीतः स मे पतिः ॥१४३॥
अन्यच्च लोकमध्ये मे, कलङ्कः समुपस्थितः ।
किं करोमि ? क्व गच्छामि ? व्यसने पतितास्मि हा ! ॥१४४॥
एवं चिन्ता प्रकुर्वन्त्यास्तस्याश्चिते स्मृतं तदा ।
भवि**तोज्जयिनी**पुर्यां, प्राप्तो नूनं स मे पतिः ॥१४५॥
तदा च मोदकांस्तेन, भुक्त्वा सञ्जल्पितं किल ।
एते हि मोदका रम्याः, किन्त्व**वन्त्या** जलोचिताः ॥१४६॥
ततः केनाप्युपायेन, तत्र गच्छाम्यहं यदि ।
तदा तं हि मिलित्वाहं, भवामि सुखभागिनी ॥१४७॥
अथान्येद्युरवक् साऽम्बां, हे मातर्जनको मम ।
एकवारं यथा वाक्यं, शृणोति त्वं तथा कुरु ॥१४८॥
तां दृष्ट्वानादरपरामन्येद्युः **सिंह**नामकं ।
सामन्तं ज्ञापयामास, सा तमर्थं कृताञ्जलिः ॥१४९॥
सोऽथ राजकुले गत्वा, नृपं नत्वोपविश्य च ।
इति विज्ञपयामास, प्रस्तावे वदतां वरः ॥१५०॥
नृपाथ भवतां मान्या, कन्या सम्प्रत्यसम्मता ।
वराकी वर्तते कष्टेनैषा **त्रैलोक्यसुन्दरी** ॥१५१॥
अस्याः सन्मानदानानि, दूरेऽस्त्वालापनं तथा ।
वाक्यश्रवणमात्रेण, प्रसादोऽद्य विधीयतां ॥१५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पार्थिवोऽथाश्रुपूर्णक्षः, प्रोचे **सिंह** ! पुराभवे ।
अनया विहितं किञ्चिदभ्याख्यानादि दुष्कृतं ॥१५३॥
सा तत्कर्मप्रभावेण, कलङ्कितनूरभूत् ।
इष्टाप्यनिष्टतां प्राप्ता, गाढमस्माकमप्यहो ! ॥१५४॥
वाक्यं तदद्य यत्किञ्चिद् वक्तुं सा मे समीहते ।
वदतु तत्सुखेनेयमत्रागत्य विचक्षण ! ॥१५५॥
ततस्तदनुमत्यैत्य, तत्र **त्रैलोक्यसुन्दरी** ।
उवाच तात ! मे वेषं, कुमारोचितमर्पय ॥१५६॥
भूयो राजाब्रवीत् सिंहं, किमिदं वक्त्यसौ वचः ? ।
सोऽवदद् देव युक्तं हि, क्रमोऽस्ति यदयं किल ॥१५७॥
राज्ञां गृहेषु चेत्पुत्री, गुरुकार्येण केनचित् ।
याचते यदि पुंवेषं, दातव्योऽस्यै तदा हि सः ॥१५८॥
ततस्तदनुमत्यास्यै, पुंवेषं पार्थिवो ददौ ।
आदिदेश च तं **सिंहं**, तद्रक्षार्थं बलान्वितम् ॥१५९॥
जगादाथ कुमारी सा, ताताज्ञा चेद् भवेत् तव ।
**उज्जयिन्यां** तदा यामि, कारणेन गरीयसा ॥१६०॥
कारणं कथयिष्यामि, जाते मेऽथ समीहिते ।
अधुना कथिते तस्मिन् परिणामो न शोभनः ॥१६१॥
पुत्रिके ! मम वंशस्य, यथा नाभ्येति दूषणं ।
तथा कार्यं त्वयेत्युक्त्वा, विसृष्टा सा महीभुजा ॥१६२॥
ततश्च **सिंह**सामन्त-भूरिसैन्यसमन्विता ।
अखण्डित प्रयाणैः सा, ययावु**ज्जयिनीं** पुरीम् ॥१६३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

**वैरसिंहो** नृपोऽप्येवं, शुश्राव जनतामुखात् ।
यच्च**म्पाया:** समागच्छन्नस्त्यत्र नृपनन्दनः ॥१६४॥
अभियानादिसन्मानस्वागतप्रश्नपूर्वकम् ।
पुरीं प्रावेश्य तेनासावानीतो निजमन्दिरे ॥१६५॥
पृष्टश्चागमनार्थं सः, प्रोवाच नगरीमिमाम् ।
दृष्टुमाश्चर्यसम्पूर्णामागतोऽस्मि कुतूहलात् ॥१६६॥
ततः प्रोक्तो नरेन्द्रेण, त्वया स्थेयं ममौकसि ।
**सुरसुन्दर**राजस्य, ममगेहस्य नान्तरं ॥१६७॥
राजढौकितगेहे सा, तस्थौ सबलवाहना ।
पत्तींश्चिन्त्यादिशत्स्वादुनीरस्थानं निरीक्ष्यताम् ॥१६८॥
पूर्वस्यां दिशि ते तत् तु, ज्ञात्वा तस्यै न्यवेदयन् ।
तन्मार्गे कारितावासेऽसौऽवसच्च नृपाज्ञया ॥१६९॥
गच्छतो नीरपानार्थमन्यदाश्वान्निरीक्ष्य तान् ।
सा दध्यौ मम तातस्य, सत्का एते तुरङ्गमाः ॥१७०॥
तेषामनुपदं प्रेष्य, पुनर्भृत्यान् विवेद सा ।
भर्तृगृहाभिधानादिसर्वशुद्धिं मनस्विनी ॥१७१॥
ज्ञानाभ्यासपरं तं च, ज्ञात्वा **त्रैलोक्यसुन्दरी** ।
उवाच **सिंहं** भर्ता मे, दृष्टव्योऽथ कथं ? वद ॥१७२॥
**सिंह**स्यानुमतेनाथ, कुमारी सा विचक्षणा ।
सच्छात्रं तं कलाचार्यं, भोजनाय न्यमन्त्रयत् ॥१७३॥
भोजनार्थमुपाध्याये तत्रायाते ददर्श सा ।
छात्रमध्ये स्वभर्त्तारं, हृदयानन्ददायिनम् ॥१७४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मा आसनमात्मीयं, स्थाल सादापयत् तथा ।
अकारयद् विशेषेण, गौरवं भोजनादिषु ॥१७५॥
ततो वस्त्राणि सर्वेभ्यो, यथायुक्तमदत्त सा ।
तस्मै निजाङ्गलग्नं च, वासोयुग्म मनोहरम् ॥१७६॥
सोवाचाथ कलाचार्यमेतन्मध्यात् त्वदाज्ञया ।
यो जानाति स आख्यातु, छात्रो मम कथानकम् ॥१७७॥
सर्वैरपीर्ष्यया छात्रैर्निर्दिष्टोऽथ स **मङ्गलः** ।
उपाध्यायाज्ञया धीमान्, वक्तुमेवं प्रचक्रमे ॥१७८॥
अनुभूतं चरित्रं वा, कथयामि कथानकम् ? ।
सावदच्चरितं ब्रूहि, पर्याप्तं कल्पितेन भोः ॥१७९॥
**मङ्गल**श्चिन्तयामास, सैषा **त्रैलोक्यसुन्दरी** ।
**चम्पा**पुर्यां भाटकेन, परिणीता हि या मया ॥१८०॥
केनापि हेतुनेहागाद् भूत्वा पुंवेषधारिणी ।
कथायामि ततो नूनं, स्वानुभूतां कथामहम् ॥१८१॥
सोऽवदद् या कथा लोके, प्रिया चित्रकरी भवेत् ।
स्वकीयामहमेतां तां, कथयामि निशम्यताम् ॥१८२॥
ततश्चात्मकथा तेनादितस्तत्र प्रकाशिता ।
तावद् यावदमात्येन, गृहान्निर्वासितो ह्यसौ ॥१८३॥
अत्रान्तरे कृतालीककोपा राजसुतावदत् ।
अमुं गृह्णीत गृह्णीत, रे ! रे ! मिथ्याप्रवादिनम् ॥१८४॥
इत्युक्ते पत्तयस्तस्यास्तद्ग्रहार्थं समुद्यताः ।
तयैव वारिताः शीघ्रं, स चानीतो गृहान्तरे ॥१८५॥

अथैनमासनेऽध्यास्य, **सिंह**मूचे नृपाङ्गजा ।
भद्र ! येनाहमूढास्मि स एवायं प्रियो मम ॥१८६॥
किमत्र युज्यते कर्तुमित्युक्तः सोऽपि चाब्रवीत ।
अयं हि तव चेद् भर्ता, तदा सेव्यो ह्यशङ्कितम् ॥१८७॥
सोचे **सिंह** ! तवाद्यापि, चित्ते यद्यपि संशयः ।
तदास्य मन्दिरे गत्वा, स्थालादीनि विलोकय ॥१८८॥
तथाकर्तुमथो **सिंहो, धनदत्त**गृहं ययौ ।
स तु छात्रमुखात्पुत्रापदं श्रुत्वाऽऽकुलोऽभवत् ॥१८९॥
पुत्रस्य गौरवोदन्तमाख्यायैतेन बोधितः ।
दर्शयामास स स्थालादीनि तस्य विवेकतः ॥१९०॥
वद्ध्वाः स्वरूपकथनेनाह्लाद्य श्रेष्टिनं ततः ।
**सिंहः** पुना राजपुत्र्याः, समीपं समुपाययौ ॥१९१॥
**सिंहे**नानुमता साथ, कृत्वा स्त्रीवेशमद्भुतम् ।
बभूव वल्लभा तस्य, **मङ्गल**स्य महात्मनः ॥१९२॥
ययौ च श्रेष्ठिनो वेश्म, तद्युग्मं पार्थिवोऽपि तत् ।
आकार्य सर्ववृत्तान्तं, पृष्ट्वा श्रुत्वा विसिष्मिये ॥१९३॥
ततस्तत्रैव सौधे स, गत्वा राजाज्ञया पुनः ।
समं **त्रैलोक्यसुन्दर्या**, विललासाथ **मङ्गलः** ॥१९४॥
**सुन्दर्या** प्रेषितः सोऽथ, **सिंहः** सबलवाहनः ।
लात्वा पुरुषवेषं तं ययौ **चम्पा**पुरीं पुनः ॥१९५॥
तेनाथ सर्व वृतान्ते, कथिते जगतीपतिः ।
हृष्टोऽभाषिशिष्ट वत्साया, अहो ! मे मतिकौशलम् ॥१९६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अहो ! कुधीरमात्यस्य, पापकर्मविधायिनः ।
येनाऽदोषापि मत्पुत्री, सदोषा विहिता हहा ! ॥१९७॥
**सिंहं** पुनरपि प्रे**ष्योज्जयिन्यां** निजनन्दिनीम् ।
समानाय्यावनीपालः, सञ्जातोऽतीवहर्षभाक् ॥१९८॥
अमात्यं धारयित्वा च, मार्यमाणं महीभुजा ।
**मङ्गलो** मोचयामास, गाढाभ्यर्थनया नृपात् ॥१९९॥
जामातुरुपरोधेन, मया मुक्तोऽसि पाप ! रे ! ।
इति चोक्तवता राज्ञा, सोऽथ निष्कासितः पुरात् ॥२००॥
अपुत्रः सोऽथ भूपालो, मत्वा जामातरं सुतम् ।
तत्रैवानाययामास, तन्मातापितरावपि ॥२०१॥
अन्येद्युर्मन्त्रिसामन्तसम्मत्योत्सवपूर्वकम् ।
**मङ्गलकलशं** राज्ये, सुधीः स्थापयति स्म सः ॥२०२॥
**यशोभद्रा**भिधानानां, सूरीणां चरणान्तिके ।
**सुरसुन्दर**भूपालः, परिव्रज्यामुपाददे ॥२०३॥
राज्ये संस्थापितः कोऽपि वणिग्जातिरितीर्ष्यया ।
सीमास्थपार्थिवा राज्यं, हर्तुं तस्योपतस्थिरे ॥२०४॥
सेनया चतुरङ्गिण्या, सहितेन महौजसा ।
दृढपुण्यप्रभावेण, जिताः सर्वेऽपि तेन ते ॥२०५॥
शान्ताऽमित्रस्य तस्याथ, राज्यं पालयतः सतः ।
पत्न्यां **त्रैलोक्यसुन्दर्यां**, सुतोऽभूज्**जयशेखरः** ॥२०६॥
स च राजा निजे देशे, जिनचैत्यान्यनेकशः ।
जिनार्चारथयात्रादिधर्मकृत्यान्यकारयत् ॥२०७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अन्यदोद्यानमायातं, **जयसिंहा**भिधं गुरुम् ।
गत्वा ववन्दे भवेन, सकलत्रः स भूपतिः ॥२०८॥

पप्रच्छ च यथा केन, कर्मणा भगवन् ! मया ।
प्राप्ता विडम्बनोद्वाहे, देव्या प्राप्तं च दूषणम् ? ॥२०९॥

सूरिरूचेऽथ **भरते,** क्षेत्रेऽत्रैवास्ति पत्तनम् ।
**क्षितिप्रतिष्टितं** नाम, धनधान्यसमृद्धिभाक् ॥२१०॥

आसीत् तत्र **सोमचन्द्रा**ऽभिधानः कुलपुत्रकः ।
**श्रीदेवी**ति च तद्भार्या, तौ मिथः प्रीतिशालिनौ ॥२११॥

**सोमचन्द्रः** प्रशान्तोऽसावार्जवादिगुणान्वितः ।
मान्यः समस्त लोकानां, तस्य भार्या च तादृशी ॥२१२॥

इतस्तत्रैव नगरे, **जिनदेवा**भिधः सुधीः ।
श्रावकोऽभूत्समं तेन, तस्य मैत्री निरन्तरम् ॥२१३॥

**जिनदेवो** धनाकाङ्क्षी, धने सत्यपि सोऽन्यदा ।
देशान्तरं गन्तुकामो, निजमित्रमभाषत ॥२१४॥

धनायाहं गमिष्यामि, मयि तत्र गते त्वया ।
मामकीनं धनं सप्तक्षेत्र्यां वाप्यं यथाविधि ॥२१५॥

तवापि तस्य पुण्यस्य, षष्ठांशो भवतादिति ।
दिनाराणां सहस्राणि, दश तस्यार्पयत्करे ॥२१६॥

गते देशान्तरे तस्मिन्, **सोमचन्द्रो**ऽथ तत्सुहृद् ।
व्ययति स्म यथास्थानं, तद्द्रव्यं शुद्धचेतसा ॥२१७॥

आत्मीयमपि शक्त्यानुसारेणायं व्यधाद् व्ययम् ।
तज्ज्ञात्वा तस्य भार्यापि, धर्मं भेजेऽनुमोदनात् ॥२१८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

तस्मिन्नेव पुरे तस्याः, सखी **भद्रा**भिधानतः ।
**नन्द**स्य श्रेष्ठिनः पुत्री, **देवदत्त**स्य गेहिनी ॥२१९॥
**देवदत्तः** स कालेन, कर्मदोषेण केनचित् ।
कुष्ठी जज्ञे ततो **भद्रा,** तत्प्रिया विषसाद सा ॥२२०॥
पुरः सख्यास्तयान्येद्युस्तत्स्वरुपं निवेदितम् ।
तया च हासपरया, भणिता सा ससंभ्रमम् ॥२२१॥
हले ! त्वत्सङ्गदोषेण, कुष्टी जज्ञे पतिस्तव ।
ममापि दृष्टिमार्गात् त्वमतोऽपसर दूरतः ॥२२२॥
सा तेन वचसा दूना, त्रपयाधोमुखी स्थिता ।
हास्यमेतदिति प्रोच्य, तयैवाह्लिदिता ततः ॥२२३॥
स **सोमचन्द्रः श्रीदेव्या,** तया सार्धं स्वभार्यया ।
साधुसंसर्गतः प्राप्तं, श्राद्धधममपालयत् ॥२२४॥
अन्ते समाधिना मृत्वा, सौधर्मे त्रिदशाविमौ ।
दम्पती समजायेतां, पञ्चपल्योपमस्थिती ॥२२५॥
**सौधर्मात्सोमचन्द्रा**त्मा, च्युत्वाभूद् भूपते ! भवान् ।
जीवश्च्युत्वा च **श्रीदेव्या,** जज्ञे **त्रैलोक्यसुन्दरी** ॥२२६॥
परद्रव्येण यत्पुण्यं, भवतोपार्जितं तदा ।
तदेषा भाटकेनैव, परिणीता नृपात्मजा ॥२२७॥
हास्येनापि वयस्यायै, यद् दत्तस्त्वनया पुरा ।
कलङ्कः कर्मणा तेन, कलङ्कोऽस्या अपीहलु ॥२२८॥
तदाकर्ण्य विरक्तौ तौ, दत्त्वा राज्यं स्वसूनवे ।
राजा राज्ञी च प्रव्रज्यां, पार्श्वे जगृहतुर्गुरोः ॥२२९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

क्रमेण सोऽथ राजर्षिः, सर्वसिद्धान्तपारगः ।
स्थापितो गुरुणा सूरिपदे परिकरावृतः ॥२३०॥

**त्रैलोक्यसुन्दरी** साध्वी, स्थापिता च प्रवर्तिनी ।
विपद्य तौ ततः प्रान्ते, **ब्रह्म**लोकमुपेयतुः ॥२३१॥

ततश्च्युतौ मनुष्यत्वं, प्राप्यानिमिषतां पुनः ।
एवं भवे तृतीये तौ, प्राप्स्यतः पदमव्ययम् ॥२३२॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ८. श्रीभावचन्द्रसूरिविरचितम्
# मङ्गलकलशकथानकम् ॥

**उज्जिन्यां** महापुर्यां **वैरसिंहो** राजा तत्प्राणवल्लभा **सोमचन्द्रा** प्रियाऽभूत् । **धनदत्त**नामा श्रेष्ठीपुङ्गव आसीत् । स किं लक्षणः ? सुविनीतः सत्यशीलदयान्वितो गुरुदेवार्चनतत्परः परोपकारप्रवण ईदृशः श्रेष्ठी । तद्भार्या **सत्यभामा** । सापि सुशीला पत्यौ प्रेमपरा, परन्तु सन्तानविवर्जिताऽस्ति । एकदा सा श्रेष्ठिनं सुतचिन्ताम्लानवदनं वीक्ष्य पप्रच्छ–हे कान्त ! किं ते दुःखस्य कारणं ? तदा श्रेष्ठी यथातथं बभाषे । तद्वचः श्रुत्वा श्रेष्ठिनी पुनरप्याह–हे प्राणनाथ ! चिन्तयाऽलम् । इहलोके परलोके च नृणां समीहितार्थदायको धर्म एव । अतः कारणत् स एव विशेषेण सेवनीयः सुखेन । इत्युक्ते श्रेष्ठिना जगदे–कया युक्त्या धर्मः क्रियते ? तत्प्रिये ! कथ्यताम् । श्रेष्ठिनी प्राह–हे स्वामिन् ! देवाधिदेवश्रीजिनविषये पूजां सुगुरोर्भक्तिं कुरुष्व, पात्रेभ्यो दानं देहि, सिद्धान्तपुस्तकानि लेखय, एवं धर्मध्यानं कुर्वतो यदि पुत्रो भावी, तदा वरं, कदाचित् पुत्रो न भविता, तर्हि नाथ ! परलोके निर्मलमखण्डसौख्यं भविष्यति । एतद्वाक्यं श्रुत्वा श्रेष्ठी हृष्टोऽवादीत्–प्रिये ! त्वया साधूक्तम् । सम्यगाराधितो धर्मश्चिन्तामणिकल्पद्रुमतुल्यतां दधाति इति निश्चित्य स्वमनसि देवपूजार्थं पुष्पग्रहणाय श्रेष्ठिनाऽऽरामिकं समाकार्य तस्मै धनं घनं ददे । ततश्च प्रत्यहं निरन्तरमेव प्रगे समुत्थाय श्रेष्ठी स्वयमेव वाटिकां गत्वा सद्यः कुसुमान्यानीय स्वगृहप्रतिमाऽर्चनं विधाय नगरमद्यस्थजिनालये गच्छति । तत्र नैषेधिकीमुख्यान् यथास्थानं दश त्रिकान्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सत्यापयन् परया भक्त्या चैत्यवन्दनां विदधे । ततः साधून्नत्वा विधिं विधाय प्रत्याख्यानं कृत्वा सुमुनीनां संविभागं चक्रे । एवं तस्य श्रेष्ठिनः समस्तमप्याह्निकं रात्रिकं सर्वशर्मकृद्धर्मकर्म कुर्वतः शासनाधिष्ठायिनी देवी सन्तुष्टा पुत्रवरं प्रत्यक्षीभूय ददौ । तेन वचसा स प्रमुदितः श्रेष्ठी । इतश्च पुण्यप्रसादाद् देवतादेशाच्च श्रेष्ठिनी यस्यां रात्रौ पुत्रगर्भं दधौ, तस्यां निशि तया स्वप्ने हेममयः पूर्णकलशो मङ्गलान्वितो दृष्टः । तदा सा जजागार । प्रमुदिता समभूत् । क्रमेण परिपूर्णसमये शुभवेलायां पुत्रो जातः । तदा महोत्सवो बभूव । पित्रा दीनदुःस्थितानां स्वर्णरत्नादिदानं दत्त्वा समग्रस्वजनमेलापकसमक्षं स्वप्नानुसारेण **मङ्गलकलश** इति नाम व्यधीयत । ततः स क्रमेण प्रवर्धमानो विद्याभ्यासं कुर्वन्नष्टवर्ष-प्रमाणोऽजनिष्ट । अन्यदा तेनेति पृष्टम्—हे तात ! नित्यं त्वं प्रातः समुत्थाय क्व यासि ? तदा पित्रा प्रोक्तम्—प्रतिदिनं देवपूजार्थं वाटिकायां पुष्पग्रहणार्थं यामि । सुतेनोचे-अहमपि सार्थे समेष्यामि इत्युक्ते जनकेन वार्यमाणोऽपि तद्दिने सार्थे ययौ । आरामिकेण श्रेष्ठिसुतं विज्ञाय तस्य बालकस्य प्रीतये नारिङ्गजम्बीरककरणादीनि सुस्वादूनि फलानि दत्तानि। ततः श्रेष्ठी प्रसूनान्यादाय सपुत्रः स्वगृहे गतः । तस्मिन् दिने श्रेष्ठिना पुत्रेण सह स्नानाऽर्चनभोजनादि कृतम् । ततः सुतो लेशखाला-मगात् । तदनन्तरं द्वितीयवासरे महताऽऽग्रहेण वाटिकायां पुत्र एकाक्येव पुष्पाण्यादातुं ययौ । आरामतश्चारुपुष्पाणि गृहीत्वा समागात् । ततस्तेन पितुरित्थं निवेदितम्—अथाहमेव कुसुमग्रहणाय यास्यामि । ततो भवद्भिर्धर्मध्यानपरैः स्वगृह एव स्थातव्यम् । तदीयवचसा तेनानुमतम् । ततो निरन्तरं वाटिकातः सुतः कुसुमान्यानयति । श्रेष्ठी सुखेन देवार्चनं करोति । एतावता यज्जातं, तन्निशम्यताम्—

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अत्रैव भरतक्षेत्रे **चम्पा** नाम महापुरी विद्यते । तत्र **सुरसुन्दरो** राजा । राज्ञी **गुणावली** । एकदा सा स्वप्नमध्ये निजोत्सङ्गे कल्पलतां दृष्ट्वा जागरूका सती भर्तुः कथयामास । तदा राज्ञा स्वधिया विचार्य प्रोक्तम्—एतत्स्वप्नप्रभावात्सर्वलक्षणसम्पूर्णा पुत्री भविष्यति । इति निशम्य सा मुमुदे । ततः परिपूर्णसमये सुता प्रसूता । महीपेन तस्या**स्त्रैलोक्यसुन्दरी**ति नाम विदधे । क्रमेण प्रवर्धमाना तारुण्यं वयः प्राप्ता सती लावण्य-सौभाग्यनिकेतनं जाता । एकदा तां मनोहराङ्गीं सुतां दृष्ट्वा राजा हृदि वरचिन्तामकरोत् तदान्तःपुरीभिर्विज्ञप्तम्—राजन्नेषा बालिकाऽस्माकं जीविताधारः । एतद्विरहं सोढुं वयं न क्षमाः । अतः कारणादस्या विवाहचिन्ता नान्यत्र कर्तव्या । अस्यामेव पुर्यां मन्त्रि**सुबुद्धि**पुत्राय चैषा दातव्या । इति स्त्रीणां वचो निशम्य नृपो हृदि दध्यौ—नूनं विवाहादिकार्ये पुरन्ध्रीणामेव प्राधान्यम् इति विचिन्त्य भूपेन **सुबुद्धि**नामा सचिवः समाहूतः । बहुमानपूर्वकमिति भाषितः—भो मन्त्रिन् ! मया मत्सुता त्वत्सूनवे दत्ता, विवाहोत्सवः क्रियते । इत्युक्ते मन्त्रिणोक्तम्—स्वामिन्नयुक्तं किं वदसि ? त्वत्पुत्री कस्मैचिद् राजसूनवे घटते, न तु मम पुत्राय । यदुक्तम्—

**ययोरेव समं वित्तं, ययोरेव समं कुलम् ।**
**तयोर्मैत्री विवाहश्च, न तु पुष्टविपुष्टयोः ॥१॥**

इति मन्त्रिवचः श्रुत्वा राजा पुनरप्याह—इत्यर्थे मन्त्रिन् ! त्वया न किमपि वाच्यम् । एतत्कार्यमित्थमेव भविष्यति । संशयो न विधेयः । पार्षद्यैरप्युक्तम्—हे मन्त्रिन्नृपवाक्यं तथेति क्रियते । तदा मन्त्री नृपवचोऽनिष्टमप्यनुमेने । ततो मन्त्री गृहं गत्वा कृतावसक्थिक उपविष्टः । चित्ते चिन्तयितुं लग्नः—हा ! व्यग्रदुस्तटीपतितोऽस्मि, किं करोमि ? राज्ञः पुत्री

रूपेण सुराङ्गनासमास्ति । मत्पुत्रः स कुष्ठरोगाभिभूतः । तयोर्योगं जानन् कथं करोमि ? इति चिन्तातुरतया तस्य सर्वमपि भोजनादि विस्मृतम् । एवं चिन्तयतो बुद्धिरुत्पन्ना–मदीया कुलदेवी सुप्रभावाऽस्ति । तदाराधनं करोमि । तत्प्रसादात्सर्वं समीहितं भविता । इति ध्यात्वा मन्त्री विधिना कुलदेवतामाराधयत् । ततः सा प्रत्यक्षीभूय जजल्प–मन्त्रिन् ! किमर्थमहं ध्यातास्मि ? मन्त्र्यूचे–मातस्त्वं स्वयमेव सर्वं वेत्सि । पुनस्तथापि मम कथयतः शृणु-मत्पुत्रो दुष्टेन कुष्ठव्याधिना पराभूतोऽस्ति । तथा कुरु, यथा स नीरोगतां भजते । इत्युक्ते देवी प्राह–पुराकृतकर्मयोगाद् या व्याधि-वेदना जाता, सा मयाप्यपाकर्तुं न शक्यते । तवैषा प्रार्थना वृथा । इत्युक्ते पुनरपि मन्त्री विमृश्य बभाषे–यद्येवं न स्यात् तर्हि कमप्यन्यं पुरुषं तदाकारं निरामयं कुतोऽप्यानीय मम समर्पय, यथाहं नृपपुत्रीं तेनोद्वाह्य स्वपुत्राय ददामि । तस्य यथोचितं करिष्ये । इत्युक्ते देवी प्राह–हे मन्त्रिन् ! पुरीद्वारे तुरङ्गमरक्षकनरसमीपे शीतनिवारणार्थमग्निसेवातत्परो यः कश्चिद्बालको मया कुतोऽप्यानीय मुक्तो भवति, स भवता ग्राह्यः । पश्चाद् यथोचितं कर्तव्यम् । इत्याख्याय देवी तिरोदधे । तेन वाक्येन सचिवो हृष्टः सन् सर्वविवाहसामग्रीं कर्तुं लग्नः । तदनन्तरं मन्त्रिणा स्वतुरङ्गमरक्षकनरं प्रच्छन्नतया समाहूय तस्मै सर्ववृत्तान्तं निवेद्य सादरमावेदितम् । इदमूचे–यः कोऽपि बालकः कुतोऽपि भवदन्तिके समभ्येति, स त्वया शीघ्रं समानीय ममार्पणीयः । इत्युक्ते तेनाश्वरक्ष-केणाङ्गीकृतम् ॥

इतश्च देवता ज्ञानेन तस्या राजपुत्र्यास्तं श्रेष्ठिसुतं भाविनं वरं विज्ञाय**योज्जयिन्यां** महापुर्यां ययौ । तत्र गत्वा यथा स **मङ्गलकुम्भः** पुष्पाण्यानयन् शृणोति तथा व्योमस्थैवमुवाच–य एष बालकः पुष्पाण्या-

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दाय याति, स भाटकेन राजकन्यां परिणेष्यति । इति श्रुत्वा स बालो विस्मयमापन्नः किमेतदिति चिन्तयन् मनसि दध्यौ—गृहं गतस्तातस्य कथयिष्ये । यावता गृहे गतस्तावता विस्मृतम् । द्वितीयवासरेऽप्येवमेव श्रुतं, तदा मनसि व्यचिन्तयत्—अहो ! या वाणी कल्ये श्रुता, अद्यैव सा वाणी नभसि श्रूयमाणाऽस्ति । गतदिने पितुर्न कथितं, परं त्वद्य कथयिष्यामि । इति विचिन्तयन् यावद्गच्छन्नस्ति, तावता महावात्यया समुत्पाट्य स बाल**श्चम्पापूरी**समीपगे दूरतरारण्ये नीतः । तदा स भयभ्रान्तस्तृषाक्रान्तः श्रान्तो मानससरःसमानमेकं सरोवरं दृष्ट्वा तत्र वस्त्रपूतं जलं पीत्वा स्वस्थीभूय दर्भतृणै रज्जुं विधाय तया रज्ज्वा तदीयसेतुस्कन्धसमारूढं वटवृक्षमारुरोह । एतावता भानुरस्तमितः । ततो वटमारुह्य दिशो विलोकयति स्म । तदा उत्तराशायां समीपे एव ज्वलितानलं ददर्श । ततो वटात्समुत्तीर्य स भीतः शीतपीडितः सन् ज्वलनानुसारेण **चम्पापुरी**बहिः-प्रदशे ययौ । तत्रागत्याश्वपालकसमीपे वह्निसेवां कर्तुं लग्नः । तदा तैरश्वरक्षकैः पुरुषैर्हस्यमानैरित्युक्तम्—कोऽयं वराको बालकः ? कुतः समागतः ? । इति परस्परं वार्तां कुर्वत्सु तुरगारक्षकस्वामिना श्रुतम् । तदा तेन पूर्वसङ्केतं स्मरता बालः स्वसमीपे समानीतः निरुपद्रवः कृतः । ततश्च प्रातःसमयेऽतियत्नेन सचिवसमीपं प्रापितः । तदाऽमात्यो मुमुदे । स भव्यस्थाने स्थापितः, स्नानभोजनादिना सन्तोषितः । तदा **मङ्गलकुम्भेन** चिन्तितम्—ममायं सत्क्रियां कथं कुरुते ? तथा गोपयित्वा कथं रक्षितोऽहम् ? इति विमृश्य सचिवपार्श्वे पृष्टम्—मम वैदेशिकस्य किमर्थमयं सत्कारः ? तथा कैषा पुरी ? को वा देशः ? को वात्र भूपतिः ? इत्यादि सत्यं प्रोच्यताम्, मम विस्मयोऽस्ति । इति श्रुत्वा-ऽमात्योऽवादीत्—इयं **चम्पापुरी** । **अङ्गा**भिधो देशः । **सुरसुन्दरो**ऽत्र राजा ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

अस्याहं मान्यः **सुबुद्धि**नामा मन्त्री । मया त्वं महता कारणेन समानीतोऽसि । तदा तेन पृष्टम्—किं कारणं ? अथ **सुबुद्धिः** प्राह-भोः ! शृणु, राज्ञा **त्रैलोक्यसुन्दरी** पुत्री विवाहयितुं मत्पुत्राय दत्ता । पुनः स कुष्ठाभिभूतोऽस्ति । अतः कारणाद्धे भद्र ! त्वया सा परिणीय मत्सुताय दातव्या इत्यर्थे त्वमानीतः । तद्वचो निशम्य **मङ्गलः** प्रोवाच—भो मन्त्रिन्! एतावन्मात्रमकृत्यं किं करोषि ? सा रूपवती बाला क्व ? तव कुष्ठी सुतः क्व ? अहमेतावन्निष्ठुरं कर्म न करिष्यामि । मुग्धं जनं कूपे क्षिप्त्वा वरत्राकर्तनं कः कुरुते ? तदा मन्त्री प्राह—रे दुष्ट ! यद्येवं कर्म न करिष्यसि, तदाहं त्वां निजहस्तेन मारयिष्यामि । **सुबुद्धि**मन्त्रिणा खड्गमाकृष्य निस्त्रिंशं हक्कितोऽपि स कुलीनशिरोमणिरकृत्यं नानुमेने । तदा प्रधानपुरुषैर्मन्त्री तद्वधान्निषिद्धः, तस्य **मङ्गल**स्याप्युक्तम्—भो भद्र ! त्वं मन्त्रिवचो मन्यस्व । विचक्षणैः प्रस्तावसदृशं क्रियते । इति श्रुत्वा तेनापि मनसि चिन्तितम्—एवमेव नूनं भाव्यमस्ति । अन्यथा म**मोज्जयिनी**त इहागमनं कथं स्यात् ? । व्योमवाण्याऽपि पुरा इत्थमुक्तम् । तस्मादहमप्येवं करोमि । यद् भाव्यं तद् भवत्येव । इति विचिन्त्य **मङ्गलः** पुनरेवं स्माह सचिवं प्रति—इदं यदि निर्घृणं कर्म कृतमेव विलोक्यते, तदाऽहमपि भवत्पार्श्वे किमपि प्रार्थयामि । इत्युक्ते सचिवः सानुकूलो बभाषे—भो भद्र ! कथय । तेनोक्तम्—यद् वस्तु राजा मे प्रयच्छति तत्सर्वं मामकीनमेव, तत्क्षणमे**वोज्जयिन्याः** पथि कर्तव्यम् । एतद् वाक्यं मन्त्रिणाऽनुमेने । ततो निकटस्थे लग्ने हस्तिनमारोप्य वस्त्रालङ्कारविभूषितः स नृपसमीपे निन्ये । तदा राजा प्रमुदितः । **त्रैलोक्यसुन्दरी** तं मन्मथोपमं वरं दृष्ट्वा तद्वरप्राप्त्या स्वं कृतार्थं मेने । ततश्च लग्नसमये विप्रेण पुण्याहं पुण्याहमिति जल्पता वह्निपरितश्चतुर्वारं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दम्पती भ्रामितौ । चत्वारि मङ्गलानि प्रवर्तितानि । प्रथमे मङ्गले राजा वराय भूयांसि चारुवस्त्राणि प्रादात् । द्वितीये मङ्गले वस्त्राभरणान्यदात् । तृतीये मङ्गले मणिस्वर्णादि ददौ । चतुर्थे मङ्गले रथादिकं दत्तवान् । तयोर्दम्पत्योरित्थं विवाहोत्सवः सञ्जज्ञे । विवाहोत्सवे सञ्जाते यदा जामाता वधूहस्तं न मुञ्चति, तदा राज्ञोक्तं–वत्स ! तव किं यच्छामि ? इत्युक्ते तेन जात्यघोटकपञ्चकं ययाचे । तदा नरेन्द्रः हर्षभरनिर्भराङ्गतया तत्क्षणमेव याचितान् पञ्चाश्वान् तस्मै जामात्रे ददौ । ततस्तूर्यैर्वाद्यमानैः सुन्दरी-धवलोच्चारैर्बन्दिवृन्दरवैर्जायमानैः सवधूकः स **मङ्गलः** सचिवेन यदा स्वगृहे निन्ये, तदा निशायां मन्त्रिगृहजनैश्छन्नं छन्नमेवं जजल्पे–केनाप्युपायेन शीघ्रमेवायं निष्कास्यते । तथा सा **त्रैलोक्यसुन्दरी** चेष्टिताकारैर्भर्तारं चलचित्तं ज्ञात्वा तस्योपान्तं न मुमोच । ततः क्षणान्तरेण स देहचिन्तार्थमुत्थितः । तदनु सा राजसुता जलपात्रं गृहीत्वा पृष्ठत एव ययौ । तदा स पयसा पवित्रीभूय गृहमध्ये समेतः । परन्तु सचिन्तोऽस्ति । तस्मिन्नेवावसरे तया **त्रैलोक्यसुन्दर्या** रहःस्थितं स्वपतिं शून्यचित्तं दृष्ट्वा इत्थं बभाषे–हे प्राणेश ! किं भवतां क्षुधा बाधते ? । आमेति तेन भणितम् । सा दासीहस्तेन पितृगेहान्मोदकानानाय्य तस्मै ददौ । तेषु मोदकेषु भुक्तेषु पानीयं पिबता तेनेति प्रोक्तम्–अहो ! ईदृशेषु सिंहकेसर-मोदकेष्वास्वादितेषु **यद्युज्जयिन्या** नगर्या नीरं लभ्यते, तर्हि भव्या तृप्तिः स्यात्, न चान्यथा । तद्वाक्यं श्रुत्वा व्याकुलमानसा राजपुत्री दध्यौ–अहो ! अघटमानं किं जल्पति ? अय**मुज्जयिनी**जलमिष्टत्वं कथं जानाति ? अथवा त्वस्य मातृकुलं तत्र भविष्यति । तेन दृष्टपूर्वतया तत्स्वरूपं जानन् भविष्यति । ततश्च तया निजहस्तेन पञ्चसौगन्धिकं ताम्बूलं स्वभर्त्रे मुखपाटवकरणाय ददे । ततः क्षणान्तरेण मन्त्रिणा मानुषं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रेष्य प्रस्तावो ज्ञापितः । तदा तेन **मङ्गले**नोक्तम्—प्रिये ! पुनरप्यहं देहचिन्तार्थं गन्तुकामोऽस्मि, उदरार्तिरसदृशी विद्यते । त्वया जलपात्रं शीघ्रं नानेतव्यम् । क्षणमेकं प्रतीक्ष्य समागन्तव्यम् । इत्युदित्वा मन्त्रि-मन्दिरान्निर्ययौ । तदा तेन मन्त्रिसमीपे पृष्टम्—मामकीनं राजदत्तं तुरगादि-वस्तु क्वास्ति ? । तेनोक्तम्—तत्सर्व**मुज्जयिन्याः** पथि संस्थितमस्ति । ततस्तत्र गत्वा सारतरं वस्त्वेकस्मिन् रथे निक्षिप्य तस्मिन् रथे चतुरोऽश्वान् योजयित्वा पृष्ठतश्चैकं बद्ध्वा शेषकं कियद्वस्तु तत्रैव मुक्त्वा स प्रचलितः । अने**नोज्जयिनी**पथि स्थिता ग्रामाः पृष्टास्तदा मन्त्रि-भृत्यैर्नामग्राहं सर्वेऽपि मार्गग्रामाः कथिताः । ततः स **मङ्गलकुम्भो** रथाधिरूढस्तेन मार्गेण प्रचलन् स्तोकैरेव दिनैः स्वां नगरीं प्राप्तः ।

इतश्च तत्पितरौ सर्वत्रापि तं विलोक्य बहुधा विलप्य कियद्भिर्वा-सरैर्विगतशोकौ जातौ स्तः । एकदा **मङ्गल**स्य जननी गृहाभिमुखमायान्तं रथारूढं तं निरीक्ष्यानुपलक्ष्य च ससम्भ्रमं चैवमुवाच—"भो राजपुत्र ! त्वया गृहमध्ये रथः कथं प्रेर्यते ? पुरातनं मार्गं त्यक्त्वा किं नवीनं मार्गं करोषि ? इत्थं निवार्यमाणोऽपि यावत्स न तिष्ठति, तावता श्रेष्ठिन्या समाहूयाकुलचेतसा श्रेष्ठिने समाचख्ये । तदा श्रेष्ठ्यपि तन्निषेधार्थं गृहाद् यावन्निःसरति, तावत्स **मङ्गलकुम्भो** रथात् समुत्तीर्य पितुश्चरणौ ननाम । ततस्ताभ्यामुपलक्ष्य सहर्षं यथा भवति तथा स **मङ्गल**तनयो गाढतर-मालिङ्गितः । हर्षाश्रूणि मुञ्चन्तौ समग्रं कुशलादिगमनागमनवृत्तान्तं पप्रच्छतुः । तथा ऋद्धिप्राप्त्यादिका वार्ता पृष्टा । तदा तेन स्वकीय-समाचारः समग्रोऽपि पित्रोरग्रे प्रोक्तः । तदा पितृभ्यां चित्ते इति चिन्तितम्—अहो ! पुत्रस्य महद्भाग्यं सौभाग्यम् च । ततः स श्रेष्ठी स्वगेहं प्राकारगुप्तमकारयत् । तत्राश्वपञ्चकं सुगुप्तस्थाने तिष्ठति । श्रेष्ठिगृहे

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वर्धापनाद्युत्सवा जाताः । अथान्यदा स **मङ्गलकलशः** पितरं प्राह–तात ! ममाद्यापि कलाभ्यासः कर्तव्योऽस्ति । इत्युक्ते जनकेन स्वसदनान्तिके कलाचार्यसमीपे विद्याभ्यासाय स मुक्तः तत्र कलाभ्यासं कुरुते ॥

इतश्च तेन मन्त्रिणा रात्रौ **मङ्गल**वेषधारी वासवेश्मनि वधूपान्ते स्वसुतः प्रेषितः । तदा **त्रैलोक्यसुन्दरी** तं शय्याधिरूढं दृष्ट्वा हृदि दध्यौ—कोऽयं कुष्टाभिभूतो ममान्तिके समेतः ? । अथ स यावत्करस्पर्शं कर्तुमुद्यतो भवति, तावत्सा **सुन्दरी** शयनात्समुत्तीर्य झटित्येव गेहाद् बहिस्तत्र ययौ यत्र दासीवर्गः सुप्तोऽस्ति । तदा दासीभिरुक्तम्—स्वामिनि ! कथं ससम्भ्रमाऽसि ? । इत्युक्ते साऽवादीत्—स देवतारूपी मत्पतिः क्वापि गतः । ताः प्रोचुः–इदानीं स त्वत्पतिर्गृहमध्ये प्रविष्टः । तदा तया प्रोचे—स मत्पतिर्न समेतः । कोऽपि कुष्ठी समेतोऽस्ति । ततः सा दासीमध्ये सुप्ता । तां रात्रिं व्यतिक्रम्य **त्रैलोक्यसुन्दरी** प्रातः स्वपितृगृहं ययौ । ततः प्रभातसमये **सुबुद्धि**सचिवः कुबुद्धिप्रेरितो महीपतेः सकाशं गत्वा चिन्ताश्याममुखस्तस्थौ । तदा भूपतिना पृष्टम्—मन्त्रिन् ! किं हर्षस्थाने विषादः ? । मन्त्रिणोक्तम्—राजन् ! मम कर्मदोषेण हर्षस्थाने विषाद एव समजनिष्ट । राज्ञा पृष्टम्—किं जातम् ? । तदा स जगाद—यतः—

चिन्तयत्यन्यथा जीवो, हर्षपूरितमानसः ।
विधिस्त्वेष महावैरी, कुरुते कार्यमन्यथा ॥१॥

[अजितप्रभसूरिकृते शां० चरित्रे-१-२०२]

पुनरपि भूपो दुःखकारणं पप्रच्छ । तदा स सचिवो दीर्घं निःश्वस्य बभाषे—अहं दैवेन मुषितः । मम पुत्रो यादृशोऽभूत् तादृशो नरेन्द्रेणापि दृष्टः । स च साम्प्रतं त्वत्सुतासम्पर्केण कुष्ठी जातः । किं कथ्यते ? कस्याग्रे पूत्क्रियते ? । इत्युक्ते राजापि दुःखभाग् बभूव, इत्थं मनसि

Jain Education International For Personal & Private Use Only www.jainelibrary.org

चिन्तयति स्म -नूनं सा मम नन्दिनी निर्लक्षणास्ति । तदङ्गप्रभावेनैव मन्त्रितनयः कुष्टी जातः । जगति सर्वे जन्तवः स्वस्वकर्मफलभोक्तारः, परं त्वन्यो निमित्तमात्रं स्यात्–

सुखदुःखानां कर्ता, हर्ता न कोऽपि कस्यचित्पुंसः ।
इति चिन्तय सद्बुद्ध्या, पुराकृतं भुज्यते कर्म ॥१॥ [आर्या]

इति विमृश्य राज्ञोक्तम्–हे मन्त्रिन् ! अहमेव तव पुत्रायानर्थं कृतवान्। यद्यहं मत्पुत्रीविवाहं नाकरिष्यम् तर्हि त्वत्पुत्रः कुष्ठाभिभूतः कथमभविष्यत् ? इत्युक्तेऽमात्योऽब्रवीत्-स्वामिन् ! हितकार्यं कुर्वतां भवतां को दोषः ? मत्कर्मणामेव दोषोऽयम् । अथ मन्त्री समुत्थाय स्वस्थानमगात् । सा **त्रैलोक्यसुन्दरी** राज्ञः परिजनस्य च प्रियाप्यप्रिया जाता । न कोऽपि तामाऽऽललाप । न कोऽपि तां दृष्ट्याप्यालोकयति स्म। मातृगृहपृष्ठत एकत्र गुप्तगेहे साऽस्थात् । इति चिन्तयति-मया पूर्वं किं दुष्कर्म विदधे ? येन दुष्कर्मणा मम परिणीतपतिः क्वापि नंष्ट्वा गतः । अन्यच्च लोकमध्ये महान् कलङ्क उपस्थितः । अथाहं किं करोमि ? क्व गच्छामि ? कस्याग्रे कथयामि ? महति व्यसने पतिताऽस्मि। इति चिन्तयन्त्यास्तस्याश्चित्ते समुत्पन्नम्–नूनं मे परिणीतः पति**रुज्जयिन्यां** गतो भविष्यति। तेन तदा मोदकान् भक्षयित्वा इत्यालापितं–एते मोदकास्तर्हि भव्या यद्य**वन्ति**जलमुपरि स्यात् । इत्यभिज्ञानेन स मत्पतिस्तत्र संभाव्यते । केनाप्युपायेन यद्यहं तत्र गच्छामि तर्हि तं प्रकटीकृत्य सुखभागिनी भवामि। एवं चिन्तयन्ती स्थिताऽस्ति । अथान्येद्युः सा जननीं प्रति प्राह–हे मातः ! तथा कुरु, यथा मत्पिता वारमेकं मम वाक्यं शृणोति । इत्युक्तेऽपि तां मन्दादरां दृष्ट्वा अन्यदा सा **सुन्दरी सिंह**नामकं सामन्तं प्रति स्वमर्थं विज्ञापयामास । तदा तेन

सामन्तेन साद्यन्तं तं समाचारं श्रुत्वा हृदये विचार्य तस्या एवमुक्तम्– वत्से ! अधृतिर्न विधेया । प्रस्तावे नृपं विज्ञाप्य ते समीहितं करिष्ये । इति वचसा नृपाङ्गजा तुष्टा । तेन प्रस्तावं लब्ध्वा भव्ययुक्त्या राजानं विज्ञाप्येत्युक्तम्–हे नृपते ! भवन्नन्दिनी वराकिका बालिका महति कष्टे पतिताऽस्ति । अस्याः सन्मानदानं दूरे तिष्ठतु । वाक्यश्रवणमात्रेण प्रसादोऽद्य विधीयताम् । पार्थिवोऽप्यश्रुपूर्णाक्षः **सिंह**सामन्तं प्रत्युवाच–भो सामन्त ! अनया मत्सुतया पूर्वभवे किञ्चिदभ्याख्यानादि दुष्कृतं कृतं, तत्प्रभावादियं सकलङ्का जाता, अस्माकमप्यनिष्टाऽभूत् । पुनस्तथाप्यसौ यत्किञ्चित्कथायितुमिच्छति, तन्ममाग्रे कथयतु । इत्युक्ते **त्रैलोक्यसुन्दरीं** प्रति **सिंह**सामन्तेनोक्तम्–वत्से ! स्वामिनोऽग्रे स्वचिन्तितं वचनं वद । ततः सा **त्रैलोक्यसुन्दरी** तत्र नृपसमीपमागत्य वचनमिति प्रोवाच–तात ! मम कुमारोचितं वेषं देहि । इति श्रुत्वा राजा प्राह–भो सामन्त ! वराकीयं किमसंबद्धं वचो वक्ति ? । तदा स सामन्तोऽवदत्–राजन्ननया युक्त-मुक्तम् । पुराप्ययं क्रमोऽस्ति । यतो राजसुता गुरुकार्यविशेषेण पुंवेषं दधते । इत्यर्थे न किमप्ययुक्तम् । संशयो न कार्यः पुंवेषो दीयताम् । अथ भूपः **सिंह**सामन्तोक्तमिति वचो युक्तियुक्तं मत्वा तस्यै पुंवेषं ददौ । तथा च तद्रक्षार्थं सैन्यान्वितं **सिंहं** चादिदेश । पुनः **सुन्दरी** प्राह–यदि तातादेशो भवेत् तर्हि महता कारणे**नोज्जयिनीं** यामि । समीहिते जाते तत्कारणं कथयिष्ये । इत्युक्ते राजा प्राह-पुत्रि ! यथा स्ववंशस्य दूषणं न स्यात् तथा कर्तव्यम् । इत्युदित्वा महीभुजा सा विसृष्टा । ततश्च **सिंह**सामन्तादिभूरिसैन्यसमन्विता सा **सुन्दरी** पुरुषवेषधारिणी पितुरादेशं प्राप्याखण्डितप्रयाणै**रुज्जयिनीं** ययौ । तदाऽ**वन्ती**शो राजा **वैरिसिंहः** प्रजामुखादेवं शुश्राव–यत**श्चम्पा**पुर्या नृपाङ्गजः समागच्छन्नस्ति । तदा

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परस्परप्रीत्या तस्या नृवेषधारिण्या अभिमुखयानादिसन्मानादिना स्वागत-प्रश्नपूर्वकं पुरीं प्रवेश्य स्वसदने राज्ञा समानीता। आगमनकार्यं पृष्टं। तदा तयोक्तम्—आश्चर्यपूरितां भुवि ख्यातां कुतूहलादिमां नगरीं विलोकयितुं समेतोऽस्मि। ततो नरेन्द्रेण बभाषे—भो राजपुत्र ! त्वया मम गेह एव स्थातव्यम्। **सुरसुन्दर**राजस्य मम गेहस्य च नान्तरं चिन्त्यम्। इत्युक्ते सा नृपसुता सबलवाहना राजढौकितगेहे तस्थौ। तत्र स्थित्वा सा स्वपदातीन् स्वादीष्टजलाश्रयनिरीक्षणाय समादिदेश। तदा तैर्विलोक्य प्रोक्तम्—पूर्वस्यां दिशि तन्नीरस्थानमस्ति। इत्युदिते सा **सुन्दरी** नृपाज्ञया तन्मार्गविहितावासेऽवस्त। अन्यदा सा तत्रस्था नीरपानार्थं गच्छतोऽश्वान्निरीक्ष्य हृदि दध्यौ—नूनमेते मम तातस्य तुरङ्गमाः इति निश्चित्य तेषामनुपदं स्वभृत्याः प्रस्थापिताः। तेषामित्युक्तम्—यत्रेमेऽश्वा यान्ति, यत्र तिष्ठन्ति, तत्र भवद्भिर्गत्वा तदीयधामनामादि ज्ञात्वा समागन्तव्यम्। इत्युक्ते तैर्भृत्यैः सर्वं स्थानाभिधानादि विज्ञाय प्रोक्तम्। तथा **मङ्गल-कलशं** कलाभ्यासपरं ज्ञात्वा **त्रैलोक्यसुन्दरी सिंह**सामन्तं प्रत्युवाच-'केनाप्युपायेन तुरङ्गमा आत्मीया गृह्यन्ते। इत्युक्ते **सिंहे**नोक्तम्-आसन्नलेखशालायाः सच्छात्रोऽध्यापको भोजनाय निमन्त्र्यताम्। तथेत्युक्ते भोजनादिसामग्रीं विधाय स निमन्त्रितः। प्रस्तावे समेतः। तत्सार्थे स्वपतिं दृष्ट्वा सा मनसि मुमुदे। तदा प्रमोदादात्मीयमासनं स्थालं (च) **मङ्गलाय** दत्त्वा विशेषगौरवमकरोत्। सादरं भोजनं दत्वा सर्वेभ्यो वस्त्राण्यदात्। **मङ्गलाय** स्वाङ्गलग्नं रम्यं वासोयुग्मं ददौ। ततः कलाचार्यमित्याह एतेषां मध्याद् यो जानाति, स च्छात्रो ममाग्रे कथां कथयतु। इति निर्दिष्टे सर्वैरपि च्छात्रै**र्मङ्गलकलश**स्य विशेषभक्तिं दृष्ट्वा कोपादिति जल्पितम्—अस्माकं मध्ये कथां **मङ्गल** एव कथयिष्यति।

सर्वच्छात्रानुज्ञया पण्डितेन **मङ्गलकलश**स्यैवादेशो दत्तः । तदा स पण्डितगिरा वक्तुमेवं प्रचक्रमे-भोः ! कथानकं कल्पितं वाऽनुभूतं कथयामि ? । इत्युक्ते कुमारवेषधारिण्या नृपपुत्र्या बभाषे-कल्पितेन पर्याप्तमनुभूतमेव त्वरितं ब्रूहि । इति भाषिते **मङ्गल**श्चिन्तयामास-सैषा **त्रैलोक्यसुन्दरी** भवति, या मया **चम्पापुर्यां** भाटकेन कन्या परिणीता-ऽभूत् । केनापि हेतुना नृवेषं धृत्वा समेताऽस्ति । इति विमृश्य निजं स्वरूपं कथयितुं लग्नः सादिमध्यावसानं निजं चरित्रं तावत्कथितं यावत्**सुबुद्धि**मन्त्रिणा स्वगृहान्निर्वासितः । अत्रान्तरे राजसुता कृत्रिमं कोपं विधाय प्राह—भो ! भो ! अमुं मिथ्याभाषिणं गृह्णीत गृह्णीत । इत्युक्ते तस्याः पत्तयस्तद्ग्रहणार्थं समुद्यतास्ते च तयैव वारिताः । परन्तु स च गृहमध्ये समानीतः । अथैनमासन उपवेश्य नृपात्मजा **सिंह**सामन्तं प्रत्यूचे-अहं येन परिणीताऽस्मि, स चायं मम प्रियो ज्ञेयः । अथात्र किं कर्तुं युज्यते ? । इत्युक्ते स प्रोक्तवान्-अयं चेत् तव भर्ता स्यात्तर्हि त्वयाऽऽश्रयणीयः इत्युक्ते सा प्राह-भोः सामन्त ! चेत् तव चित्ते संशयो भवति, तर्ह्येतद्गृहे गत्वा स्थाल्यादीन्यालोकय । इति व्यक्ते प्रोक्ते सामन्तः संशयं त्यक्त्वा श्रेष्ठिनं समाहूय वद्ध्वाः स्वरूपं कथयित्वा राजपुत्रीसमीपे समेतः । ततस्तस्यादेशेन सा स्त्रीवेषमुद्भूतं कृत्वा तस्य **मङ्गल**स्य वल्लभा बभूव । ततस्तुद्युग्मं श्रेष्ठिनः सदनं जगाम । पार्थिवोऽपि श्रेष्ठिनं समाहूय तं वृत्तान्तं पृष्ट्वा श्रुत्वा च मनसि विस्मयं दधौ । ततोऽनन्तरं स पुरुषवेषं लात्वा **चम्पा** ययौ । अमुना **सिंहे**न सर्ववृत्तान्ते कथिते राजा हृष्टो जजल्प-अहो ! मत्पुत्र्याः कलाकौशलं विलोक्यताम् । अहो ! अमात्यस्य पापबुद्धिर्विलोक्यताम् । येन मन्त्रिणा मत्पुत्री निर्दोषापि सदोषा कृता । इति चित्ते विचिन्त्य पुनरपि राजा **सिंह**सामन्त**मुज्ञयिन्यां**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रेष्य निजपुत्रीं जामातृसहितां समानाय्य यथाविधि सच्चक्रे । ततो महीभुजाऽमात्यो विडम्बितः । तदीयं सर्वस्वं गृहीतम् । वध्यस्थाने वधार्थं राज्ञा स प्रगुणीकृतः । तलारक्षै रासभे स आरोप्य त्रिकचतुष्कचत्वरादिषु परिभ्रामितः । ततो **मङ्गलेन** गाढाभ्यर्थनया नृपाग्रहात्सचिवो मोचितः । तदा राज्ञोक्तम्—रे पापचेष्टित ! त्वं मया जामातुरपरोधेन मुक्तोऽसि । अन्यथा न मुञ्चामि । अथ मत्पुरान्निःसर । इत्युक्त्वा स्वपुरान्निष्कासितः । तदनन्तरं तेन नृपेण पुत्रविवर्जितेन स जामातैव पुत्रस्थाने स्थापितः । तन्मातापितरौ तत्रैव भूपतिना समानायितौ । अन्येद्युः स राजा मन्त्रि-सामन्ताद्यनुमतेन महोत्सवपुरःसरं स्वराज्ये तं **मङ्गलकलशं** स्थापयामास । ततश्च **यशोभद्र**सूरीणां चरणान्ते **सुरसुन्दर**भूपः संयममुपाददे ।

राज्ये कोऽपि वणिग्जातिः संस्थापितोऽस्तीतीर्ष्यया प्रत्यन्त-पार्थिवास्तस्य राज्यं गृहीतुमुपतस्थिरे । तदा तेन श्रीमत्पुण्यप्रभावेण सङ्ग्रामभूमौ ते सर्वेऽपि लीलयैव जिताः । ततस्तस्य सर्वेऽपि शत्रवो मित्रत्वं प्राप्ताः । अथ सुखेन स राज्यं पालयति । तत**स्त्रैलोक्यसुन्दर्याः** पुत्रोऽभूत् । **यशोशेखर**स्तन्नाम । ततः स **मङ्गलकुम्भ**राजा निजदेशे जिनचैत्यजिनभुवनजिनार्चाऽमारियात्रादिधर्मकर्म व्यधापयत् । अन्य-दोद्यानदेशे समायातं **श्रीजयसिंहसूरिं** श्रुत्वा स भूपः सकलत्रः सद्वासनया वन्दनाय ययौ । तत्र गत्वा गुरुं त्रिःप्रदक्षिणीकृत्य भक्तिपूर्वं नत्वेति पप्रच्छभगवन् ! केन कर्मणा मया विवाहकाले विडम्बना प्राप्ता ? देव्या (च) दूषणं कथं प्राप्तम् ? । इत्युक्ते सूरिरूचे—अत्रैव **भरतक्षेत्रे** **क्षितिप्रतिष्ठं** नाम पत्तनमस्ति । तत्र **सोमचन्द्रा**भिधानः कुलपुत्रकोऽभूत् । तद्भार्या **श्रीदेवी** । मिथस्तौ प्रीतिशालिनौ स्तः । यः **सोमचन्द्रः** स प्रकृत्या सुगुणः सरलाशयः समस्तलोकानां मान्यः । तद्भार्यापि तादृशी ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतस्तत्र नगरे **जिनदेवा**भिधः श्रावकोऽभूत्। तस्य **सोमचन्द्रेण** सह मैत्री निबिडा बभूव। एकदा सत्यपि धने **जिनदेवो** धनाकाङ्क्षया देशान्तरं गन्तुकामः **सोमचन्द्रं** मित्रं प्रति बभाषे–'भो मित्र ! देशान्तरेऽहं धनहेतवे गमिष्यामि। परन्तु त्वया मामकं धनं सप्तक्षेत्र्यां यथाविधि वाप्यम्। तवापि पुण्यषष्ठांशो भवतु। इत्युक्त्वा दीनारसहस्रदशकं तस्यार्पयित्वा स देशान्तरे गतः। तस्मिन् प्रयाते सति **सोमचन्द्रेण** शुद्धचेतसा तदीयं धनं यथोचितस्थानेषु व्ययितम्। तने **सोमचन्द्रेण** कियद्धनं स्वकीयमपि व्ययितम्। महत्पुण्यमुपार्जितम्। तद्भार्यापि तद्धनानुमोदनया पुण्यं भेजे। तथा तस्मिन्नेव पुरे तस्याः **श्रीदेव्याः** सखी **भद्रा**भिधानाऽभवत्। सा **नन्द**श्रेष्ठिपुत्री **देवदत्त**स्य गेहिनी। एवं सति कियता कालेन स **देवदत्तः** श्रेष्ठी कर्मदोषात् कुष्ठी जातः। ततस्तत्प्रिया **भद्रा** विषीदति स्म। एकदा तया **श्रीदेव्याः** सख्याः पुरत इत्युक्तम्—केनापि कर्मणा मत्पतिः कुष्ठी जज्ञे। तदा तया हास्येनोक्तम्- हे सखि ! त्वदङ्गसङ्गत एव तव प्रियः कुष्ठी जातः। नूनं त्वं महापापकर्त्री मम दृष्टिमार्गाद् दूरतो गच्छ। मुखं मा दर्शय। इत्युक्ते सा मनसि दूना, क्षणं श्याममुखी तस्थौ। पुनरपि तया क्षणेनैवं प्रोचे—सखि त्वया खेदो न कर्तव्यः। अहं त्वया सह हास्यं करोमि। ततः सा प्रमुदिता। अथ **सोमचन्द्रः** स्वपत्न्या सार्धं साधुसंसर्गतः श्रीमद्धर्मं प्राप्य पालयामास। तदनन्तरं समाधिना मृत्वा तौ दम्पती सौधर्मे पञ्चपल्यायुषौ त्रिदशौ जातौ। ततः **सोमचन्द्रा**त्मा **सौधर्मा**च्च्युत्वा हे भूपाल ! भवान् जातः। तथा **श्रीदेव्या** जीवस्ततश्च्युत्वा **त्रैलोक्यसुन्दरी** जज्ञे। भो राजन् ! यद् भवता **सोमचन्द्र**भवे परद्रव्येण पुण्यमुपार्जितं तत्प्रभावाद् भाटकेन राजसुता परिणीता। तथा च तया **त्रैलोक्यसुन्दर्या** पुरा **श्रीदेवी**भवे हास्येनैव वयस्यायै यः कलङ्को

दत्तः, तदनुसारत एतयापि दूषणं प्राप्तम् । इत्युक्ते तौ राजा राज्ञी पूर्ववृत्तान्तं श्रुत्वा स्वसूनवे राज्यं दत्त्वा वैराग्येण गुरोः समीपे प्रव्रज्यां जगृहतुः । ततः स राजर्षिः क्रमेण सर्वसिद्धान्तपारगः सन् गुरुणा श्रीसूरिपदे स्थापितः । **त्रैलोक्यसुन्दरी** साध्वी प्रवर्तिनीपदे स्थापिता । ततस्तौ शुभध्यानेन विपद्य **ब्रह्मलोकं** प्राप्तौ । ततश्च्युत्वा मनुजत्वं प्राप्य तृतीये भवे तौ द्वावपि मोक्षपदं प्रापतुः ॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ९. श्रीलक्ष्मीसूरिविरचितम्
# मङ्गलकलशकथानकम् ।।

जैनधर्मं समाराध्य, भूत्वा विभवभाजनम् ।
प्राप्ताः सिद्धिसुखं ये ते, श्लाघ्या **मङ्गलकुम्भ**वत् ।।१।।

**उज्जयिन्यां** पुर्यां **वैरसिंहो** भूपः । तत्र धर्मार्थी **धनदत्त**श्रेष्ठ्यभूत । तस्य निरपत्या **सत्याभामा** भार्या विद्यते । साऽन्यदा पुत्रचिन्तामलानमुखं श्रेष्ठिनं दृष्ट्वा पप्रच्छ—हे नाथ ! दुःखस्य किं कारणम् ? । श्रेष्ठिना याथातथ्ये कथिते सा स्माह—किमनया चिन्तया ? सुखैषिणेहामुत्र सुखप्रदो धर्म एव सेवनीयः । इति प्रियोदितं साधु मत्वा हृष्टः श्रेष्ठी पुष्पादिना देव पूजाद्यनेकधर्मकर्म चकार । अथ धर्मप्रभावेण तुष्टा शासनदेवता तस्मा ईप्सितवरं ददौ । सा श्रेष्ठिन्यन्यदा गर्भं दधौ । पूर्णे मासे जातस्य पुत्रस्य स्वप्नानुसारेण **मङ्गलकलश** इत्याख्यां तत्पिता ददौ । कलाभ्यासपरः स पुष्पानयनहेतवे आरामे व्रजन्तं स्वपितरं निवार्य प्रतिवासरं पुष्पाणि चानीय स्वयं तस्मै ददौ, जिनपूजनं स्वयं करोति कारयति च । धर्माभ्यासं कुर्वतस्तस्यात्रान्तरे यज्जातं तन्निशम्यताम् ।

**चम्पापुरे महाबाहुः** पार्थिवोऽभूत् । तस्य राज्ञी **गुणावली** । तयोः पुत्री लावण्यरसमञ्जूषा सुरूपा प्राप्तयौवना **त्रैलोक्यसुन्दरी** बभूव । तामनवद्याङ्गीं विलोक्य धरापतिरिति दध्यौ—मम वत्सायाः कोऽनुरूपो रमणो भवति ? ततो राज्ञा निजं **सुबुद्धि**सचिवं समाहूयाऽभाणि—मया त्वत्सुतायात्मजा दत्ताऽतः परं त्वया न वाच्यम् । अथ गृहं गत्वा सचिवोऽचिन्तयत्—रतितुल्या राजपुत्री, मम सुतस्तु कुष्ठी, तदेतयोर्योगं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

जानन्नहं कथं करोमि ? । इति चिन्तयन् स्वधियैव लब्धोपायो धीसखो गोत्रदेवीं समाराधयामास । साऽपि प्रत्यक्षीभूयोवाच—भो मन्त्रिन् ! तवाङ्गजस्य कर्मोद्भूतकुष्ठरोगक्षयोऽशक्यः, अवश्यमेव हि भोग्यं कर्म भुज्यते, तथापि भवत्कार्यसिद्ध्यर्थं पुरीद्वारेऽश्वरक्षकनरान्तिके यः शीतोर्तोऽग्निसेवनपरः कुतोऽप्यानीय त्वद्भक्तितुष्टया मयाऽऽनेष्यते, स बालो मन्त्रिन् ! त्वया ग्राह्यः, इत्युक्त्वा देवी तिरोदधे । सचिवः सर्वविवाहसामग्रीं प्रगुणीचकार । अश्वपालनरमाकार्य समादिदेश—यः कश्चिद् बालो भवदन्तिकेऽभ्येति स प्रच्छन्नं ममान्तिके समानेयः । देवताऽपि **विशाला**यां गत्वा पुष्पाण्यानीयारामान्निजगृहे गच्छतस्तस्य **मङ्गलकलश**स्यान्तरिक्षस्थितोवाचैवं-अयं बालकोऽन्यकन्यां भाटकेन परिणेष्यति । तच्छ्रुत्वा विस्मितः स गृहं ययौ । द्वितीयदिवसेऽप्येवं श्रुत्वा पुनरचिन्तयत्—अद्याहं सदनं प्राप्तो व्योमवाणीं पितुः कथयिष्यामि । यावदिदं चिन्तयति तावच्**चम्पापुरी**निकटाटव्यां देव्या स मुक्तः । तत्र भ्रमन्नश्वपालान्तिके आगतः । तैरश्वपालैर्गोपयित्वाऽमात्यस्यार्पितः । स तं देवकुमाराभं दृष्ट्वा हृष्टो विजने स्थापयामास । एकदा तेन सचिवः पृष्टः—तात ! कुतो मम वैदेशिकस्य गौरवं विधीयते ? कथं च विजने रक्षितोऽहम् ? । सोऽपि तस्मै कपटेन **चम्पा**पुराधिपस्य **त्रैलोक्यसुन्दरीं** पुत्रीं त्वं परिणीय कुष्ठेन पीडिताय मत्पुत्राय तां नृपाङ्गजां दद्याः, तदर्थं त्वमत्रानीतः इति स्वाभिप्रायं न्यवेदयत् । तच्छ्रुत्वा **मङ्गल** उवाच—कुलकलङ्ककृदकृत्यमहं कथं करोमि ? मुग्धजनं कूपे क्षिप्त्वा वरत्राकर्तनोपमं कर्मेदं न करिष्यामि । मन्त्र्यूचे-हे दुर्मते ! कर्मेदं चेन्न करिष्यसि तदा त्वां निजहस्तेन मारयिष्यामि । ततः स बालो मतिचक्षुषा विलोक्य तं प्राह—यदि मया त्वत्समीहितं निर्वर्तनीयमेव तदा राजा करमोचने

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यद्वस्तु मह्यं ददाति तन्ममैव दातव्यम् । एवमस्त्विति तद्वाक्यं मन्त्र्यपि मेने । अथ संप्राप्ते शुभे लग्ने महताऽऽडम्बरेण **मङ्गलेन** परिणीता सा । हस्तमोचनसमये जात्यघोटकपञ्चकादिकं तस्मै राजा प्रददौ । ततो मन्त्रिणा वध्वा समं स **मङ्गलः** स्वगृहं निन्ये । क्षणान्तरे स **मङ्गलो** देहचिन्तामिषेण वासमन्दिरान्निर्ययौ । साऽपि चलचित्तं निजपतिं ज्ञात्वा पयःपात्रं गृहीत्वा तदनु प्राचलत् । देहचिन्तान्ते विचित्तं स्वपतिं वीक्ष्य प्रेयसी प्राह—हे कान्त ! त्वां क्षुधा बाधते किमु ? । तेन ओमिति भणिते सा दासीहस्तेन मोदकान् स्वगृहादानाय्य तस्मै ददौ । भक्षयता तेनास्याः स्वस्थानज्ञापनायेत्युक्तं—**विशाला**वारिणा ऋते एते मोदका न रम्यतराः । तदाकर्ण्य नृपात्मजा विस्मिताऽचिन्तयत्—अहो ! कथमघटमानं वाक्यमेष प्रजल्पति ? (अथवाऽस्य मातुलगृहं तत्र स्यात्) । इति विचिन्त्य सुरभिताम्बूलं सा तस्य ददौ । पुनर्देहचिन्तामिषेण मन्दिरादेष विनिर्गत्य तुरगादिकं लात्वा क्रमा**दवन्तिं** ययौ । पितरौ समायातं सुतमालोक्य गतशोकौ बभूवतुः । तेन पितृभ्यां स्वस्वरूपं निवेदितम् ।

इतश्च मन्त्रिणा रात्रौ **मङ्गल**वेषभृतं वधूपान्ते प्रेषितं सुतं । शय्यारूढं कुष्ठिनं करस्पर्शं कुर्वन्तं दृष्ट्वा सहसा वासवेश्मनो बहिर्निर्गत्य दासीमध्ये निषण्णा विषण्णा सा निशामगमयत् । प्रातः सचिवो नृपतिं व्यजिज्ञपत्—प्रभो ! मम सुतोऽधुना त्वत्सुतास्पर्शतः कुष्ठरोगार्तो दृश्यते, किं क्रियते ? । तदाकर्ण्य भूपस्तं स्माह—विचित्रा कर्मणां गतिः, यतः-

चिन्तयत्यन्यथा जीवो, हर्षपूरितमानसः ।
विधिस्त्वेष महावैरी, कुरुते कार्यमन्यथा ॥१॥

[अजितप्रभसूरिकृते शा० चरित्रे-१-२०२]

अत्र मम पुत्र्या दोषः, न तव पुत्रस्य, इत्याश्वासितः सचिवः स्वगृहं

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ययौ । राज्ञा दृक्पथान्निवारिता साऽन्येद्युर्विगलितमन्योः पितुरन्तिकं गत्वोवाच—तात ! मम पुंवेषमर्पय, **विशालां** गतस्य तस्य मिलित्वा कलङ्कमपनयामि । राज्ञाऽनुज्ञाता सैन्यैर्वृता सा ता**मुज्जयिनीं** प्राप । मालवाधिप आयातं भूपनन्दनं मत्वा वासगृहदानाद्यैः सच्चकार । अन्यदैषा सदनाग्रतः सरस्तीरे गच्छतः पितृनामाङ्कितानश्वान् ददर्श । तेषामनुपदं स्वभृत्यान् प्रेष्य भर्तुर्गृहाभिधानादि सा विवेद । ज्ञानाभ्यासपरं तं ज्ञात्वाऽसौ सच्छात्रमुपाध्यायं भोजनाय न्यमन्त्रयत् । भोजनार्थं तत्रायाते पाठके सा छात्रमध्ये स्वभर्तारं ददर्श । तान् वसनासनाद्यैः संमान्य सा कलाचार्यमुवाच—एतन्मध्यात् त्वदाज्ञया यो जानाति स छात्रो मम कथानकमाख्यातु । पाठकगिरा **मङ्गलकुम्भ**स्तां पुंवेषधारिणीं निजप्रियां मत्वा **सिंहा**दिकानां शृण्वतां स्वमुद्वाहादिकं प्रागुक्तं जगौ । तच्छ्रुत्वा नृपात्मजा **सिंह**सामन्तमवोचत्—अयमेव मम प्रियः, अस्यान्वेषणार्थमहं पुंवेषं कृत्वाऽत्राऽऽगताऽस्मि । **सिंहो**ऽब्रवीत्—अयं चेत् तव भर्ता तदाऽपशङ्कितं सेव्यः । ततो राजाज्ञया **त्रैलोक्यसुन्दर्या** समं स **मङ्गलो** विललास । एकदा **सुन्दर्या** प्रेरितः स **मङ्गलोऽवन्ती**शमनुज्ञाप्य **चम्पा**-मयात् । राजाऽपि स्वदुहितुर्मुखाद्वृत्तान्तं श्रुत्वा हृष्टोऽभाषिष्ट—वत्से ! तव कलङ्को दूरीभूतः । अथ महीभुजा दुष्टकर्मकारकं तममात्यं मार्यमाणं **मङ्गलो** मोचयामास । अपुत्रः स भूपस्तं **मङ्गलं** राज्ये स्थापयित्वा **यशोभद्रसूरी**णां चरणान्तिके परिव्रज्यामुपाददे । राज्यं पालयतस्तस्य पत्न्यां **जयशेखर**नामा सुतोऽभूत् ।

अन्यदोद्यानमायातं **जयसिंहा**ख्यगुरुं सप्रियो भूपो भावेन प्रणम्य तद्देशनां श्रुत्वा पप्रच्छ—भगवन् ! केन कर्मणा मया विडम्बना प्राप्ता ? देव्या च दूषणं प्राप्तम् ? । सूरिः स्पष्टं न्यवेदयत्—पुरा **क्षितिप्रतिष्ठपुरे सोमचन्द्राह्वः**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कुलपुत्रकोऽभूत् ! तस्य भार्या **श्रीदेवी** । तस्य सखा **जिनदेवा**भिधः श्रावकोऽभूत् । अन्यदा स **जिनदेवो** धनाकाङ्क्षी देशान्तरं गन्तुकामो निजमित्र**सोमचन्द्र**स्य स्वधनं सप्तसु क्षेत्रेषु वपनायार्पयत् । तस्मिन् गते **सोमचन्द्र**स्तद्द्रव्यं यथास्थानेव्ययति स्म । तत्रैव पुरे **श्रीदेव्याः** सखी **देवदत्त**स्य गेहिनी **भद्रा**भिधाऽभवत् । **भद्रा**याः पतिः केनचित्कर्मणा कुष्ठी जज्ञे । अन्येद्युस्तया सख्याः पुरस्तत्स्वरूपं निवेदितम् । हास्यपरया **श्रीदेव्या** तस्याः संमुखं निगदितं—हले ! त्वत्सङ्गेन त्वत्पतिः कुष्ठी जज्ञे । तदाकर्ण्य **भद्रा** हृदि दोदूयते स्म । क्षणादूर्ध्वं वयस्ये ! मा कृथाः खेदं, मया हास्येन कथितं इति प्रोच्य साऽऽह्लादिता । साधुसंसर्गतः श्राद्धधर्मं प्राप्य क्रमात्समाधिना मृत्वा युवां दम्पती **सौधर्मे** समजायेतां, ततश्च्युत्वा **सोमचन्द्र**जीवो भूपते ! त्वमभूः, **श्रीदेव्याश्च** जीव**स्त्रैलोक्यसुन्दरी** जज्ञे । भवता परद्रव्येण पुण्यमुपार्जितं तेन भाटकेनैव नृपात्मजा परिणीता । पुराऽनया हास्येनापि वयस्यायै यद् दत्तं तदा तस्या इह भवे तत्कलङ्कमभूत् । ईदृग्मुनिवचः श्रुत्वा विरक्तौ तौ राज्यं स्वसूनवे दत्वा गुरोः पार्श्वे प्रव्रज्यां जग्रहतुः । निरतिचारं संयमं प्रपाल्यान्ते तावुभौ विपद्य **ब्रह्म**लोकमुपेयतुः । क्रमेणाव्ययमजरमभयं समस्तात्म-संपत्त्याविर्भावसुखं मोक्षपदं प्रापतुः ।

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# १०. अज्ञातकर्तृकम्
## श्रीमङ्गलकलशकथानकम् ॥

**उज्जयिन्यां** महापूर्यां, **वैरिसिंहो** नरेश्वरः ।
आसीद् वैरिव्रजवधूव्रातवैधव्यपण्डितः ॥१॥
तत्रैव **धनदत्तो**ऽभूत्, श्रेष्ठीश्रेष्ठो विशिष्टधीः ।
**सत्यभामा** प्रिया तस्य, शस्याचारा महासती ॥२॥
अन्यदा स निशाशेषे, सुखसुप्तो व्यचिन्तयत् ।
सुतेन शून्या मल्लक्ष्मीः, सर्वं शून्या र....म् ॥३॥
देवहीनं देवकुलं, स्वामिहीनं यथा बलम् ।
मोक्तिकं तेजसा हीनं, पुत्रहीनं तथा कुलम् ॥४॥
एवं चिन्तापरो यावत्, तावदूचे प्रिया प्रियम् ।
परिम्लानमु[खोऽ]त्यन्तं तथा नाथ ! निरीक्षसे ॥५॥
यथा फालच्युतो द्वीपी, भग्नदन्तो यथा करी ।
गतमन्त्रो यथा योगी, नियोगीव पदच्युतः ॥६॥
यदि गोप्यं नहि स्वामिन् !, कारणं मे तदा वद ।
श्रेष्ठ्यूचे चेद् हृदो गोप्यं, न गोप्यं मे तथाऽपि ते ॥७॥
पत्रहीना यथा वल्ली, चन्द्रहीना च शर्वरी ।
विषादाय विदग्धानां, तथा त्वं मे सुतोज्झिता ॥८॥
प्रिया प्राह प्रिय ! प्राप्तं[१], विषादेन विषीद मा ।
समीहितफलाऽऽवाप्तौ, कुरु धर्मे मतिं सदा ॥९॥

---

१. 'पर्याप्तं' इत्यर्थः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

दवदग्धा यथा वृक्षा, घर्मदग्धा यथाऽङ्कुराः ।
नीरादेव प्ररोहन्ति, तथा धर्मान्मनोरथाः ॥१०॥

तच्छ्रुत्वा **धनदत्तो**ऽपि, धर्मकर्मोद्यतः सदा ।
निनाय कालं सौख्येन, सप्तक्षेत्र्यां धनं वपन् ॥११॥

तेन धर्मप्रभावेन, कान्ता सुतमजीजनत् ।
कुम्भेन सूचितं स्वप्ने, रत्नं रत्नखनी यथा ॥१२॥

ताभ्यां स्वप्नानुसारेण, महोत्सव-पुरस्सरम् ।
तस्य '**मङ्गलकलश**', इत्याख्या विदधे मुदा ॥१३॥

वर्धमानः कुमारोऽथ समं पितृमनोरथैः ।
अष्टसंवत्सरकलः सोऽष्टमीन्दुरिवाभवत् ॥१४॥[2]

महाजनिकमाणिक्यं जिनार्चाहितवेऽन्वहम् ।
स्वयं प्रयाति पुष्पादि समानेतुं विशुद्धधीः ॥१५॥

अपरेद्युः समं पित्रा बाढं पल्लविताग्रहः ।
स जगाम पुष्पवाट्यां फलपुष्पादिलालसः ॥१६॥

प्रश्नाद् विज्ञाय तं बालं **धनदत्त**स्य नन्दनम् ।
फलाद्यैः प्रीणयामास कामं मलयपालकः ॥१७॥

अथागम्य गृहं श्रेष्ठी सपर्यां श्रीजिनेशितुः ।
चकार पूजासम्भारमार्पयत् तस्य नन्दनः ॥१८॥

इति प्रत्यहमातन्वंस्तनुभूरपद्यविः ।
पितृपादाम्बुजयुगं विनम्यैवं व्यजिज्ञपत् ॥१९॥

---

२. इमे सप्त श्लोकाः सम्पादनाय प्राप्तप्रतौ ।
न सन्ति, परं तु कथावश्यकतानुसारेण
श्री माणिक्यचन्द्रसूरिविरचितचरित्रात् उद्धृताः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ताताहमेव मलयात् पुष्पपत्रफलादिकम् ।
आनेष्ये पूज्यपादैस्तु पूजा कार्या जिनेशितुः ॥२०॥

भक्तियुक्तं तु तद्वाक्यं, श्रुत्वा ज्ञात्वा तदाऽऽग्रहम् ।
उद्यानपालकं प्राह, श्रेष्ठी शिष्टाशयस्तदा ॥२१॥

मम सूनोस्त्वया देयं, पुष्पोपकरणादिकम् ।
सहागत्य विमोक्तव्यः, सारा कार्या प्रयत्नतः ॥२२॥

प्रीतचेताः प्रयात्येष, सुमान्यानेतुमन्वहम् ।
**मङ्गलो** जननी स्नेहवल्लीविश्रामभूरुहः ॥२३॥

इतश्च **भरतक्षेत्रे, चम्पे**ति प्रथिता पुरी ।
भूपोऽभूत् तत्र, रूपेण सुन्दरो **गुणसुन्दरः** ॥२४॥

प्रियायां **गुणसुन्दर्यां,** तस्य **त्रैलोक्यसुन्दरी** ।
सञ्जाता सर्वलावण्यतरोः सौभाग्यमञ्जरी ॥२५॥

तां प्राप्तयौवनां प्रेक्ष्य, भूपो रूपेण सुन्दराम् ।
राज्ञीं रहसि पप्रच्छ, को योग्योऽस्या वरो वरः ? ॥२६॥

वैडूर्यपत्रिका स्वर्णे, क्रमुके नागवल्लीका ।
चन्द्रे ज्योत्स्ना यथा शस्या, तथा कन्या शुभे वरे ॥२७॥

नरेश्वर-वचः श्रुत्वा प्रीता प्रोवाच वल्लभा ।
त्वयि शिक्षा प्रदानं यः, सर्वं ज्ञेयं तदीदृशम् ॥२८॥

भारत्या लेखशालेयमाम्रे तोरणबन्धनम् ।
मातुः पुरो मातृकुलं, लङ्काया लहरीयकम् ॥२९॥

तथापि वल्लभाऽत्यन्तं, सुता देशान्तरे यदि ।
दीयते दुस्सहस्तस्या, आवयोर्विरहस्तदा ॥३०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वाऽमात्यपुत्राय सुता, दीयते देव ! चेत् तदा ।
पितरस्तर्पिता यान्ति, सहकाराश्च सञ्चिताः ॥३१॥

सूक्तियुक्तं स्वकान्ताया, वाक्यं श्रुत्वा व्यचिन्तयत् ।
इष्टं वैद्योपदिष्टं मे, सञ्जातं साम्प्रतं किल ॥३२॥

सभायां द्रुतमागत्य, हर्षोत्कर्षेण पूरितः ।
सचिवेशं समाहूय, नृपः प्रोवाच वाचिकम् ॥३३॥

स्वसुतां त्वत्सुतायाऽहं, दास्ये प्रतिप्रवर्द्धये ।
अङ्गीकुरु त्वमप्येतां, यथैव जायतेऽधुना ॥३४॥

खण्डाक्षेपं यथा क्षीरे, शर्करामर्दनं गुडे ।
दीर्घत्वे दीर्घता नूनं प्रीतौ प्रीतिः प्रवर्द्धते ॥३५॥

तदद्भूतं वचः श्रुत्वा, प्रोवाच सचिवेश्वरः ।
अविमृष्टं कथं देवो, ममाऽदिशति साम्प्रतम् ? ॥३६॥

क्व खद्योतः ? क्व चण्डांशुः ?, क्व मेरुः ? क्व च सर्षपः ? ।
क्व शेषाहिः ? क्वाऽलसकं ?, क्व स्वामी ? क्व च मादृशः ? ॥३७॥

अन्यदास्तां नृनाथेश !, कः समर्थस्तवाधुना ? ।
धान्येषु लवणं क्षेप्तुं, चूर्णं पत्रेषु योजितुम् ॥३८॥

पुनर्बभाषे भूपालो, बालोऽसि सचिवेश्वर ! ।
सप्ताङ्गं सकलं राज्यं, तवैव मम वर्त्तते ॥३९॥

सचिवोऽचिन्तयच्चित्ते, यदशस्त्रवधः स्मृतः ।
आज्ञाभङ्गो नरेन्द्राणां, वृत्तिच्छेदो द्विजन्मनाम् ॥४०॥

एकतस्तनयः कुष्टी, नृपादेशोऽन्यतो बली ।
एकतो व्याघ्रासम्पातो, दुस्तटी हि द्वितीयतः ॥४१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

साग्रहं स्वामिनं दृष्ट्वाऽनुमन्ये सचिवेश्वरः ।
चिन्तासन्तापविधुरो, निजं धाम जगाम सः ॥४२॥
बुद्ध्या विबुध्य दुःसाधुसाधनं विबुधाग्रणीः ।
तपसाऽऽराधयामास, गोत्रदेवीं गृहस्थिताम् ॥४३॥
उपवास-त्रयस्यान्ते, तृणशय्यानिषेदुषः ।
ब्राह्म्ये मुहूर्त्ते प्रत्यक्षाऽभवद् गोत्राऽधिदेवता ॥४४॥
यथाऽभ्यासेन विद्या स्यात्, यथा खड्गेन मेदिनी ।
साहसेन यथा सिद्धिस्तपसा, देवता तथा ॥४५॥
वरं वृणीथ तुष्टाऽस्मि, प्रोक्ते देव्या कृताञ्जलिः ।
अवदत् सचिवेशोऽपि, तनयं निरुजीकुरु ॥४६॥
पुनर्बभाषे सा देवी, परिपाकः स्वकर्मणाम् ।
निवार्यते न केनापि, सुरेणाऽप्यसुरेण वा ॥४७॥
समुद्रतरणं वातबन्धनं स्खलनं पवेः ।
सुखावहं हि सर्वेषां, न तु कर्मपारजयः ॥४८॥
यद्येवं देवि ! तद् देहि, भाटकेन वरं मम ।
यथोद्वाह्य कनीमेनां, मत्पुत्राय प्रयच्छति ॥४९॥
तच्छ्रुत्वा देव्यवोचत् तं, दास्ये वत्स ! समीहितम् ।
देवानां दर्शनं वाक्यं, सतां नैव निरर्थकम् ॥५०॥
मन्दुरारक्षकान्ते यो, बालकः शीतपीडितः ।
समेति तापनार्थं ते, स समीहितपूरकः ॥५१॥
इत्युक्त्वा गोत्रदेवी सा, नभसान्तर्दधे तदा ।
मन्दुरा-रक्षकस्यापि, गुप्तां शिक्षां ददौ च सः ॥५२॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

श्री**विशालो**द्यानमार्गे, **मङ्गलं** वीक्ष्य देव्यवक् ।
भाटकेन कनीमेतामुद्वहसि नरोत्तम ! ॥५३॥

तच्छ्रुत्वा **मङ्गलो** दधौ, कथयिष्ये गृहे गतः ।
गृहागतस्य तस्याऽतिविस्मृतं तत् प्रमादतः ॥५४॥

द्वितीयेऽह्नि तथैवोक्तो, यावद् गच्छति मन्दिरम् ।
वातेन तावदुत्पाट्य, मुक्त**श्चम्पापुरी**वने ॥५५॥

विक्रीतेभ्योऽवशिष्टोऽथ, यूथभ्रष्टोऽथवा मृगः ।
बालको वा पुरे भ्रान्तः, कान्दिशीको बभूव सः ॥५६॥

अन्तस्तद्दुःखतापेन, सन्तापित इवार्यमा ।
असहिष्णुस्ततो मन्ये ममज्ज पश्चिमार्णवे ॥५७॥

अथ तत्र सरस्तीरनीरं पीत्वा तटस्थितम् ।
आरुरोह वटं यावत्, तावद् वह्निं ददर्श सः ॥५८॥

भय-शीतभराऽऽक्रान्तो, **धनदत्त**सुतस्ततः ।
वेपमानवपुः प्राप, वह्निं तापनकस्थितम् ॥५९॥

केऽपि तत्र हसन्ति स्म, खेदयन्ति स्म केचन ।
कम्पमानं कुमारं तं, वाक्यैर्नीचकुलोचितैः ॥६०॥

मन्दुरारक्षको बालं, दृष्ट्वा विस्मितमानसः ।
तापयित्वाऽन्यतो नीत्वा, सङ्गोप्य स्वामिने ददौ ॥६१॥

सचिवोऽपि तालकान्तः, प्रक्षिप्य कुमरं स्वयम् ।
वस्त्रान्न-पान-ताम्बूलैः, प्रत्यहं सत्करोति सः ॥६२॥

एकदा **मङ्गलो** दध्यावुपकारः सतामिव ।
कारणेन विनाप्यस्योपकारः कथमीदृशः ? ॥६३॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वाहनाय यथा वाजी, गोर्दुग्धायैव पुष्यते ।
सेवकः सेवनायैव, सर्वं स्वार्थेन पुष्यते ॥६४॥
तथान्यदाऽमात्यपतिर्मङ्गलं प्रोचिवानदः ।
विवाह्य कन्यां भूपस्य, मत्सुताय प्रयच्छ भो !' ॥६५॥
पिधाय कर्णौ स प्राह, न श्रुणोमीदृशं वचः ।
न कुर्वन्ति हि दुःकर्म, सन्तः प्राणान्तसङ्कटे ॥६६॥
हरो विषं मृगं चन्द्रः, समुद्रो वडवानलम् ।
अरम्यमपि मुञ्चन्ति, नादृतं किं पुनः प्रियम् ? ॥६७॥
मन्त्री प्रोचे ततः कोपाद्धनिष्ये स्मर दैवतम् ।
ततो वीरव्रताधारः, कुमारः प्राह साहसी ॥६८॥
खिन्नोपि भाडिजो वाजी, दुर्बलोपि मृगाधिपः ।
भग्नस्तथापि वाराहो, व्यसनस्थस्तथापि सः ॥६९॥
पुष्पाणि लाति रुष्टोपि, कबरीं न तु मालिकः ।
त्वं रुष्टः प्राणहा नूनं, न ते पाणौ यशांसि मे ॥७०॥
तद्वाक्यदूनोऽधावत् तं, हन्तुं मन्त्री यथा तथा ।
सूकरो रोहितः सर्पः, छोहितः कोपितो बली ॥७१॥
ततो मा मेति जल्पन्ती, तत्पत्नी मङ्गलं ययौ ।
जगाद न श्रुतं वत्स !, जीवद्भिर्भद्रमाप्यते ॥७२॥
न मन्यसे तत्कोपस्य, समुद्रे सक्तुमुष्टिवत् ।
तप्ते बिन्दुः क्षुधार्त्तस्य, ग्रासवत् त्वं भविष्यसि ॥७३॥
तद्वचोऽतिसुधासारं, श्रुत्वा चित्ते विचिन्त्य च ।
अनिष्टमपि कालज्ञो मेने तन्मङ्गलो वचः ॥७४॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

परं पाणौ मोच्यमाने, भूपो दास्यति यन्मम ।
**उज्जयिन्याः** पथि स्थाप्यं, तत्सर्वं तन्मतं मम ॥७५॥

तथेति तद्वचो मेने, प्रीतो मन्त्री स्ववेश्मनि ।
कारयामास सामग्रीं विवाहाय विशारदः ॥७६॥

शुभे लग्ने सुसामग्रीसंयुतः सचिवेश्वरः ।
महोत्सवेन महता, **मङ्गलं** पर्यणाययत् ॥७७॥

नृपोऽपि रञ्जितोऽत्यन्तं, जामातुः सहजैर्गुणैः ।
मङ्गलेषु ददौ द्रव्यं, **मङ्गलाय** मुहुर्मुहुः ॥७८॥

ततोऽप्यमोक्तरि करे, जामातरि नृपोऽवदत् ।
सप्ताङ्गं राज्यमस्त्येतद् वत्स ! [तत् त्वं कि]मीहसे ? ॥७९॥

**मङ्गलो**ऽवग् देव ! देहि, वल्लभं वाजिपञ्चकम् ।
नृपोऽददत् तदप्यस्मै, तदल्पं तादृशे खलु ॥८०॥

स्तुयमानो बन्दिवृन्दैर्वर्ण्यमानश्च नागरैः ।
गीयमानः कुलस्त्रीभिः, प्राप मन्त्रीशमन्दिरम् ॥८१॥

**मङ्गलो** मङ्गलीकादि, मागल्यं च पदे पदे ।
श्रयन् वासगृहं प्राप, तापकृद् दौर्जने हृदि ॥८२॥

पुम्भिः दृग् सञ्ज्ञया याहि, प्रोक्तोऽपि विबुधाग्रणीः ।
**मङ्गलः** प्रेयसीं प्राह, भुज्यते चेत् तदा शुभम् ॥८३॥

तदाकर्ण्य स्वदासीभिर्मोदकानानयद् द्रुतम् ।
भुङ्क्ते स्म तदैकत्र, मिथुनं प्रीतिमन्मिथः ॥८४॥

भुञ्जानो **मङ्गलः** प्राह, मोदका मोदकास्तदा ।
**यदोज्जयिन्या** नीरेण, संयुताः स्युरमी प्रिये ! ॥८५॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

पुनर्भ्रूसञ्ज्ञया पुम्भिः, प्रेर्यमाणो मिषान्तरम् ।
विधाय निर्ययौ प्राप, तं मार्गं यत्र ते हयाः ॥८६॥

सर्वं सारं रथे क्षिप्त्वा, गृहीत्वा हयपञ्चकम् ।
क्रमेण मार्गमुल्लङ्घ्य, स्वां पुरीं प्राप **मङ्गलः** ॥८७॥

स्वमन्दिरप्रवेशे स, मार्गो नास्तीति भाषिभिः ।
पुम्भिः समं कलकलं, करोति स्म मुहुर्मुहुः ॥८८॥

गाढं कलकलं श्रुत्वा, धनदत्तः प्रियान्वितः ।
यावदागात् तदोत्तीर्य **मङ्गलेन** नमस्कृतः ॥८९॥

कोऽयं ? किमेतत् ? कुत्रागात् ? किं नामा ? कस्य वा सुतः ? ।
ऊहं वितन्वताऽत्यन्तं, सुतस्तेनोपलक्षितः ॥९०॥

तौ दम्पती सुतं प्रेक्ष्याऽऽश्लिष्यं तौ च मुहुर्मुहुः ।
प्रापतुः शं तथा बाढं, न जिह्वागोचरं यथा ॥९१॥

रथादुत्तीर्य तत्सर्वं, स्ववृत्तान्तं निवेद्य च ।
तत्रैव मन्दिरं प्रौढं, कारयामास **मङ्गलः** ॥९२॥

तद् वाजिपञ्चकं पुष्यन्, कलाभ्यासं नवं नवम् ।
कुर्वन् दिनानि निन्ये स, सुखेनाऽऽचार्यसन्निधौ ॥९३॥

इतश्च मन्त्रिसूर्गेहाद्, गतं ज्ञात्वा नरोत्तमम् ।
वेषं वैवाहिकं कृत्वा, वासागारं विवेश सः ॥९४॥

अकाण्डवज्रपाताऽऽभः, कोऽयं काकोपमो नरः ।
एति हंसास्पदे भीता, सखीवृन्दमियाय सा ॥९५॥

सख्यः प्रोचुः किमायाता ? पतिस्ते मन्दिरं गतः ।
सोचेऽन्यो स नरः कोपि, ता ऊचुर्भ्राम्यसे मुधा ॥९६॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सोचे यूयं ध्रूवं भ्रान्ता, लास्येऽत्रैव निशामहम् ।
प्रातस्तं कुष्ठिनं वीक्ष्य, पितुर्गेहं कनी ययौ ॥९७॥

गतां विज्ञाय तां मन्त्री, मन्त्रयन् यदहो ! खलु ।
न याति बन्धनं पादात्, खरः स्वर्गं प्रयाति चेत् ॥९८॥

त्रस्तो वह्नेर्ययौ कूपं, शान्तेर्वेताल[3] उत्थितः ।
मर्दयित्वोदरे शूलं, मया हा ! दैव ! किं कृतम् ? ॥९९॥

और्वे लग्ने गृहे कूपो, दमोऽश्वानामरिग्रहे ।
स्यात्पूरे केन पालिर्वा, किं करोमि तथाऽधुना ? ॥१००॥

श्याम्यते चाऽधुनाऽप्येतद्,....[4]मुक्तमणी[5]च्युतम् ।
योजनानां च वर्षाणां, शतं याति च जीवति ॥१०१॥

शोकवेषं ततः कृत्वा, सभायां कपटी गतः ।
शोकस्य कारणं राज्ञा, पृष्टो वाक्यमदोऽवदत् ॥१०२॥

यद्युत्पातवचो वक्तुं स्वामिनोऽग्रे न शक्यते ।
तथापि छब्बया[6] छन्नं, प्रभातं नैव तिष्ठति ॥१०३॥

सुरासङ्गाद् यथा कुम्भः श्वपाकी सङ्गमाद् द्विजः ।
अयोग्यस्त्वत्सुतासङ्गात् तथा सूनुर्बभूव मे ॥१०४॥

तद्वाक्य-वज्र-पातेन, मन्त्रिणा हृदये हतः ।
पुनर्निःश्वस्य निःश्वस्याऽऽघूर्णयन्मेदिनीपतिः ॥१०५॥

क्रुद्धः प्रोचे ततो भूपो, मत्कुले कुकलङ्कदा ।
पतिविध्वंसिनी पापा नाऽऽनेतव्या ममाऽग्रतः ॥१०६॥

---

३. शान्त्यै वेताल [?] । ४. अत्र कस्माच्चिन्मध्यस्थात् केन्द्रान्मुक्तं वस्तु लक्ष्यते । ५. अत्र 'अणी' शब्दः देश्यः । ६. 'छब्बया' देश्यः शब्दः 'छाबडी' इति भाषायाम् ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

नृनाथेन परित्यक्ता ज्ञाता **त्रैलोक्यसुन्दरी** ।
जनन्या अपि सर्वस्य, द्वेष्या साऽजनि हा ! तदा ॥१०७॥

इत्थं कियत्यपि गते, काले बाला प्रियोदितम् ।
अस्मार्षीदिति **सिप्राम्भः**, संयुता मोदकाः शुभाः ॥१०८॥

अप्रेम-दुःखनाशाय, कान्तः सङ्केतमादिशत् ।
यथा हि वृश्चिकार्त्तानां, सङ्केता जीवनौषधम् ॥१०९॥

साकूतं सा विमृश्याम्बां, तातविज्ञप्तिकाकृते ।
व्यजिज्ञपज्जनन्योचे, मुग्धे ! किं न श्रुतं त्वया ? ॥११०॥

महत्पूरे प्रतरणं, ज्वरपूरे यथौषधम् ।
तथा विज्ञप्तिका कोपपूरे प्रोक्ता निरर्थका ॥१११॥

अथाऽन्यदा **सिंह**नृपं ताततुल्यमदोऽवदत् ।
तात ! विज्ञप्तिकामेकां, ताताऽग्रे मां च कारय ॥११२॥

त्वयि तिष्ठति यत् तात !, मम न स्यात् समीहितम् ।
सिद्धान्नेपि क्षुधार्त्तिस्तत्, तृषार्त्तिः सरसस्तटे ॥११३॥

ततः **सिंह**नृपो वाक्यमङ्गीकृत्य नृपान्तिके ।
यात्वा विज्ञप्य तां बालां, निन्ये भूपस्य सन्निधौ ॥११४॥

सगद्गदमदोऽवादीत्, सा तात ! त्वं प्रसद्य मे ।
तानयं देहि मे वेषं, प्रेष**योज्जयिनी**पुरीम् ॥११५॥

नृपोपि नीत्याऽनुमतं, सकारणमिदं त्विति ।
मत्वा तस्य ददौ वेषं, प्रैषीत् **सिंह**नृपं सह ॥११६॥

वत्से ! शीलवती भूयात्, कलङ्को न यथा कुले ।
**सिंह**मप्यनुशास्यैतद्, विससर्ज नरेश्वरः ॥११७॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वेषात् कुमारो भूत्वाऽसौ, नाम्ना **त्रैलोक्यसुन्दरः** ।
क्रमे**णोज्जयिनीं** प्राप, स्वपरीवारसंयुतः ॥११८॥
**वैरिसिंहो** नृपो ज्ञात्वा, कुमारं रुष्टमागतम् ।
सम्भाव्य मानदानेनाऽस्थापयद् भवने वरे ॥११९॥
नीरानयनमार्गस्योपरिष्टात् कारिते शुभे ।
आवासे वसतिं चक्रे, विद्वाँ**स्त्रैलोक्यसुन्दरः** ॥१२०॥
ततश्चतुःपथे गौडप्रसादे चत्वरे त्रिके ।
भ्रमन्मिषान्तरात् तत्र, न लेभे वल्लभं निजम् ॥१२१॥
खिन्नोऽथाऽचिन्तयन्मौर्ख्यं, द्वितीयं हि मया कृतम् ।
मालच्युतानामुपरि, प्रहारः पिट्टनस्य मे ॥१२२॥
भित्तिहीनं यथा चित्रं, दन्तहीनं च चर्वणम् ।
अग्निहीनं तापनकं, तद्धीनं जीवितं मम ॥१२३॥
गवाक्षस्थोऽन्यदाऽऽयातं, वाप्यां तद् वाजिपञ्चकम् ।
वीक्ष्योपलक्ष्य तत्स्वामिज्ञानाय नरमादिशत् ॥१२४॥
**धनदत्त**सुतस्यास्य, **मङ्गल**स्याऽत्र तद्गृहम् ।
नरो ज्ञात्वाऽवदत् तस्मै, सोऽत्राऽस्त्याऽऽचार्यसन्निधौ ॥१२५॥
कुमारोऽपीति सिंहस्य प्रोच्य ज्ञातुं च **मङ्गलम्** ।
प्रस्थाप्य **सिंहं** स च्छात्रं, सोपाध्यायं न्यमन्त्रयत् ॥१२६॥
आसनेषु निवेश्योच्चैः कुमारश्छात्रमण्डलीम् ।
मिषेण **मङ्गलं** त्यक्त्वा, सोपाध्यायमभोजयत् ॥१२७॥
ततो हिरण्मये स्थाले, स्वयं भक्तिपरायणः ।
आसने विनिवेश्योच्चैर्भोजयामास **मङ्गलम्** ॥१२८॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

ताम्बूल-वस्त्राऽलङ्कारदानात् सन्मान्य तांस्ततः ।
कुमारः कथयामास, कथयध्वं कथां मम ॥१२९॥
तेऽप्यूचूर्वल्लभो यस्तु, यस्य मानं ददौ भवान् ।
कुमारो **मङ्गलः** सोऽयं, कथां ते कथयिष्यति ॥१३०॥
**मङ्गलो**ऽवक् कथा कथ्या, स्वाऽनुभूताऽथ कल्पिता ? ।
कुमारः प्राह सा कथ्या, याऽनुभूता स्वयं त्वया ॥१३१॥
ततस्तेन स्ववृत्तान्ते, निखिलेऽपि निवेदिते ।
साटोपं कुमारः प्राह, **सिंह**भूपस्य पश्यतः ॥१३२॥
बध्यतां बध्यतामेष, सर्वाऽसम्बद्धभाषकः ।
मत्तातसचिवस्याऽपि, योऽलीकं दूषणं ददौ ॥१३३॥
ततः कुमारस्तं नीत्वा, स**सिंहं** मन्दिरोपरि ।
सिंहासने निवेश्योच्चैर्बभाषे गद्गदाक्षरम् ॥१३४॥
खिन्नां दीनां वराकीं मां, माऽद्यापि त्वमुपेक्षसे ।
तृतीयं त्राणमश्वस्य, सादिनः कौतुकं न हि ॥१३५॥
प्राप्तः सङ्केततो देव !, प्रसीद त्वं तथाप्यमुम् ।
ताततुल्यमभिज्ञानात्, प्रत्याययितुमर्हसि ॥१३६॥
ततः स्वमन्दिरे **सिंह**भूपं प्रस्थाप्य **मङ्गलः** ।
नृपनामाङ्कितं वस्तु, सर्वमप्याऽऽनयत् क्षणात् ॥१३७॥
तत्प्रत्ययात् सरोमाञ्चा, हृष्टा **त्रैलोक्यसुन्दरी** ।
नरवेषं परित्यज्य, लज्जानम्राऽऽननाऽभवत् ॥१३८॥
पुनर्नृवेषमादाय, सप्रिया सा नृपान्तिके ।
यात्वा वृत्तान्तमखिलं, **सिंह**भूपमुखाज्जगौ ॥१३९॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सा सभा स नरेशोऽपि, समकालमदोवदत् ।
अहो ! वैदग्ध्यमेतस्या, अहो ! मन्त्रिणो दुष्टताम् ॥१४०॥
तुष्टो नृपोऽपि तस्याऽदाद् वस्त्रालङ्करणादिकम् ।
**धनदत्तं** समाहूय वर्द्धापनमकारयत् ॥१४१॥
**धनदत्त**गृहे तौ तु, दशाह्निकमतीत्य च ।
भूपप्रदत्ताऽऽवासस्थौ, निन्याते वासरान् सुखम् ॥१४२॥
ताभ्यां **सिंह**नृप**श्चम्पा**भूपान्ते प्रेषितस्ततः ।
तन्मुखाज्ज्ञातवृत्तान्त**श्चम्पा**पोऽचिन्तयन्निदम् ॥१४३॥
अद्य मे हेम्नि सौरभ्यं, सौभाग्योपरि मञ्जरी ।
कलङ्कोत्तरणं वंशात् , पुत्र्या पतिरवापि च ॥१४४॥
पुनः **सिंह**नृपं प्रेष्य, **धनदत्ता**न्वितौ च तौ ।
आनाय्य मिथुनं दृष्ट्वा, हृष्टोऽभूत् मेदिनीपतिः ॥१४५॥
अथाऽन्येद्युर्नृपं घ्नन्तं, तेन पापेन मन्त्रिणम् ।
**मङ्गलो** वारयामास ताततुल्यो ममाऽस्त्यसौ ॥१४६॥
भुक्त्वा सुखं चिरं भूपः, पुत्राऽभावात्पदे निजे ।
**मङ्गलं** न्यस्य जगृहे, **शीलभद्रा**ऽन्तिके व्रतम् ॥१४७॥
राज्योपविष्टं वणिजं, ज्ञात्वा राज्यार्थिनो नृपाः ।
आजग्मुराहवे जित्वा, सोपि तान् स्ववशे व्यधात् ॥१४८॥
ततस्तयोर्महासौख्यमग्नयोरभवत्सुतः ।
अमन्दाऽऽनन्दजननो नाम्ना च **जयकुञ्जरः** ॥१४९॥
**जयसिंह**मुनेः पार्श्वे, धर्मं श्रुत्वा नृपोऽन्यदा ।
पप्रच्छ कर्मणा मे किं, राज्यं देव्याश्च दूषणम् ? ॥१५०॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

मुनिरूचे **सोमचन्द्रः, श्रीमती** दयिताऽभवत् ।
**जिनदत्तो**ऽस्ति तन्मित्रं, द्रव्याऽर्थं सोऽन्यदाऽव्रजत् ॥१५१॥
अर्पयामास दीनारायुतं, चावक् ततस्त्विदम् ।
मन्मृतौ सुकृते देयं, मृतौ तेन तथा कृतम् ॥१५२॥
अन्यदा **श्रीमती**मेत्य, सखी **भद्रा**ऽभिधाऽवदत् ।
सख्यहं निजकान्तस्य, कस्माद् द्वेष्या बभूव हा ! ॥१५३॥
**श्रीमत्यू**चे खलु द्वेष्या, तदा दुश्चारिणी ध्रुवम् ।
तेन वाक्येन दूनां तां, प्रेष्य भूयोऽवदत् ततः ॥१५४॥
हले ! हास्यान्मयोक्ताऽसि, क्षम्यतां दुर्वचो मम ।
ततः प्रशान्तचित्ता सा, सुखं तस्थौ गृहस्थिता ॥१५५॥
अन्यदा **मदना**वेश्या विटपञ्चकसंयुता ।
अवदत् **श्रीमतीं** कोऽपि, न शीलाच्चालने क्षमः ॥१५६॥
**कामाङ्कु**रस्ततः प्रोचे, तन्मध्याद् गर्वपर्वतः ।
तदा **कामाङ्कुरो** नूनं, भुञ्जेऽहं **श्रीमतीं** यदि ॥१५७॥
इत्युक्त्वा स गतो गेहे, **श्रीमत्या**श्च तथा स्थितः ।
यदाऽवदत् सरागं स, तदा सत्या निराकृतः ॥१५८॥
भीतं त्रस्तं भ्रष्टमानं, खिन्नाङ्गं विकलाननम् ।
वीक्ष्य वेश्या तमायातं, हसति स्म मुहुर्मुहुः ॥१५९॥
ततः प्रोवाच **मदना**, यूयं छिन्नाऽत्र तिष्ठत ।
**सोमचन्द्र**परीक्षां च, युष्माकं दर्शयाम्यहम् ॥१६०॥
कुलस्त्रीवेषमाधाय, **सोमचन्द्रं** पथि स्थितम् ।
यात्वा बभाषे भद्र ! त्वामाकारयति **श्रीमती** ॥१६१॥

Jain Education International For Personal & Private Use Only www.jainelibrary.org

सरल: **सोमचन्द्रो**ऽपि, तयाऽऽनीतो वनान्तरे ।
प्रार्थितः प्रथमं पश्चात्, मरिष्येऽहं तयोदितः ॥१६२॥

ततः स सङ्कटं प्रेष्य, स्वं शीर्षं छेत्तुमुद्यतः ।
तावन्निषिध्य सोचैनं, वेश्याऽहं त्वत्परीक्षिका ॥१६३॥

इति तौ शीलसंयुक्तौ, दम्पती स्वायुषः क्षयात् ।
उत्पन्नौ प्रथमे कल्पे, पञ्चपल्योपमायुषौ ॥१६४॥

ततश्च्यूतौ बभूवाते, युवां जाया-पती नृप ! ।
तद्धर्मात् तव राज्यश्रीर्देव्या वाक्याच्च दूषणम् ॥१६५॥

प्राग्जन्मश्रवणाज्जातिस्मृतिमाप्य विरागतः ।
दीक्षामादाय देवौ तावभूतां तु सुरालये ॥१६६॥

ततश्च्युत्वा सुरौ (नरौ) भूत्वा, पुनर्यात्वा सुरालयम् ।
पुनर्नरोत्तमौ भूत्वा मोक्षं, तौ जग्मतुस्ततः ॥१६७॥

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

# ११. श्रीहंसचन्द्रशिष्यविरचितम् मङ्गलकलशकथानकम् ॥

प्रणम्य स्वगुरुं भक्त्या, **हन्सेन्दु**वाचकोत्तमम् ।
क्रियते मङ्गलसाधोश्च, चरित्रं मङ्गलप्रदम् ॥१॥

इहैव **जम्बूद्वीपे भरतक्षेत्रे उज्जयिन्यां** महापुर्यां **वैरिसिंहो** राजा राज्यं करोति स्म । तस्य राज्ञः **सोमचन्द्रा** भार्या । तस्यां नगर्यां **धनदत्तः** श्रेष्ठी अभूत् धर्मात्मा सत्यवान् शीलदयान्वितः गुरौ देवे च भक्तिमान् । तस्य भार्या **सत्यभामा** शीलालङ्कारविभूषिता भर्त्तरि प्रेमपरा परं तु सन्तानविवर्जिता । अन्यदा सा म्लानमुखं चिन्तातुरं दृष्ट्वा श्रेष्ठिनं आह–'हे नाथ ! किं ते दुःखं येन चिन्तातुरो दृश्यते ?' सोऽवदत्–'पुत्रस्य चिन्ता नाऽन्या ।'

यतः–अपुत्रस्य गतिर्नास्ति० ।

सर्वरी दीपकश्चन्द्रः, प्रभाते रविर्दीपकः ।
त्रैलोक्यदीपको धर्मः, सत्पुत्रः कुलदीपकः ॥१॥

श्रेष्ठीनी ऊचे–'अनया चिन्तयाऽलं, धर्मे उद्यमो विधेयः, धर्मात् सर्वं प्राप्यते ।

यतः–धर्म एव भवेन्नृणामिहामुत्र सुखप्रदः ।
स एव सेवनीयो हि, विशेषेण सुखैषिणा ॥१॥

[अजितप्रभसूरिकृते शां० चरित्रे-१-७१]

देवे च गुरौ भक्तिं कुरु, सुपात्रेभ्यो दानं देहि, पर्वं (पुण्यं) कुर्वतः पुत्रो भावी ।' हृष्टः सन् श्रेष्ठी उवाच–'प्रिये ! साधु कथितम् ।' ततश्च श्रेष्ठी धर्मपरायणो बभूव । प्रभातसमये स्वयमारामे गत्वा पुष्पाणि आनीय

Jain Education International For Personal & Private Use Only www.jainelibrary.org

गृहदेवान् पूजयित्वा च जिनालये गच्छति स्म तत्र महतीमर्च्चामकरोत् । पश्चाच्चैत्यवन्दनां विदधे । ततो मुनीन् प्रणम्य प्रत्याख्यानं कृत्वा च साधूनां संविभागं विधाय स्वयं भुङ्क्ते । अथ धर्मप्रभावेन शासनदेवता तुष्टा [प्राह]–'हे श्रेष्ठिन् ! वरं याचय ।' तेनोक्तं–'पुत्रो देहि' । सा प्राह– 'भविष्यति ते सुतः ।' श्रेष्ठिनी स्वप्ने हेममयं पूर्णकलशमैक्षत । समये पुत्रो जातः । '**मङ्गलकलस**' इति आख्यां ददौ । सः कलाभ्यासपरः अन्यदा निजं पितरं पप्रच्छ–'हे तात ! त्वं कुत्र यासि ?' श्रेष्ठी अवदत्– 'प्रतिवासरे आरामे गत्वा पुष्पाणि आनीय जिनपूजनं करोमि ।' अनेद्युः सो बालस्तत्र आरामे पित्रा सह ययौ । आरामिकः श्रेष्ठिपुत्रं ज्ञात्वा तस्मै नारङ्गादीनि सुस्वादूनि फलानि ददौ । तेन द्वितीये दिने सादरं भणितः– 'हे तात ! त्वया निश्चिन्तेन स्थातव्यं अतः परमारामे मया गम्यम् । तद् वाक्यं पितापि अनुमेने । एवं तस्य कुर्वतः कियत्काले गते यज्जातं तन्निशम्यताम् ।

अत्र भरते **चम्पापुरी** अस्ति । तत्र **सुरसुन्दर**नामा राजाऽभूत् । तस्य राज्ञः **गुणावली** राज्ञी । सा स्वप्ने कल्पलतां दृष्ट्वा राज्ञेऽचीकथन् । राज्ञोक्तं–'हे देवी ! तव पुत्री भविष्यति ।' काले पूर्णे देवी सूतां सुषूवे । महीपतिस्तस्या**स्त्रैलोक्यसुन्दरी** नाम चक्रे । सा कीदृशी ? लावण्यरसमञ्जूषा सौभाग्यरसतटिनी प्रत्यक्षसुन्दराङ्गना[सुराङ्गना] । धरापतिस्तां विलोक्य दध्यौ–'अस्याःऽनुरूपो वरो(कः) भविष्यति ? जीवितादप्यस्माकं वल्लभाऽनया विना क्षणमपि प्राणान् धर्तुं न समर्थाः । प्रधानपुत्राय दीयते तदा वरं यथा प्रत्यहं नयनानन्दकारिणी दृश्यते ।' ततो राज्ञा **सुबुद्धिं** समाहूय अभाणि–'मया त्वत्सुताय मत्पुत्री दत्ता ।' अमात्योऽवदत् 'देवाऽदः किमयुक्तमुक्तं ? राजपुत्रं दातुमुचिता ।' राजाऽवोचत्

Jain Education International For Personal & Private Use Only www.jainelibrary.org

'भोऽत्रार्थे त्वया न शोच्यम् । **त्रैलोक्यसुन्दरी** अवश्य त्वत्पुत्राय देया ।' अङ्गीकृतं प्रधानेन राज्ञः वचः । गृहे गत्वा व्यचिन्तयत्-'किं करोमि ?, व्याघ्रतटिनीन्याये पतितोस्मि, राज्ञः पुत्री देवाङ्गनाशदृशी, मत्पुत्रस्तु कुष्ठी ।' तस्य चिन्तयतः बुद्धिरुत्पन्ना-'कुलदेवतामाराध्य वाञ्छितं साधयिष्यामि ।' विधिना कुलदेवतामाराधयामास । सापि प्रत्यक्षी-भूयोवाच-'हे मन्त्रिन् ! किं स्मृतास्मि ?' मन्त्रि जगाद-'दुःखस्य कारणं स्वयं त्वं न वेत्सि ? यथा पुत्रो निरोगो भवेत् तथा कुरु ।' देव्यूचे-'देवैरपि पुरा कृतं कर्म अन्यथा कर्तुं न शक्येत, तत इयं प्रार्थना वृथा ।' मन्त्री प्रोवाच-'अन्यपुरुषं सुरूपमानीयाऽर्पय ।' देवताऽवदत्-'पुरीद्वारे शीतनिरासार्थं यो बालको अग्निसेवापरो भवति, स त्वया ग्राह्यः । पश्चाद् यथोचितं कुर्याः' इत्युक्त्वा गता देवी ।

सचिवो विवाहसामग्रीं सर्वां कुरुते स्म । अभ्यन्तरपुरुषानाकार्य आदितः सर्वं वृत्तान्तं प्रोक्तं-'हे सखे ! शीतव्यथासंयुक्तो यो बालोऽभ्येति सोऽत्रानयितव्यः ।' कुलदेवता **उज्जयिन्यां** पुर्यां ययौ । तस्या**स्त्रैलोक्यसुन्दर्याः** तं श्रेष्ठिनन्दनं वरं विज्ञाय देवी आकाशस्थिता प्रोवाच-'पुष्पाणि गृहीत्वा याति सोऽयं बालकः राजकन्यकां भाटकेन परिणेष्यति ।' सोऽथ तत् श्रुत्वा विस्मितः-'किमेतत् ? तातस्य कथयिस्यामीति ध्यायन् गृहं ययौ । गृहं गतस्य तस्य सा वाणी विस्मृता । द्वितीये दिवसे पुनः श्रुत्वाऽचिन्तयत्-'गृहे गत्वाऽद्य पितुः कथयि-स्यामि ।' यावदिदमचिन्तयत् तावद् देव्या उत्पाट्याटव्यां मुक्तः । सो बालको भयभ्रान्तः तृषाक्रान्तः श्रान्तः सन् एकं सरोवरं ददर्श । तत्र वस्त्राञ्चलेन गलित्वा शीतलं पयः पीतम् । तदनु भानुरस्तमितः । सः दर्भतृणै रज्जुं कृत्वा द्रुममारुह्योत्तरस्यां दिशि ज्वलितानलमपश्यद् । सो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

वृक्षादुत्तीर्य शीतविद्रुतः अग्नेरनुसारेण **चम्पापुर्या** बहिः समेतः । पूर्वोद्दिष्टेन नरेण स्वस्य समीपमानीतः । प्रभातसमये गोपयित्वा अमात्यस्याऽर्पितः भोजनवस्त्रादिभिः गौरवं चक्रे । दिवानिशं गृहस्यान्ते गोपनमकरोत् । ततो **मङ्गलकलश**श्चिन्तयामास-'किं ममाऽयं सत्क्रिया कुरुते ? गृहमध्ये रक्षति ? ।' अन्यदाऽमात्यं पप्रच्छ-'तात ! वैदेशिकस्य मम किं भवद्भिरधिकं माननं क्रियते ? का एषा पुरी ? को देशोऽत्र भूपतिः कः ? सत्यं मम कथय अत्र विस्मयो प्रवर्तते'ऽमात्योनिजगाद-'**चम्पा**नाम्नी पुरी, **अङ्गा**भिधानो देशः, **सुरसुन्दरो**ऽत्र राजा, तस्य राज्ञोऽहं **सुबुद्धि**नामा मन्त्री । वत्स ! त्वं गरीयसा कारणेनात्रानीतोसि, राज्ञा पुत्री **त्रैलोक्यसुन्दरी** विवाहितुं मम पुत्राय प्रदत्ता, मम पुत्रस्तु कुष्ठेन पीडितः, हे भद्र ! त्वया विधिना सा नृपपुत्री परिणीय मम पुत्राय दातव्या । तदर्थं त्वमत्राऽनीतः ।' तदाऽकर्ण्य **मङ्गलो**ऽवोचदेतदकृत्यं किं करोमि ? सा बाला रूपवती क्व ? क्व ते रोगी पुत्रः ? कथञ्चिदिदं निष्ठुरं कर्म [न] करिष्यामि-कृपे क्षिप्त्वा रज्जुकर्त्तनोपममिदं ।' मन्त्री बभाण-'चेदिदं न करिष्यसि दुर्मते ! तदा त्वां निजहस्तेन निश्चितं मारयिष्यामि ।' एतच्छ्रुत्वाऽकृत्यमनुमेने । ततो **मङ्गलकलश**श्चिन्तयामास-'इदं भवितव्यं अन्यथा क्व सा **ऊज्जयिनी** ? ममेहागमनं क्व च ? आकाशवाणी कथमन्यथा भवति ? यद् भाव्यं तद् भवतु, तत्करोमि ।' **मङ्गलः** इदं विचिन्त्य मन्त्रिणं प्रत्याह स्म-'मयाऽऽवश्यं निर्घृणं कार्यं, मद्वचनमिदमङ्गीकर्तव्यं-यद् राजा मह्यं ददाति तद् वस्तु ममैव । **ऊज्जयिन्याः** मार्गे तत्सर्वं स्थापनीयम् ।' मन्त्री तद् वाक्यं मेने-'एवमस्त्विति ।'

लग्ने समागते स हस्तिस्कन्धारोपितः वस्त्राभरणभूषितः भूपतिसमीपे समानीतः । सा **त्रैलोक्यसुन्दरी** तं मन्मथोपमं दृष्ट्वा स्वं कृतार्थममंस्त ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

प्रथमे मङ्गले धराधिपोऽनेकशश्चारु वस्त्राणि ददौ, द्वितीये मालाभरण-सञ्चयं, तृतीये मणिहेमादि, चतुर्थे रथादिकं ददौ । तयोः जायापत्योरित्थं पाणिग्रहोत्सवो जज्ञे । वरो वधूहस्तं न मुञ्चति । नृपतिः भूयः उवाच– 'वत्स ! तव किं यच्छामि ?' तेन जात्यघोटकपञ्चकं याचितम् । तत् तस्मै दत्तं । मन्त्रिणा तूर्यवाद्यमाने सः वध्वा सह स्वगृहे नीतवान् अमात्यश्छन्नं छन्नमभाषत 'अयं वैदेशिको नरोऽद्यापि न निर्वास्यते ।' सा **त्रैलोक्यसुन्दरी** इङ्गीतैः निजपतिं चलचित्तं ज्ञात्वा क्षणमपि तस्य समीपं नैवाऽमुचत् । ततोऽसौ क्षणान्तरे जलपात्रं गृहीत्वा देहचिन्तार्थमुत्थितः । सा तदनुगच्छत् । प्रीयं रहस्थितमुवाच । 'हे कान्त ! क्षुधा तव किं बाधते ?' तस्मिन्नामेति भणिते स्वगृहाद् दासीहस्तेन [आनाय्य] मोदकान् तस्मै ददौ । तेषु भुक्तेषु पाणियं पित्वा तेन भाषितं–'अहो ! रम्यतराः एते सिंहकेसराः मोदकाः–

ऊज्जयिन्या नगर्याश्चेन्नीरमास्वाद्यते यदि ।
तदा तृप्तिर्भवेन्नूनं, मोदकेष्वशितेष्वपि ॥१॥

[अजितप्रभसूरिकृते शां० चरित्रे-१-१७०]

तदाकर्ण्य व्याकुलचेतसा राजपुत्री दध्यौ-'एषोऽघटमानं किमेतद् वाक्यं प्रजल्पति ? ततश्च राजपुत्री निजहस्तेन तस्मै पञ्चसौगन्धिकं ददौ । **मङ्गलकलसस्त्रैलोक्यसुन्दरीं** जगाद-'पुनर्देहचिन्तायां गमिष्यामि, त्वया क्षणान्तरेण नीरं गृहीत्वा आगन्तव्यं ।' शनैः शनैः प्रधानगृहान्निर्गत्य पुरुषान् पप्रच्छ-'भो ! राजदत्तं मामकं क्वाऽस्ति ?' । तैः **ऊज्जयिन्याः** पथि स्थितं तत्सर्वं दर्शितम् । सारतरं वस्तुः[रथे]निक्षिप्य अश्वान् योजयित्वा पुरीं प्रति चचाल सः । स्तौकेरेव दिनैस्तां निजां नगरीं प्राप्तः ।

Jain Education International For Personal & Private Use Only www.jainelibrary.org

इतश्च तस्य पितरौ तमन्विष्य विलप्य च बहुभिर्दिनैः गतशोकौ बभूवतुः । श्रेष्ठी तं रथारूढं गृहाभिमुखमायान्तं विलोक्य बभाषे-'हे राजपुत्रं ! पूरातनमार्गत्यक्त्वा किमभिनवमार्गं करोसि ? स निषिद्धमानोऽपि यावन्न विरराम रथात् तावत् समुत्तीर्य पितुः पादौ ननाम । हर्षाश्रुपुरप्लावितेक्षणं ताभ्यां समुपलक्षितः । उपविष्टः सन् पप्रच्छ-'वत्स ! ईदृशी ऋद्धि कुतः ? इयत्कालं तव क्व गतम् ? । आकाशवाणी-अपहारादि-स्वस्थानागमनावधिकथा पितुरग्रे निवेदिता ।

अहो ! पुत्रस्य सौभग्यं, अहो ! पुत्रस्य दक्षता ।
अहो धैर्यमहोभाग्यमिति प्राशंसतामिमौ ॥१॥

[अजितप्रभसूरिकृते शां० चरित्रे-१-१८९]

अश्वानारक्षणार्थं प्राकारसंयुक्तं स्वगृहमकारयत् श्रेष्ठी । **मङ्गलः** अन्यदा जनकं प्राह-'तात ! त्वदाज्ञया अद्यापि कलागमं सम्पूर्णं करिष्यामि ।' पित्राऽनुमतः सन् कलाचार्यस्य सन्निधौ कलाभ्यासमसौ चकार ।

इतश्च मन्त्रिणा रात्रौ निजसुतो **मङ्गल**वेषभृत् वासभवने वधूसमीपे प्रैषितः । **त्रैलोक्यसुन्दरी** तं शय्यारूढं दृष्ट्वा दध्यौ-'कोऽयं कुष्ठाभिभूतसरीरः रभसादिह समायातः ?' स्पर्शकर्तुमुद्यतेऽस्मिन् सा शय्यायाः समुत्थाय भुवनाद् बहिर्निर्ययौ । दासीभिः भणिता । 'स्वामिनी ! ससंभ्रान्ता किमसि ?' 'देवतारूपी मम पति क्वापि गतः कोऽपि कुष्ठिको विद्यते ।' दासीभिर्गत्वा विलोकितः । दृष्टः कुष्ठिकपुरुषः । सा अतिदुःखेन रात्रिमतिवाह्य प्रातः पितृगृहं ययौ । **सुबुद्धि**रपि दुर्बुद्धिर्मन्त्री श्याममुखो महीपतिसमीपे समायातः पृथिवीपतिरेनमभाषत-'हर्षस्थाने कथं विषादः ?' सः जगाद-'हे महाराज ! कर्मणां विचित्रा गतिः, मन्दभाग्योऽहं जीवोऽन्यथा चिन्तयति, विधिः कार्यमन्यथा कुरुते ।'

Jain Education International For Personal & Private Use Only www.jainelibrary.org

यतः-माणुस्स चिंतइ अन्नं, अन्नं पुण होई दैवजोगेणं ।
मणसा जं न चिंतिज्जइ, तं तं करेई विहुविउण ॥१॥
अघटितघटितानि घटयति सुघटितघटितानि जर्ज्जरीकुरुते ।
विधिरेव तानि कुरुते, यानि पुमान्नैव चिन्तयति ॥२॥

राजा प्रोवाच—'हे मन्त्रिन् ! दुःखस्य कारणं निवेदय ।' सचिवो निःश्वस्योचे-'देव ! यद् दैवः करोति तद् वक्तुमपि नाशक्यमश्रद्धेयं श्रृण्वतां तव पुत्री मत्पुत्रस्य दत्ता, तस्यां परिणीतायां यज्जातं तन्नि-शम्यतां, देवकुमारशदृशः मम पुत्रस्तव पुत्रीस्पर्शेन कुष्टरोगैः व्याप्तः ।' तदाकर्ण्य राजा दध्यौ—'नूनं मम नन्दनी अलक्षणा । स्वकर्म-परिणामेनाऽस्य पुत्रः कुष्ठिः जज्ञे ।' यतः- कृतकर्मक्षयो नास्ति०

अमात्य उवाच—'स्वामिन् ! भवतामत्र को दोषो ? मत्कर्मणां दोषः ।' मन्त्री स्वगृहं ययौ । सा **त्रैलोक्यसुन्दरी** राज्ञः परिजनस्य च ईष्टाप्यऽनिष्टा सञ्जाता । कोप्येनां नाललाप । एकत्र गुप्तगृहे स्थिता । स्वदुःकर्म अचिन्तयत्-'मया पुरा किं विहितं ? येन मे पतिर्नंष्ट्वा क्वापि गतः, अन्यच्च लोकमध्ये कलङ्कं समुपस्थितम् । व्यसने पतितां किं करोमि ? क्व गच्छामि ?' एवं जल्पन्त्यास्तस्याश्चित्ते स्थितं-'नूनं स मे पति**रुज्जयिनी**पुर्यां प्राप्तः, मोदकं भुक्त्वा तेन जल्पितं "एते हि मोदका रम्याः, कित्ववन्त्या जलोचिता ।" [अजितप्रभसूरिकृते शां० चरित्रे-१-२१८] केनाप्युपायेन यद्यहं तत्र गच्छामि, तदाऽस्य मिलित्वाऽसुखभागिनी भवामि ।' अन्येद्युरम्बामुवाच-हे मात ! मम जनक यद्येकवारं वाक्यं श्रृणोति तथा त्वं कुरु ।' तया **सिंह**नामकं सामान्तं ज्ञापयामास । सो राजकुले गत्वा राजानमुवाच—'हे नरनाथ ! भवतां मान्या **त्रैलोक्यसुन्दरी**

Jain Education International For Personal & Private Use Only www.jainelibrary.org

कष्टे वर्तते, तस्याः सन्मानदानादि दूरे, वाक्यश्रवणमात्रेणालापनं विधीयतां।' अश्रुपूर्णाक्षः पार्थिवोऽब्रवीत्-'भो **सिंह** ! अनया पुरा दुःकृतं विहितं, गाढमस्माकमनिष्टतां प्राप्ता, अनया यत्किञ्चिद् विवक्षितमस्ति तद् ब्रवीतु।' **त्रैलोक्यसुन्दरी** उवाच-तात ! कुमारोचितं पुरुषवेषमर्पय।' राजा **सिंह**मुवाच-'केनचिद् गुरुकार्येण पुंवेषं याचितेऽस्मै दातव्यः।' पार्थिवः पुंवेषं ददौ। **सुन्दरी** अभ्यधात्-'तात ! चेत् तवाज्ञा भवेत् गरीयसा कारणेन **उज्जयिन्यां** यामि।' तद्रक्षणार्थं बलान्वितं **सिंह**-मादिदेश। राजाऽवोचत्-'पुत्रिके ! मम वंशस्य दूषणं नाऽभ्येति त्वया तदेव कार्य'मित्युक्त्वा महीभुजा विसृष्टा। सा **सिंह**सामन्तसमन्विता अखण्डप्रयाणै**रुज्जयिनीं** पुरीं ययौ।

**वैरसिंहः** नृपः जनतामुखादेवं शुश्राव य**च्चम्पायाः** नृपनन्दनोऽत्र समागच्छन्नऽस्ति। स्वागतप्रश्नपूर्वकं पुरे प्रवेश्य निजमन्दिरं नीतः। आगमनार्थं पृष्टः। सो राजानं प्रोवाच–'कुतुहलादिना नगरीं द्रष्टु-मागतोस्मि।' नरेन्द्रेण प्रोक्तं–'त्वया ममौकसि स्थेयम्। **सुरसुन्दर**राज्ञो ममाऽन्तरं न।' सा राज्ञा ढौकितगृहे तस्थौ। अन्यदा नीरपानार्थं गच्छतः तान् अश्वान् [निरीक्ष्य] नृपपुत्री दध्यौ। एते तुरङ्गमा मम तातस्य सत्काः। **त्रैलोक्यसुन्दरी** भर्त्तुः गृहाभिधानादिसर्वशुद्धिं [विवेद्य तं च] ज्ञानाभ्यासपरं ज्ञात्वा **सिंह**मुवाच-'एते तुरङ्गमाः कथं ग्राह्याः ?' **सिंहो**ऽवादीत्-'सच्छात्रकलाचार्यं भोजनाय आमन्त्रय।' उपाध्याये भोजनार्थं तत्रायाते सा छात्रमध्ये हृदयानन्ददायिनं स्वभर्त्तारं ददर्श। तस्यात्मीयमासनं स्थालं च अदापयत्। विशेषेण भोजनादिषु गौरव-मकारयत् ततो सर्वेभ्यो यथायुक्तं वस्त्राणि ददौ, **मङ्गल**स्य मनोहरां

Jain Education International For Personal & Private Use Only www.jainelibrary.org

स्वकीयां मुद्रिकां ददौ । सा कलाचार्यमवोचदेतन्मध्यात् कथानकं यो छात्रो जानाति स आख्यातु । सर्वैः छात्रैरीर्षया **मङ्गलो** निर्दिष्टः । स उपाध्यायगिरा वक्तुं प्रचक्रमे । तेनोक्तं–'चरितं कथयामि ? किं कथानकं कथयामि ? ।' सा अवदत्–'कल्पितेन पर्याप्तं, भो ! चरितं ब्रूहि ।' **मङ्गल**श्चिन्तयामास–'सेयं **त्रैलोक्यसुन्दरी** या मया **चम्पा**पुर्यां भाटकेन परिणीता, पुंवेषधारणी केनापि हेतुना भूत्वाऽत्रागात् । तावदहं निजां कथां कथयामि यावदमात्येन गृहान्निष्कासितः ।' तेन सर्वाप्यात्मकथा प्रकाशिता । अत्रान्तरे राजसुतयाऽलीककोपः कृतः 'भो सुभटाः ! अमुं पुरुषं गृह्णीत गृह्णीत' इत्युक्ते शीघ्रं गृहान्तरं आनीय नृपपुत्री **मङ्गलं** सिंहासनेऽध्यास्य **सिंह**-सामन्तमूचे-'अयं मम भर्त्ता किमत्र कर्तुं युज्यते ?' तेन कथितं यत्नेन रक्षणीयं, पुंवेषं मुक्त्वा स्त्रीवेषमकारी । ततः युग्मं श्रेष्ठीनः गृहे ययौ । पार्थिवोपि तद्वृत्तं श्रुत्वा विस्मयं प्राप । **मङ्गलस्त्रैलोक्यसुन्दर्या** सह भोगान् विललास । **सिंहः** पुरुषवेषं लात्वा **चम्पा**पुरीं ययौ । जगतीपतेः सर्ववृत्तान्तं कथितम् । राजाऽचिन्तयत्–'दुष्टेनाऽमात्येन अदोषा मत्पुत्री सदोषा विहिता ।' भूपतिः पुनरपि **सिंहमुज्जयिन्यां** प्रेष्य सकान्तं **मङ्गल**मानाय्य । यथाविधि सच्चक्रे । महीभुजममात्यमार्यमाणं गाढाऽभ्यर्थनया **मङ्गलो** मन्त्रीं मोचयामास । 'रे पापिन् ! जामातुरुपरोधेन मया मुक्तोऽसि ।' [इत्युक्त्वा सः राज्ञा] पुरान्निर्वासितः । अपुत्रः भूपालः जामातरं सुतं मेने । तन्मातापितरौ तत्रैव आनाययामास । अनेद्युः नरपतिः **मङ्गलकलसं** राज्ये संस्थाप्य **यशोभद्र**सूरिसमीपे परिव्रज्यामुपाददे । **मङ्गलस्य** राज्यं पालयतः सतस्त्रैलोक्यसुन्दर्या पत्न्या **जयशेखरः** सुतोऽभूत् । राजाऽनेकशो

Jain Education International For Personal & Private Use Only www.jainelibrary.org

निजदेशे जिनचैत्यन्यकारयत् । अनेद्युः भूपतिरुद्यानमायातं **जयसिंहा**भिधं गुरुं गत्वा वन्दे । सूरिभिः धर्मदेशना दत्ता । तदनन्तरं राजा पूर्वभवं पप्रच्छ—भगवन् ! केन कर्मणा मया विडम्बना प्राप्ता ?' सूरिरूचे-ऽस्मिन्नेव **भरत**क्षत्रे । धनधान्यसमृद्धिमत् **क्षितिप्रतिष्ठितं** नाम पुरमस्ति। तत्र **सोमचन्द्रा**भिधानः कुलपुत्रकः आसीत् । तद्भार्या **श्रीदेवी** । तत्रैव नगरे **जिनदेवा**भिधानः श्रावकोऽभूत् । तस्य तेन समं मैत्री जाता । अथ **जिनदेवो** देशान्तरं गन्तुकामो निजमित्रमभाषत-'धनोपार्जनार्थं देशान्तरे गमिष्यामि, मामकीनमिदं धनं त्वत्समीपे स्थाप्यं, यथाविधि सप्तक्षेत्र्यां वाप्यं, तस्य पुण्यस्य तव षष्टांशो भवतादिति । तस्मिन् देशान्तरे गते **सोमचन्द्रः** शुद्धचेतसा तद्द्रव्यं यथास्थानं व्ययति स्म । तस्य भार्याप्यऽनुमोदनात् धर्मं भेजे । तस्मिन्नैव पुरे तस्याः सखी **भद्रा**नाम्नी **देवदत्तस्य** गेहिनी अभूत् । सः **देवदत्तः** केनचित् कर्मदोषेण कुष्ठी जज्ञे। ततो तत्प्रिया **भद्रा** विषसाद । तया अनेद्युः सख्याः पुरस्तत्स्वरूपं निवेदितम् । तया हासपरया सा ससम्भ्रमं भणिता—'हले ! त्वत्सङ्गदोषेण पतिः कुष्ठी जज्ञे, त्वं ममापि दृष्टिं माऽगाः दूरतोऽपसर ।' तेन वचसा सा दीनमुखी जाता । सः **सोमचन्द्रः** स्वभार्यया **श्रीदेव्या** सार्द्धं श्राद्ध-धर्ममपालयत् । तौ दम्पती मृत्वा सौधर्मे त्रिदिवौ समजायताम् । पञ्च-पल्योपमस्थित्वा, सौधर्माच्च्युत्वा त्वं श्रेष्ठीनन्दनोऽभूत्, **श्रीदेवी**जीवः **त्रैलोक्यसुन्दरी** । त्वया परद्रव्येण यत्पुण्यमुपार्जितं तदेषा भाटकेन परिणीता । अनया पुरा हास्येनोक्तं, तेन कर्मणा कलङ्कं समभूत् ।

यतः-हसन्तो हेलया कम्मं, रोयंतो वि न छूट्टइ ।
हसन्ती धारए गब्भं, रोयंती परिमुच्चइ ॥१॥

राजा तत् श्रुत्वा, स्वपुत्राय राज्यं च दत्वा, राज्ञ्या सह प्रव्रज्यां जग्राह। सो राजर्षिः सर्वसिद्धान्तपारगोऽभूत्। गुरुणा सूरिपदे स्थापितः। **त्रैलोक्यसुन्दरी**साध्वी प्रवर्तिनी स्थापिता। तौ मृत्वा **ब्रह्म**कल्पे गतौ। एवं तृतीये भवे मानुष्यभवं प्राप्य मोक्षपदं प्रापतुः।

श्री**हंसचन्द्रशिष्येण** उद्धृतं गद्यभाषया।
चरित्रं पण्डितैः सोध्यं, वाचनीयं सुसाधुभिः ॥१॥

**इति मङ्गलकलशचरित्रं सम्पूर्णम्।**

• • •

Jain Education International For Personal & Private Use Only www.jainelibrary.org

શ્રી

દાનધર્મનો મહિમા
મુક્ત કંઠે રેલાવતી કથા,
**"મંગલ કલશ કથા"...**
૯૦૦ વર્ષના લાંબા સમયપટમાં પથરાયેલી
અને ૧૨-૧૨ જેટલા કવિશિલ્પિઓના હાથે
કંડારાયેલી આ કથાનો સમન્વયાત્મક
અભ્યાસ થઈ રહે એ જ
આ સંપાદનનો
ઉદ્દેશ છે.

Cover Designing by
RARE N RIGHT
98204 34841

Jain Education International For Personal & Private Use Only www.jainelibrary.org

Tirth 02832-253252